The Emperor came to learn from his spies that Husain Ali Khan was returning with a bigger army than that collected by Azam for establishing his own rights to the throne after the death of Emperor Aurangazeb and so the Emperor became much frightened.

Wrong steps taken by Farruk-Siyar

(1) Reckless mode of enriching Muhammad Murad. Hardly any day passed when Murad did not receive very lavish gifts from the Emperor. Shiv Das mentions in one place that on being asked for one ring, one day Farruk-Siyar gave Murad double handfuls of rings—most valuable ones of the imperial jewel-house. It is Murad who used to poison the ears of the Emperor most. Itiqad Khān's sudden rise without any justification rankled like a thorn in the hearts of all nobles.

(2) On Md. Murād's advice, the Emperor recalled from Bihar Sarbuland Khān, a sagacious and really fit person to cope with the Sayyids. To a very careful query of this Sarbuland Khān who was created Mubariz-ul-mulk Namwar Jang, the Emperor replied almost in a childish manner that he had in his mind Itiqad Khān or Md. Murad for the post of Wazir and no body could be better than he. Sarbuland Khān from

---

(1) According to Khafi Khān, Ikhlās Khān who met Husain Ali Khān at Sarai Md. Āzam Shāh, north of the Narmadā river. See notes appended to the Text.

(2) According to other chroniclers, the messenger of the Emperor made friends with Husain Ali Khān. See the footnote to the Text.

that day drew back far from the King. A man hot like flame with endless enterprise and zeal now became icy cold.

(3) There are good reasons why the Emperor's Rathor father-in-law went over to the side of Sayyids. When the ministration of Itiqad Khān and Samsam-ud-daulāh failed, he ought to have stopped there. The Emperor used to fly into a passion in season and out season. He could not help himself. This led him to destruction. People nicknamed Ajita Siṃha *Damad Kash* and women beat him with shoes as we shall see later on and as Lakṣmīpati has stated so plainly. But it cannot be denied that from the very beginning, Ajita Siṃha was very badly treated. Certainly, it was for this reason that Ajita Siṃha took back his daughter with all properties she inherited; she was also re-converted to Hinduism—a step that was probably not liked by the Hindus either.

(4) The Emperor should not have lost the sympathy of Qilich Khān Nizām-ul-mulk under any circumstances. Recalling him from the Chakla Muradabad was the last stroke for him, particularly, in favour of a person like Itiqad Khān. Lakṣmīpati records that Qilich Khān reached the capital within three days of the emperor's call to him. But the Emperor infuriated him. As a consequence, he refused the offer of the Emperor to him.

"नाथ जीवति भूनाथे महीपोऽन्यो न जायते ।
यथा जीवति चामन्दे(१) नैव मन्त्र्यन्तरं तथा ।।❀❀❀
संभिनत्ति महीपो यो मर्यादां पूर्वराजभिः ।
स्थापितां न च तस्यापि मर्यादा किल तिष्ठति ।।
अवदुल्लो यदा प्राणरहितः संभविष्यति ।
तदाऽहं संभविष्यामि सचिवस्ते सुतान्वितः ।।"

(5) Knowing fully well that Samsam-ud-Daulāh had been alienated from him, the Emperor should not have believed that he would utter the word "Kul", meaning slave, before the Army. At the crucial moment, he said "Kur", meaning army, whereupon all the armed soldiers of the Wazir made their appearance, and not the slaves who were instructed to imprison Abdullāh. [2] It was this Samsam-ud-Daulāh who many a time baffled the efforts of the Emperor against Kutb-ul-mulk.

(6) It was too much to expect that a determined sort of man like Husain Ali Khān would return from his mid-journey to Deccan on the orders of Farruk-Siyār. Nor should he have sent Ikhlas Khān to Husain Ali Khān under any circumstances. He only helped in making a confounded case still more confounded.

---

(१) मन्त्रिणि ।

(2) Farruk-Siyār called out "*Kul*" (slave) but Samsam-ud-daulā shouted "*Kur*" or armed retinue. This simple change of one letter spoiled the whole plan.

(7) When the Emperor called Mahammad Amin Khan from Malwar, he should have stuck to his original order. Abdullāh would naturally desire to send his own man Raja Ratan Chand to a powerful man like Md. Amin Khan. The Emperor was cerainly very unwise in agreeing to send Ratan Chand to him on Abdullah's request. Further, the Emperor added the last straw on the camel's back when he deprived the Khan of his rank (Mansab) and attached his jagirs. This helped Qutb-ul-mulk to make friends with him. Abdullāh lost no time in sending his brother Nazim-ud-din Ali Khān and Jafar Khān to escort him to his house.

(8) What was worst of all, the Emperor should not have made concessions after concessions on demand from Abdullāh. The appointments that he made at the last moment in fear of Hussain Ali Khan only added insult to injury and helped in bringing about his immediate destruction. Samsam-ud-daulah ought not to have been ordered to vacate the house in the fort known as Peshkhana. The Wala-Shahi or the Emperor's troops and Samsam-ud-daulah's retainers should have been kept in the fort under any circumstances. Sayyid Nijam-ud-din Ali Khān's appointment as Darogha of the privy council in place of Samsam-ud-daulāh, Sayyid Khān's as commandant of the imperial artillery, Abdun-nabi-Khān's as Head Officer of the mace-bearers, Sayyid Shujaat Khān's as Head of the office of the retinue, Nizabat Ali Khān's as Nazir or Head of Harem—on 20th February, 1719, only hastened the death of the Emperor at the hands of his enemies.

(9) The Emperor ought to have acted in accordance with the advice of Jaya Siṃha, taken the field in advance and fallen upon the Sayyids. In that case, he could have at least died valiantly as a scion of the family of Timur. He not only refused to listen to Raja Jaya Siṃha, but also ordered in his own hand-writing Raja Jaya Siṃha and Rao Buddhi Siṃha to leave Delhi for their own countries. This they did next day (22nd February, 1719). They were not even allowed farewell interveiws with the Emperor. Along with Jaya Siṃha, the Emperor lost the only friend who would die for him on the battle-field.

(10) The Emperor was frightened on account of the huge army that accompanied him from the South. He should have understood that these soldiers were mostly captured or hired for a big show, even the bringing in of a son of Akbar Shah with Husain Ali wās a mere false demonstratiion. This supposititious Prince Main-ud-din Husain was collected from Satara. When Prince Akbar rebelled against his father Aurangzeb and left India for Isfahan, this son had been left behind. Now, Husain Ali Khān gave out that Akbar's son had been captured by Raja Sahu of Mahārāstra and made over to him with the hope that the Raja's mother and brother staying at Delhi as prisoners since 28th. October, 1689, would be released.

For accompanying Husain Ali Khān, these Mahratta leaders extracted great promises of future reward from him. In addition to the release of Raja Sambha's wife and son, Husain Ali Khān promised the ratification of the treaty for a grant of the

Chauth or one-fourth share in the revenues of the South, a grant of the Sardesh-mukhi or ten per cent of all collections and a confirmation of the Swaraj for Mahārāṣṭra on a hereditary basis. It is said that each Mahratta trooper got one rupee a day from Husain Ali Khān.

Farruk Siyar in great agony

One day Farruk-Siyār said to his father-in-law Sadat Khān as follows :—

—"Ajita Siṃha himself has been frequenting the house of Qutb-ul-mulk daily as though he was completely won over (p. 92 of the Ms). Similarly Jaya Siṃha too is frightened and desires to leave the capital for his own country. (1)

Qilich Khān does not desire to extirpate Abdullāh ; really, he too, has been won over. Khān Daulā, too, is too afraid for any action. Even my own mother does not desire the death of Abdullāh with her whole heart. My wife, daughter of Ajita Siṃha, desires my own defeat. Buddhisiṃha does not now stand for me ; nor Bhīma Siṃha who has also been won over. Other rulers are insignificant. So what am I do ?"

To this, his father-in-law replied : "Just as Asad Khan brought about the destruction of Muizz-ud-din, Abdullāh would do the same for you. The difference would be that Muizz-ud-din was not allowed to enter the fort ; and in your case, you will not be allowed to leave the fort. It is also true that Abdullāh himself will be destroyed in the long run" :—

"यथा चासदखानेन मौजदीनो विनाशितः। तथा चैवावदुल्लेन तव नाशो विधास्यते ॥
दुर्गमध्ये न संगन्तुं दत्तस्तेन स भूमिपः। तुभ्यं दुर्गाद् वहिर्गन्तुं नानेन किल दीयते ॥
परिणामे तु चैतस्य विध्वंसः संभविष्यति ॥"

It was no good now crying over the spilt milk, added his father-in-law. When the house was on fire, it was no good lamenting for not digging a pond by its side. It was he who made Abdullāh the head of Artillery ; the gateway was also kept at his disposal ; he was the keeper of the inner apartments : even the stores were under his control. Consequently, he himself had to withdraw his army outside the fort.

At the end he, however, asked the King to be thankful for all the happiness he

---

(1) Other chronicles show that it was owing to the abnormal fear and inactivity of Farruk Siyār that Jaya Siṃha had to leave Delhi for his own country. Buddhi Siṃha and Jaya Sīṃha had to leave Delhi on express orders of Abdullāh & Husain Ali Khān to do so. Farruk Siyār had at that time no power or even courage to stand up aganist his opponents.

had enjoyed till then. He had also to reap the result of the evil deeds he did ; still, he would do well to try hard to live so long as he could :—

"येनैव परमेशेन त्वत्कृतानां तु कर्मणाम् । शुभानां तु फलं तुभ्यं सार्वभौमात्मकं शुभम् ।
दत्तं स्थितं तु चैतावत्कालं तैनैव संप्रति । कर्मणामशुभानां तु फलं संदीयते प्रभो ॥
तस्मात्त्वया यथा देहे जीवस्तिष्ठति भोगकृत् । तथोपायो विधातव्यो जीवन् भद्राणि पश्यति ॥"

At this the Emperor began to pass his days in great anxiety just like a bird in a cage—constantly seeking for a way out from the fort. In this he could not succeed.

Husain Ali Khan's sarcastic remarks

Husain Ali Khan one day came to see the Emperor with folded palms as a mere show and sarcastically adduced all arguments for removing the Sayyid Brothers from the posts they held, for they were most unfit for these posts, adding, however at the end the salient points :—

"इदानीं कुरु राज्यं त्वं श्वो भाव्यं संभविष्यति ।
भविष्यध्वंसकरणे चतुरो नास्ति वै विधिः ।
अन्येषां तत्र चातुर्यं कथं वै संभविष्यति ॥"

So saying, he went off. with proper salutations.

Emperor in mortal fear

But all around the Emperor found not a single soldier of his own ; the whole area was filled with the army of Husain Ali Khān himself. He at once fled to the harem. His only friend Jaya Siṃha was at this time away in his own country. (1) In the next morning Abdullāh came inside the fort, while Husain Ali Khān remained outside for encircling the city with his army.

Not finding him in the Court, Abdullāh sent his army inside the harem. He could not be found the first day ; and nobody inside helped Abdullāh's men in finding him out. Lakṣmīpati here aptly remarks that it did not occur to anybody in the whole host of Abdullāh Khān's people that a man who fled for his life and hid himself among women should not be chastised :—

"नारीणां कवचं कृत्वा स्थितस्यास्योचितो न हि । वर्तते निग्रहश्चेत्थं केनचिन्नहि मानसे ।
विहितं सर्वभावेन ॥"

---

(1) Some chroniclers mention that people outside really believed that Raja Jaya Siṃha would march in from Sarai Sahil and Sarbuland Khān from Sarai Mihr-Parwar and they both would be able to save the life of Farruk Siyar.

On the other hand, even the women were molested the second day and the Emperor was found out. (1)

Abdullāh and others now gagged and made him blind.

Real friends of the Emperor.

It is known from other sources that some nobles such as Mir Mushrif, Islam Khan, Mukhlis Khan, Muniam Khan, Sayyid Salabat Khan, and Saifullah Khan Bakshi came forward to the palace ; also Manohar, Captain of Artillery, with two or three thousand of the Emperor's artillery took the field. Asghar Khan with his Mughals also desired, from Lahori Gate side, to resist the Sayyids.

When the fight went on for less than an hour, Sadat Khan was wounded for which he had to retire. His son was taken as a prisoner to Husain Ali Khan.

At this time, Ghazi-ud-din Khan or (Ahmed Beg) made a valiant effort to render the emperor some help. He jumped upon the army of Husain Ali Khan who were all around the fort like a mighty lion and went on killing the soldiers of the Southern battalions in any number. Seeing his Southern Indian troops receding under pressure of Gazdi-khān's troops, Husain Ali Khan sent another batch of valiant soldiers who also were similarly extirpated. (2) At this he ordered extensive use of fire-arms. Husain Ali sent an angry letter to Abdullah for his inadvertent ways of doing things.

Unfortunately, Ghazi-ud-din had no trained or disciplined troops with him. They fled, after fighting for some time. There was no reinforcement for him from any side ; there he escaped from the scene, fighting all the while he went. As ill luck would have it, says Lakṣmīpati, a bullet at this time caused a deep wound in the leg of the elephant of Gajdi Khan. This compelled him to retreat immediately. The sound of the trumpets etc. announcing Rafil Qader's son king proved ominous. So in disgust, he gave up fighting. But he scolded Husain Ali Khan for this ingratitude towards the Emperor.

Some Kashmiri Soldier fought valiantly uptil the third prahar of the day i. e. till afternoon for the protection of the Emperor. Husain Ali Khan also dissuaded them from fighting on the ground that the King had already abdicaed and a new King had also been enthroned.

---

(1) Despaired of his life, Farruk-Siyār wrote a pathetic letter to Ajita Siṃha. But this was of no avail then. Ajita Siṃha, it is stated, sent it on to Ābdullāh.

(2) These Southern Indian Soldeirs appear to have been molested even by women. They were killed like cats or dogs. Even a frown of a shop-keeper was enough to make them surrender their arms. At once they stood on one leg with a straw in their lips (Dant-tink) and cried for mercy "Nako, Nako" (i. e. do not, do not.)

Emperor made a prisoner.

In spite of all the insistence of Abdullah and his party, Farruk-Siyār refused to leave the inner apartments and be seated on the throne once again. The Emperor's guards at that time were the Qalmaq or Turki women servants, armed with sword and shield. It is known from other sources that outside the fort, Husain Ali Khan was engaged in consulting Ikhlas Khan, Sayyid Hashim Ali Khan and Mahammad Amin Khan. At that time there came an urgent note from Samsam-ud-daulah not to delay any longer, but to place some body else on the throne at once. Husain Ali Khān consequently sent an angry note to his brother to come out so that he might go in for settling the matters there. Maharaj Ajit Sinha again insisted the immediate deposition of Farruk-Siyar and enthronement of one of the imprisoned scions of the family of Taimur. The local tradition that as soon as the Imperial Family would be set aside, one of the Sayyid brothers would step in as ruler, did not prove true, probably because—none of the two brothers would yield to the other in this respect. From their Agra Fort dissensions, it is perfectly clear that they were quite jeālous of each other and would be united for self-interests only.

Hurried Emperor-making.

In a hurry, for fear of the rioters outside the fort, an exchange of the would-be ruler took place. Though the first choice fell upon Bidar Dil, son of Bidar Bakht, grandson of Alamgir, it so happened that he could not be found out in time, as his guards, and even his mother thought that he was being searched for immediate murder. So the Emperor-hunters turned towards the sons of Rafi-ush-shan from whom they picked up Rafi-ud-darjat. The Qutb-ul-mulk held him by one hand, and Ajita Siṃha by another and seated him on the jewelled peacock throne. The Rajah Ratan Chand, Rajah Bakht Mall and Dinda Khan, son of Jalal Khān entered under the supervision of Nazm-ud-din Ali Khan into the female apartments for finding out Farruk-Siyar. Women fought valiantly and courted death ; His mother, wife, daughter and many other women tried to shelter him ; they were elbowed aside. The Emperor was subjected to vile abuse and torture ; and under the orders of the Nawab, he was made blind on the spot. (1) He was then imprisoned in the room over the Tirpoliya. (2)

(1) In the Diwan-i-Khas. A needle used by the Emperor for applying Surma or collyrium to his eyes was used for blinding him.

(2) Or triple gate within the fortress. Here, on the same spot, Jahander Shah was killed under orders of Farruk-Siyār himself. On reaching this hole, the Emperor is said to have quoted the following lines :—

"Like a cypress in decay,
Such a king in such slavery".

Lakṣmipati records that when the son of Rafil-Qadar was enthroned, both the new Emperor and the Wazir partook of two breads ; they also drank water mixed with sugar. Abdullāh made an announcement at once to the effect that Farruk-Siyar, who was tired of Kingship, had abdicated and the son of Rafil-qader had consequently ascended the throne. Therefore, any further fighting must cease.

Last days of the Emperor.

It is stated that when Rafi-ud-darjat made an enquiry about his predecessor through a eunuch, Farruk-Siyār sent him these two lines :—

"Be not taken by the gardener's deceit, nightingale,
Ere this I, too, had my nest in this garden".

During his imprisonment, he also composed the following verse.

"A heart is made with wine, give it wine,
It is consumed with fire, give it fire.
To him who asks the state of my heart,
Breathe but a sigh, give that as answer".

The treatment meted out to the ex-Emperor brought tears even in the eyes of the Sayyid soldiers guarding him. He was not supplied water even for ablutions for four or five days together. Rotten food brought him diarrhoea ; he used to tear the only cloth he had to cleanse himself. He was not permitted to recite the Qurān which he know by heart ; for, this would mean relief for him.

The Sayyid-Brothers wanted Kotwals one after another to kill Farruk-Siyar, but they all refused to do so. So, they were compelled to resort to slow poison, supplying bitter and oversalted dishes and so on. [1] Ultimately, he was strangled to death on the 27-28th April, 1719, at night.

The City mourns

When the bier passed through the streets, the whole crowd which made all streets and lanes unpassable, wept and wailed bitterly. Women began to throw stones and bricks upon the servants and officers of the Sayyids, The bread and copper coins brought by these persons for distribution were rejected by the crowd.

Mahārāja Ajita Siṃha and his followers were subjected to worst censure and ridicule by the Delhi people. They had to reach the Darbar with great difficulty through out-of-the way routes.

---

(1) The Emperor is said to have made desperate attempts even in spite of his blindness. He tried to win over Abdullāh Khān Āfgan, a jailor, who, howeve, betrayed him totally. Then, Hashim Ali Khān Dakhini is reported to haver persuaded Husain Ali Khān to kill the Emperor without any further delay.

It would appear from Lakṣmīpati's work that Rājā Ajita Siṃha got hold of the Emperor in the Zenana and handed him over to the Sayyids. For this act of unkindness, he was beaten by the women of the city with their shoes :—

"त्यक्तमर्यादशैदानाम् उक्त्या यस्मात्त्वया धृतः। अतस्त्वं नासि राजन्यो वर्तसे यवनाधमः॥
इत्युक्त्वा पौरनारीभिः पादत्राणैस्तु ताड़नम्। कृतं फलं निषिद्धस्य द्रुतमत्रैव लभ्यते॥"

All the Mahammedans also censured him. Even the Sayyid-Brothers themselves thought that he was not fit for reigning over a realm.

Farruk-Siyar, the Man

Farruk-Siyar was a very weak King. He should have acted boldly and firmly so that the State could have been spared that lack of equillibrium which led him to be ridiculed even during his life-time.[1] It would appear that his mother harped too much upon his gratitude to the Sayyid Brothers who, by themselves, were not at all above criticism. In any case, there is no doubt that it is this lack of power to come to a quick decision that brought him disaster.

Farruk-Siyar's fondness for fine clothes and good horses is proverbial. Several thousand horses were kept underneath the room where he used to sleep. He could know from their sitting and rising which horse was moving and used at once to call, even when asleep in bed, both the groom and the horse by their names for enquiring. Once Md. Yar Khan, the Khan-saman or Lord Steward complained to Farruk-Siyar about the large quantities of grains issued to horses ; Farruk-Siyar at once directed that one gold coin a day must be spent for each horse and no complaint should reach him until that ration was exceeded.

Farruk-Siyar had many soldierly habits, and was an adept in wrestling, archery, etc. Throughout his reign, he used to go out hunting or shooting in the imperial preserves very often.

---

(1) This is amply proved by the parody of the distich on his coin. The original is :—

Sikka zad, az fazl-i-Haq, bar sim o zar,
Padshah-i-bahr-o-bar, Farruk-Siyar.

Thus runs the parody :—

Sikka-zad bar gandum o moth o mattar
Badshah-i-dana-kash, Farruk-Siyar.

Whereas the original meant "Coins struck on silver and gold, by Farruk-Siyar, Emperor of Land and Sea", the parody meant "Coins struck on wheat, lentils and peas, the grain-gathering Emperor, Farruk-Siyar".

The Emperor's Family-members.

In Lakṣmīpati's work itself, there are references to two father-in-laws of Farruk-Siyar viz. Ajit Sinha of Rathor and Sadat Khān. Of these two, one constantly plotted against him and the other died valiantly for him. Sadat Khan, over 80 years of age, was wounded on the day of the Emperor's deposition and succumbed to these injuries two or three days later. The name of the Rathor Princess was Rai Indar Kunwar and that of the daughter of Sadat Khan, Fakhr-un-nissa Begam. On the 16th July, 1719, widowed Rai Indar Kunwar went back to her father's territory with the whole of her property. The daughter of the hill-rajah of Kashtwar entered Farruk-Siyār's harem on the 17th July, 1717.

Lakṣmīpati in his work states categorically that Farruk-siyar became impotent as a result of an operation by Hamilton and also, that he adopted Qilich Khan's son. He underwent this operation during the sixth year of his reign. According to some chronicles, his marriage with the Rathor Princess was consummated after recovery from his illness. In any case, it is a fact that though he was blest with two sons, both of them died within a few months of their birth. His only surviviug issue was a daughter, Badshah Begum by the daughter of Sadat Khan. Badshah Begam was married to Mahammad Shah in 1720-21 A. D. and became known as "Malik-uj-jamani" or "Queen of the Age".

Sad End of Farruk-Siyar.

Farruk-Siyar is reported to have been the most handsome of all Moghul rulers of Delhi. He was also a man of charitable disposition which made him popular to many. His inherent weakness was the real trouble with him as stated before, and he could not take any decision and always oscillated even after an action had been taken in right earnest. This is indeed unpardonable for a ruler. His duplicity is also unpardonable. That is why no noble could ever depend upon him. There is no doubt that the Emperor brought about his own doom, though it must also be admitted at the same time that the Sayyid-Brothers cannot escape censure. Their business was to place one head against the other and crush both of them at the same time for their own advantage. Nor were they men of character. Both the brothers had no concord between themselves. Even in spite of many follies and mistakes, the Emperor, on accout of his inherent prestige, had many supporters. If he were a bit tactful, the Sayyid Brothers would not have been able to stand up against him in the least. An open-minded critic is also bound to remember the sins Farruk-Siyar incurred by most cruelly killing Jahandar Shah, even whose name also was removed from imperial chronicles and by making a number of princes blind for fear of losing the empire. In politics, some foul game is probably permissible. One would however, shudder at the penalty Farruk-Siyar had to pay for all his misdeeds. In any case, it must be admitted that he reaped the harvest of his own sowing though some of his predecessors escaped this ill fate on account of their other sterling qualities or for some other reasons that remain in many cases unaccounted for.

लक्ष्मीपति-विरचितं

नृपतिनोतिगर्भित-वृत्तम्

डक्टरश्रीयतीन्द्रविमलचतुर्धुरीणेन संशोधितम्

ॐ श्रीमहागणपतये नमः

पृथ्वीं शासति कूर्मोद्रौ श्रीजगच्चन्द्रराजनि ।
पृथिवीनाथनिखिल-लक्षणैश्च सुलक्षिते ॥
लक्ष्मीपति-द्विजाग्र्येण वृत्तान्तो मन्त्रिभूपयोः ।
लिख्यते निजशेमुष्या शक्रप्रस्थ-समुद्भवः ॥
सर्वेषां भूमिपालानामुपदेशाय शोभनः ।
अनयध्वंसको नीतिगर्भितो बुद्धिपूर्वकः ॥
अगर्वि (१) यवनानां तु भाषायाः समुदीरम् ।
वेजर्द (२) मस्ति चास्माकं तथाप्यात्मकृतस्य तु ॥
ग्रन्थस्य पुष्टये तेषां भाषापि लिख्यते क्वचित् ।
हिताय स्वस्य किं लोकैः क्रि············ ॥
औरंगजेवभूमीन्द्रतनयस्य तु नन्दने ।
मौजदीनाभिधे (३) भूपे शक्रप्रस्थे स्थिते सति ॥
नीतिज्ञे युद्धकुशले दुष्टामात्यविमर्दके ।
भयभीतैस्तु शयदैर्गतं पाटलिपुत्रकम् ॥
द्रुतं भूमीन्द्रभ्रातृव्यं द्रष्टुमात्महिताय तु ।
अजमदीनतनयः फर्कसाहाभिधस्तु तैः ॥
संदृष्टस्तत्र भूमीशलक्षणैस्तु सुलक्षितः ।
अभिवाद्य तु तं तत्र स्थितं भयविवर्जितैः ॥ ६

अवदुल्लाभिधस्तेषां मुख्यभूतस्तु यः स्थितः ।
तेनोक्तं तस्य निकटे तत्कालसदृशं वचः ॥
समर्थो नाजमो (४) यस्तु पितृव्यापादकं नहि ।
व्यापादयति तस्याशु धर्मः कीर्त्तिसमन्वितः ॥
क्षयं याति यतस्तस्मात् समर्थेनात्मजेन तु ।
तातव्यापादकः कामं व्यापाद्यः सर्वभावतः ॥
तातव्यापादकं हन्तुं यो न करोति यत्नकम् ।
स जीवन्नेव मृतको देहान्ते जायते खरः ॥
तातव्यापादकं हन्तुं जायते यस्य वै घृणा ।
असंशयं स विद्वद्भिर्ज्ञातव्यो जारजातकः ॥
समर्थो यस्तु तातस्य हन्तारं हन्ति वै नहि ।
हन्तुमिच्छति तं वज्रपाणिर्गीर्वाण-वन्दितः ॥
अश्वत्थाम्ना स्वयं पूर्वं तात (५) हन्ता न किं हतः ।
धृष्टदुम्नः यदा (?) रात्रौ पशुमारतया द्रुतम् ॥
पराशरेण किं पूर्वं स्वतातानिष्टकारकाः ।
न हता राक्षसाः क्रूराः स्वस्य चानृण्यहेतवे ॥
हिन्दुकानां यथा श्राद्धात् पितृतृप्तिः प्रजायते ।
यवनानां तथा तातहन्तुर्व्यापादनेन तु ॥ १८

---

* This MS. No. 3986 of India Office Library, London. is dated 1800 Samvat i.e. 1742—43 A. D.

(१) اگر। यद्यपि। (२) वेजर्दस्तु निषिद्धं स्यात्। (3) Muizzuddin or Jahandar Shah, eldest son of Bahadur Shah. (४) नाजमस्तु भवेत् पुत्रे। (५) द्रोण।

मौजदीनो न यावत्तु त्वया संहन्यते प्रभो ।
पितृव्यर्णात्तव निर्मुक्तिस्तावन्नैव प्रजायते ॥
इत्याकर्ण्य वचस्तस्य फर्कसाहेन तं प्रति ।
कथितं वचनं चेदं तत्कालसदृशं स्वयम् ॥
मौजदीनोऽस्ति भूमीन्द्रो बलवान् राजवन्दितः ।
अहं तस्यास्मि भ्रातृव्यो बलहीनो निरन्तरम् ॥
यावत्तेन ममोपेक्षा विहितास्ति कृपाधिया ।
जीवनं जायते तावन् मम तेन यदा स्वयम् ॥
चिन्तनं क्रूरभावेन कर्तव्यं तत्क्षणे मम ।
भविष्यति न सन्देहो निधनं निर्धनस्य मे ॥
शशकस्य यथा नास्ति योद्धुं सिंहेन वै समम् ।
अधिकारस्तथा नास्ति मम तेन समं रणे ॥
अजीमो(१) येन मत्तातो द्रुतं लाभपुरे रणे ।
हतोऽस्ति बलसंपूर्णस्तेन साकं मया कथम् ।
योद्धव्यं बलहीनेन सामग्रीरहितेन च ॥
रफीलो(२) मम तातस्य भ्राता येनान्तकं प्रति ।
प्रहितोऽस्ति कथं युद्धं कार्यं तेन समं मया ॥
सुरत्राणपदारूढः कवचेन तु संयुतः ।
अख्तरो येन विप्राणो विहितः क्षणमात्रतः ॥
तेन साकं कथं कार्यः संगरो(३) बालवन्मया ।
मार्तण्डोदयकाले तु खद्योतस्य न शोभते ।
यथोद्द्योतस्तथा तेन समं युद्धं ममापि वै ॥
तस्मात्तूष्णीं त्वया स्थेयं कञ्चित् कालं यथासुखम् ।
स्थित्वात्र गेहवच्चान्नं भोक्तव्यं बन्धुभिः सह ॥ ३०

एवमाकर्ण्य वचनं फर्कसाहस्य धीमतः ।
अबदुल्लेन कथितं वचनं समयोचितम् ॥
समानेन समानस्य हननं संविधीयते ।
एवं नैवास्ति नियमो दुर्बलोऽपि बलान्वितम् ॥
हन्ति रामेण न हतो रावणः किं बलान्वितः ।
एकोऽपि बुद्धिसंपन्नो विक्रमेण समन्वितः ॥
अनीकिनीपतिं जेतुं समर्थो जायते क्वचित् ॥
प्रह्लादपुत्रतनयो बलिर्बलसमन्वितः ।
पुरा देवेशतां प्राप्तो वामनेन न वञ्चितः(४) ॥
जामदग्न्येन(५) किं पूर्वं कार्तवीर्यो नृपोत्तमः ।
एकाकिना रणे सेनासहितो घातितो न [किम् ? हि]॥
एकोऽप्यदृष्टवशतः पृतनासहितं नृपम् ।
व्यापादयति वै क्षिप्रं तस्मात्त्वं सुस्थिरो भव ॥
मर्कटानां बलं लब्ध्वा राघवेण तु रावणः ।
निहतः संस्थितः पूर्वं यथा त्वं जहि तं नृपम् ।
अस्माकं बलमासाद्य विचारं कुरु मा प्रभो ॥
सुग्रीवं मर्कटाधीशं लब्ध्वा रामेण रावणः ।
यथा हतः स्थितः पूर्वं मां लब्ध्वा मौजदीनकम् ।
जहि सन्देहमुत्सृज्य कातर्यं न समाश्रय ॥
अमन्दं(६) प्राप्य नीतिज्ञं करिमं(७)यो न हिंसति(?) ।
तस्मै संजायते क्रुद्धा मृड(८)भार्या बलीयसी ॥
एकेन किल कृष्णेन कंसः स्वाग्रजघातकः ।
न घातितोऽस्ति किं पूर्वमनेकैः परिवारितः ॥ ४२

---

(1) Azim-us-shan, second son of Muazzem or Bahadur Shah and grand-son of Aurangzeb. (2) Rafi-ul-qadr, son of Bahadur Shah, created Rafi-us-shan.

(3) Ms. संगरम् । (४) किमित्यर्थः । (५) परशुरामेण । (६) स्यादमन्दस्तु मन्त्रिणि । (७) रिपौ तु करिमो भवेत् । (८) Ms. मृदु ।

मौजदीनेन त्वत्तातो घातितोऽस्ति यथा बलात् ।
तथा त्वदग्रजश्चापि(१) घातितोऽस्ति पलायितः ॥
न्यस्तशस्त्रास्तथा बाला रणतस्तु पलायिताः ।
तृणवक्त्रा न केनापि हन्यन्ते धरणीतले ॥
मौजदीननरेन्द्रेण न्यस्तशस्त्रस्त्वदग्रजः ।
पलायितो हतश्चास्ति संग्रामधरणीतटात् ॥
जारकाचस्य(२) दलकस्त्वया चेन्न विहन्यते ।
मौजदीनः किमस्माभिः कर्तव्यमत्र तेऽन्तिके ॥
सिंहाः पृथ्वीशतनयाः सौभ्रात्रं स्थापयन्ति न ।
पिनारा मनहाश्चैव(३) सौभ्रात्रं स्थापयन्त्यपि ॥
अजितेन हतो नास्ति भ्राता किं बलदर्पितः ।
जयसिंहेन किं गेहे रुद्धो नास्ति स्वबान्धवः ॥
कंसेन जनकः स्वस्य किं न दत्तः स्थितः पुरा ।
कारागृहे स्वयं कर्तुं राज्यमुत्तमसौख्यदम् ॥
साहजाहो न किं पूर्वमौरङ्गेण निवेशितः ।
कारागेहे स्वयं कर्तुं राज्यं स्वर्गोपमं शुभम् ॥
मौजदीन-नरेन्द्रस्य वैरस्याकरणेन तु ।
भव मा ग्रामसिंहस्त्वं करे तु करवालकम् ।
कृत्वा हत्वा तु तं क्षिप्रं नरेन्द्रतनयो भव ॥
जातस्य मरणं चास्ति जन्म चास्ति मृतस्य तु ।
जातत्वेन यथापायशङ्कास्ति तव संप्रति ।
तथैव चास्ति तस्यापि तस्मात्त्वं सुस्थिरो भव ॥
सर्वेषामेव संग्रामे मरणं न हि जायते ।
गृहेऽपि जीवनं नित्यं सर्वेषां नहि जायते ॥
यदि जायेत सर्वेषां मरणं रणभूमिषु ।
तर्हि कस्यापि विजयो न स्यात् कीर्तिविवर्धकः ॥
गेहे निलीय मरणापेक्षया संगरे मृतिः ।
वर्तते राजपुत्राणां वरिष्ठा सर्वभावतः ॥ ५६

सुतीर्थे मरणाद्विप्रो यथा संयाति सद्गतिम् ।
धारातीर्थे मृतिं लब्ध्वा नरेन्द्रतनयस्तथा ॥
स्थित्वात्र मौजदीनस्य मा कारामन्दिरे विश ।
विजित्य समरे तं तु सार्वभौमो भव द्रुतम् ॥
न सुरत्राणता चास्ति सामान्या नृपनन्दन ।
प्रार्थ्यमानाऽमरैर्नित्यं स्वर्गादपि विलक्षणा ॥
वर्तते विविधं पुण्यमनेकजन्मसंचितम् ।
येषां भवंति ते सार्वभौमा भूमिपनन्दन ॥
सार्वभौमकुले जन्म तवास्त्येव न संशयः ।
अहं च ते सहायोऽस्मि व्यसनी चास्ति ते रिपुः ॥
तस्मादुत्तिष्ठ समरं कर्तुं त्वं न च संचर ।
संकोचं व्यसनी शत्रुर्भाग्येनैव प्रलभ्यते ॥
अदाता कातरश्चैव मौजदीनो न यद्यपि ।
अस्ति स्त्रैणोस्ति यस्माद्वै वर्तते व्यसनी ह्यतः ॥
किं द्यूतव्यसनासक्तो नलो राज्यान्न(४) विच्युतः ।
स्त्र्यासक्तो न च्युतो राज्याद्ययातिः किं धरेश्वरः ॥
मैरेयपानतो नाशं न गतं किं यदोः कुलम् ।
प्रभासे माधवस्याग्रे भूभृज्जातभयंकरम् ॥
मृगयाव्यसनाच्छापो न प्राप्तः किं पुरा विभो ।
रामतातेन निर्वाणपुरीनाथेन साधुना ॥
ललनालालनादन्यन् मौजदीनस्य सांप्रतम् ।
वर्तते न यतस्तस्मादस्ति वै व्यसनी हि सः ॥
पातसाहेन सततं भूतिकामेन सर्वथा ।
व्यसनार्णवमध्ये तु न मक्तव्यं (?) कदापि वै ॥
व्यसनार्णवसंमग्नं पातसाहं विचक्षणाः ।
शक्नुवन्ति न चोद्धर्तुममात्याः कृतबुद्धयः ॥
पातसाहेन तावत्तु साहिवी (५) संविधीयते । ७०

(1) i. e. Md. Karim. He was killed by Zulfiqar Khan under Jahandar Shah's order in his own quarters. He got no food even after three days' supplication; nor even water. In this state, his head was severed from his body.

(२) जारकाचस्तु जनके । (३) कर्णावले पिनारः स्याद् ब्राह्मणो मनहो भवेत् । (४) राज्येन । (५) صاحبی देव्यां तु साहिवी भवेत् ।

यावद् व्यसनभुजगदंशस्तस्मिन्न जायते ॥
यावद्व्यसनचारेण(१) सन्नतो(२) नावलोक्यते।
तावत् करोतु नितरां शूरं (३) वै सर्वभावतः॥
ऋणादप्यधिकं मन्ये व्यसनं धरणीभृताम्।
ऋणं संक्षीयते द्रव्याद्व्यसनं वर्धते ततः॥
काष्ठैर्वृद्धिं समासाद्य तेषां तु कुरुते क्षयम्।
वह्निस्तथा(४) व्यसनिनां व्यसनं कुरुते तथा॥
वर्तते व्यसनैर्युक्तो यस्मादालमनन्दनः।
तस्मात्तस्य जयश्चास्ति सुलभो नृपनन्दन॥
करिमं(५) व्यसनैर्युक्तं करगं कुरुते न यः।
करिमस्यैव करगो जायते स तु मानवः॥
मदुक्तं मन्यते मिथ्या त्वया चेत् सर्वभावतः।
तर्हि स्व मादरं(६) पृच्छ सादरं प्रीतिपूर्वकम्॥
अस्ति यद्यपि रामाणां बुद्धिः प्रलयकारिणी।
तथापि मातृबुद्धिस्तु संविधेया सुतेन तु॥
अन्येषां भयदं व्याघ्रीक्षीरं तत्तनयस्य न।
यथास्ति मातृबुद्धिर्न तनयस्य क्षयंकरी॥
तत्कालं तज्जनन्या तु वाक्यमुक्त्वा तु प्रेषितम्।
अवरोधस्थया भव्यं श्रोत्रसन्तोषदायकम्॥
शूरं विना क्षितौ सौख्यं केनापि न हि लभ्यते।
मार्तण्डास्तत्वकाले तु किमालोकः प्रजायते॥
वेहूसेन(७) यथा रूपं दृश्यते न घटस्थितम्।
पर्वोक्तं(८) भाग्यशून्येन तथा वाक्यं न मन्यते॥
मन्दिरे जायते मृत्युर्वनेऽपि किल जीवनम्।
अदृष्टवशतो नृणां तस्मादुद्यमवान् भवेत्॥ ८२

अमंद(९) मुद्यमोपेतमाप्य यो विमुखो भवेत्।
उद्यमे स तु कंवक्तो(१०) ज्ञातव्यो जगतीतले॥
पारवाद्यु(११) दयाद् वृद्धिं मज्जनो(१२)लभते यथा।
तथा चामन्दसंबंधाद् बुद्धिमाप्नोति सन्नतः॥
सचिवोक्तं न यो राजा शृणुते वचनं शुभम्।
न तस्य जायते वृद्धिः कदाचिदवनीतले॥
सचिवोक्तं हितं वाक्यं विमृश्य कुरुते हि यः।
स राजा समरेऽवश्यं जयमाप्नोति शोभनम्॥
सचिवास्त्रिविधाः सन्ति राजानश्चापि वै तथा।
उत्तमादिप्रभेदेन नितरां जगतीतले॥
मनसापि नृपद्रोहं न करोति करोति च।
यावज्जीवं हितं राज्ञः सोत्तमः(?) सचिवः स्मृतः॥
अपराधं विना राज्ञा दण्डितोऽपि स्वमानसे।
अनिष्टचिन्तनं यो न कुरुते सोऽपि चोत्तमः॥
अनिमित्तं तु संक्रुद्धं सन्नतं प्रविलोक्य तु।
विरुद्धो जायते यस्तु मध्यमः स स्मृतस्तु वै॥
अविरुद्धे नृपे यस्तु विरुद्धः संप्रजायते।
सोऽधमः संस्मृतो मन्त्री राजविध्वंसकारकः॥
उद्योगं कारयित्वादौ पश्चादुद्योगवर्जितः।
जायते यस्तु सचिवः सोऽपि वै मध्यमः स्मृतः॥
पितृवत् पालनं यस्तु प्रजायाः कुरुते भृशम्।
सन्नतः सोत्तमः सर्वैर्बोद्धव्यो जगतीतले॥
प्रजाभ्यः करमादाय प्रजाभ्यो न ददाति यः।
किंचित् स मध्यमः प्रोक्तः सन्नतस्तु(१३) सरोजकैः(१४)।
८४

(१) व्याघ्रेण। (२) राजा। (३) धर्मं। भवेच्छूरस्तु वै धर्मे। (४) यथेत्युचितः पाठः। (५) रिपौ तु करिगो भवेत्। (६) مادر मादरो मातरि स्मृतः। (७) بیہوش वेहूसस्तु भवेदन्धे। (८) आप्ते पर्व समाख्यातम्। (९) मन्त्रिणम्। (१०) کمبخت भाग्यहीनः। (११) पारवादी भवेच्चन्द्रे। (१२) मज्जनस्तु सरित्पतौ। (१३) सन्नतस्तु भवेद् राज्ञि। (१४) पण्डितैः।

प्रजाया रक्षणं यो न करोति करमेव हि ।
गृह्णात्युग्रं स नो राजा ज्ञातव्यस्त्वधमो नृभिः ॥
यथा संधार्यते पूर्ण-दलहः(१) शिरसा स्त्रिया ।
सचिवेन तथा राज्यं धार्यते बुद्धिशालिना ॥
कूपांतसंस्थसलिलमादत्ते सगुणो घटः ।
यथा तथैव सचिवो भूपमानससंस्थितम् ॥
गुणशून्यो न गृह्णाति घटः कूपस्थसंवरम् ।
यथा तथामात्यशून्यो राज्यं राजापि शोभनम् ॥
सुस्थिरं मम राज्यं स्यादिति यस्यास्ति शेमुषी(२) ।
सचिवस्तेन कर्तव्यो नितरां बुद्धिदक्षिणः ॥
केनापि धरणीपृष्ठे कुबुद्धिः सचिवो न हि ।
विधातव्यः सुखं लब्धुं राज्ञा वा राजजेन वा ॥
असावधाननृपतिं सावधानं करोति यः ।
तस्यामात्यस्य सम्मानो न कार्यः केन भूभुजा ॥
सावधानस्य नृपतेर्बुद्धिभ्रंशं करोति यः ।
तस्यामात्यस्य वदनं द्रष्टव्यं न च कैरपि ॥
यथा चन्दनसंसर्गाद्भवन्ति चन्दनद्रुमाः ।
मलये निखिलास्तद्वदमात्यस्य तु संगतः ।
मदमत्ताश्च राजानो जायन्ते विनयान्विताः ॥
तुचना(३) वाससम्बन्धाचन्द्रकान्तो यथा जलम् ।
संप्राप्नोति तथा राजा सचिवादमलं यशः ॥
अप(४) आतश(५) आवरा(६) यथा गवः(७) प्रजायते ।
तथा सचिवसंबंधाद्बुद्धिमान् जायते नृपः ॥
यशोहिमकरो यस्य विस्तीर्णोऽस्ति महीपतेः ।
करिमास्तस्य भयतः संत्यजन्ति निजं स्थलम् ॥ १०६

यशःशीतांशुविंबस्तु जगत्यां यस्य जृम्भते ।
तस्येह जायते शर्म परत्र चोत्तमं सुखम् ॥
अकीर्तिर्यस्य नृपतेर्जायते क्षितिमण्डले ।
भिस्त(८)संदर्शनं तस्य दुर्लभं चास्ति पुण्यजम् ॥
धनहीनस्य निकटे रत्नविक्रेतृदर्शिनम् ।
रत्नं याति यथा दूरे तथा कीर्तिविवर्जितात् ।
मन्त्रिरत्नानि गच्छन्ति दूरं धरणिपालकात् ॥
कुमन्त्री यस्य नृपतेर्निकटे कुरुते स्थितिम् ।
तस्यान्तिके न तिष्ठन्ति पण्डिता नृपमानिताः ॥
सरोजा(९) यस्य नृपतेर्न संतिष्ठन्ति (?) सन्निधौ ।
विफलं तस्य ज्ञातव्यं जीवितं तु विचक्षणैः ॥
सज्जनोऽपि यथोन्मत्तो जायते मद्यपानतः ।
तथा सरोजसंसर्गान्मूर्खोऽपि जायते बुधः ॥
यस्य संसर्गतो मूर्खो जायते सुविचक्षणः ।
तं बुधं को न नृपतिः स्थापयेदन्तिके स्वके ॥
आफताव(१०)योगतो वर्फ(११)विलयो जायते यथा ।
तथा सरोजसम्बन्धाज्जडता प्रविलीयते ॥
स्थापनीयाः सदा मर्दाः(१२) स्वसंगे न तु कातराः ।
पातसाहेन विजयमिच्छता रणलोलुपाः ॥
दृष्टयुद्धोऽपि शूरोऽपि कातराणां तु संगतः ।
कातरो जायते यस्मात्तस्मात्तान् परिवर्जयेत् ॥
मानसस्य तु संबधाद्वायसो हंसतां यथा ।
प्राप्नोत्यशूरसंसर्गात्तथा वीरोऽप्यशूरताम् ॥
शतपत्रं यथा चन्द्रसङ्गाद्भवति मुद्रितम् ।
तथा कातरसंसर्गान्मर्दस्त्यजति मर्दताम् (१३) ॥११८

(१) घटः । दलहस्तु घटे भवेत् । (२) शेमुषी—··· । (३) अमृतकर । (४) آبی जलम् । (५) آتش वह्निः । ६—(७) ابر धूमः । ८··· । (९) पण्डिते सरोजः स्यात् । (१०) सूर्यः—आफतावस्तु भवेत् सूर्ये । (११) हिम—हिमे वर्फः निगद्यते । (१२) शूराः । (शूरे मर्दं مرد समुद्दिष्टं) । (१३) शूरतां ।

यथा सलिलसंसर्गात् कूजा(१) शर्द(२) प्रजायते ।
तथा कातरसंसर्गाच्छूरो भवति कातरः ॥
न क्षोभयतु मच्चित्तं सदा कातर्य-वायसः ।
इति चिन्तयता त्याज्या कातराणां तु सङ्गतिः ॥
मम त्रिष्वपि लोकेषु नेकनामी(३) विसर्पतु ।
इति चिन्तयता कार्या शूराणामेव संगतिः ॥
शठो मन्त्री न कर्तव्यः पातसाहेन जातुचित् ।
ऋजुरेव विधातव्यः सर्वदा सुखमिच्छता ॥
गुडो मधुरतां (४) नैव यथा संत्यजति क्वचित् ।
शठो मन्त्री तथा शाठ्यं न संत्यजति कुत्रचित् ॥
व्यथितोऽपि द्विरुक्तोऽपि सन्मन्त्री न जहाति वै ।
ऋजुतां जायते तिक्ता मुनक्का किं क्वचिच्छुभा ॥
हितं प्रियं च वक्तव्यममात्येन नृपान्तिके ।
अहितं यत्र नृपतेः स्याद्वाच्यं तत्र विप्रियम् ॥
हितेऽपि भूपविहिते यो मन्त्री विप्रियं स्वयम् ।
वक्ति कार्ये स वै मन्त्री शत्रुतो नातिरिच्यते ॥
अहितं यत्र नृपतेर्जायते तत्र विप्रियम् ।
वक्ति यो गुरुतो मन्त्री विभिन्नो नैव जायते ॥
मन्त्री यो राजकार्यं तु भवितुं न ददाति वै ।
स मन्त्री भूमिपालेन त्यक्तव्यः सर्वभावतः ॥
स्वकार्यघातकं यो वै न संत्यजति पार्थिवः ।
सचिवं तस्य विध्वंसस्तस्मादेव प्रजायते ॥
स्वकार्यभञ्जको मन्त्री जारिणीप्रतिमो नृपैः ।
स्थापनीयः स्वनाशाय न क्वचिन्निजसन्निधौ ॥
एवं तन्मादर(५) वचो निशाम्य तेन तां प्रति ।
उक्त्वा संप्रेषितं वाक्यं तत्कालसदृशं प्रियम ॥ १३१
मत्स्वामिमान्ये त्वत्पुत्रो मद्बुद्ध्या राजराजताम् ।

अचिरेणैव कालेन गमिष्यति न संशयः ॥
मौजदीन-बलाम्भोधिर्मद्बुद्धिवडवानलम् ।
संप्राप्य सत्वरं राज्ञि भस्मसात् संभविष्यति ॥
इदानीं स्वमुखाद्राज्ञि महती जायते त्रपा ।
स्वबुद्धिवीर्यप्रागल्भ्यवर्णने मम यद्यपि ॥
तथापि मौजदीनीय-संग्रामनिकषोपले ।
मद्बुद्धि-स्वर्णमुद्राया भविष्यति परीक्षणम् ॥
नवावस्ये(६) दृशं वाक्यं श्रुत्वा राज्ञा [ज्ञया:]
स्वकः सुतः ।
समाहूतोऽन्तिके स्वस्य सुकुमारोऽतिसुन्दरः ।
तदन्तिके तु कथितं स्मितपूर्वमिदं वचः ॥
जीव राजीवनयन स्वजन्मदविघातकम् ।
मौजदीनं जीवहीनं कुरु संप्रति सत्वरम् ॥
गत्वरं विग्रहं प्राप्य सत्वरं तातनिष्कृतिम् ।
न यः करोति किं तेन सूनुना पशुरूपिणा ॥
निग्रहं कुरुते यस्तु तातनिग्राहकस्य तु ।
अनुग्रहं प्रकुर्वन्ति तस्मिन्देवाः सवासवाः ॥
आगोहीनं नृपं ये तु द्विषन्ति तेषु चामराः ।
प्रतिकूलाः प्रजायन्ते तं च रक्षन्ति पुत्रवत् ॥
आगोयुक्तनृपद्वेषकारकं पुत्रवत् सुराः ।
पालयन्ति नरं नित्यं सवाव(७) पालनोत् सुकाः ॥
मौजदीनेन पिदर(८)हतोऽस्ति तव संप्रति ।
सोऽस्ति ते तातहन्तृत्वाच्छत्रुरत्र न संशयः ॥
शत्रुव्यापादने शत्रोर्न दोषः कोऽपि वर्तते ।
किं शर्वै(९)र्न हि वध्यन्ते मर्दो(१०)मर्दैस्तु ते न किम् ॥
तातप्राणवियोक्तारं विप्राणं कुरुते न यः ।
तेन वीरप्रसूर्माता जायते न धरातले ॥ १४४

(१) کوزه घटः । (२) سرد शीतलं (शर्दस्तु शीतले भवेत्) (३) यशः । (नेकनामी तु यशसि)। (४) Ms. मधुरिमां । (५) माता । (मादरो मातरि स्मृतम्)। (६) मुख्यमुद्गलस्य । (अर्थात् प्रधानभूपतेः) । (७) धर्मेण । (सवावस्तु भवेद्धर्मे)। (८) पिता । (भवेत्ताते तु पिदरः)। (९) देवताभिः । (देवे शर्व इति प्रोक्तम्)। (१०) दैत्याः ।

सर्वासामेव नारीणां नाजमा(१) जगतीतले ।
जायन्ते किन्न मशका उदुम्बरफलोदरे ॥
कुलावतंसाः कासाञ्चिज्जायन्ते भुवि नन्दनाः ।
त्वद्विधाः पितृहन्तॄणां घातकाः सर्प-सन्निभाः ॥
पुत्र त्वं पितृहन्तारं हत्वा रामसमो भव ।
स्थित्वाऽत्र पत मा तस्य सत्वरं वन्दिमन्दिरम् ॥
त्वां तातप्राणद्विरदग्राहको मौजदीनकः ।
यावन्न ग्रसति क्षिप्रं तावत्त्वं जहि तं स्वयम् ॥
श्रीकृष्णबलमासाद्य भीमेन मागधो यथा ।
हतः स्थितः पुरा चैनमाश्रित्य जहि त्वं रिपुम् ॥
सहायं वासुदेवस्य लब्ध्वा पार्थेन किं नहि ।
हतोऽस्ति सूर्यतनयः कर्णो रामेण पाठितः ॥
वीराः सहायमासाद्य दर्शयन्ति स्वपौरुषम् ।
हुताशस्तृणमासाद्य भस्मसात् कुरुते वनम् ॥
त्वमेनमवदुल्लाख्यं सङ्गे नीत्वा स्वपौरुषम् ।
संदर्शय यथाकामं कामं मत्तोषदायकम् ॥
कामारिणा यथा कामः पुरा संदाहितः स्थितः ।
मौजदीनं तथा त्वं तु नय सूर्यात्मजत्त्वयम् ॥
औजदीजनकं मौजदीनं रतिसमुत्सुकम् ।
हत्वा कामारिसदृशो भव मा कामसन्निभः ॥
इति वाक्यं समाकर्ण्य जनन्या नृपनन्दनः ।
अवदुल्लान्तिके शीघ्रं समायातो यथासुखम् ।
आगत्य तेन कथितं वाक्यं तस्यान्तिके स्वयम् ॥
महादेवस्य नगरीं प्राप्य पापानि देहिनाम् ।
यथा निर्यान्ति त्वत्सङ्गात् कातर्यं निर्गतं मम ॥
अतः परं त्वया शीघ्रं मौजदीनस्य पत्तनम् ।
दर्शनीयं द्रुतं मह्यं विलम्बो न विधीयताम् ॥ १५७

इति तस्य निदेशं तु संप्राप्य तेन तत्क्षणे ।
युद्धोपकरणानां तु संग्रहे विहितोद्यमः ॥
अद्य यो मम साहाय्यं विधास्यं [स्य] ति यथाविधि ।
शरीरेण धनैर्वापि तस्योत्कर्षो मया पुनः ।
कारणीयः प्रभोर्द्वारा सत्यमेतद्ब्रवीम्यहम् ॥
अजमदीनतनयः फर्कसाहाभिधोऽधुना ।
सङ्गरं मौजदीनेन समं संकर्तुमिच्छति ॥
अहं तस्याज्ञया योद्धृन् स्थापयित्वा यथागतान् (?) ।
गृहीत्वा वेतनं सम्यक् योद्धारस्त्वविलम्बतः ।
युद्धोपकरणैर्युक्ताः समायान्तु मदन्तिके ॥
अवदुल्लेन तत्कालं पटहध्वनि-पूर्वकम् ।
एवमुद्घोषितं वाक्यं पुरे पाटलिपुत्रके ॥
एवं तद्वचनं श्रुत्वा शोभनं तत्क्षणे द्रुतम् ।
पठानैश्चापि शयदैः सर्वदा समरोत्सुकैः ॥
तुरष्कै रोहिलाकैश्च युद्धोपकरणान्वितैः ।
आगतं तस्य निकटे नितरां रणदक्षिणैः ॥
आगतांस्तान् समालोक्य सुप्रसन्नेन चेतसा ।
फर्कसाहान्तिके गत्वा कथितं तेन तं प्रति ॥
वाहिनीं पश्य हे नाथ समाहूतां त्वदाज्ञया ।
एनां विधेहि प्रस्थानं युद्धाय कृतनिश्चयः ॥
प्रसन्नचेतसा युद्धं कर्तुं गच्छति यो नृपः ।
दस्त(२) नीलोफुरे(३) तस्य समायाति जयो द्रुतम् ॥
चुम्बकस्य मणेरग्रे तीक्ष्णलोहो यथा द्रुतम् ।
आयाति वीरनिकटे जयश्रीरपि शोभना ॥
जयलक्ष्मीः कराम्भोजे समायातु रणाङ्गणे ।
इति चिन्तयता त्याज्यं कातर्यं वीरगर्हितम् ॥
इति श्रुत्वा तु तद्वाक्यं तत्क्षणे तेन नेजुमी(४) ।
समाहूतोऽन्तिके स्वस्य सन्मुहूर्तस्य दायकः ॥ १७१

(१) पुत्राः । (२) دست हस्त । (हस्ते दस्त समाख्यातं) । (३) نیلوفر पद्मे । (पद्मे नीलफुरो भवेत्) । (४) نجومی मुहूर्तज्ञः । (मुहूर्तज्ञे तु नेजुमी) ।

तदन्तिके समायातः सोऽपि शीघ्रं तदाज्ञया ।
राजपुत्र चिरं जीव जय भूमण्डले सुखम् ॥
इत्युक्त्वा[क्तो ?] योजयित्वा तु करौ तं प्रति भाषितम् ।
मह्यं युद्धमुहूर्तं तु देयं शीघ्रं त्वयेति च ॥
इति तस्य निदेशेन तेन तं प्रति भाषितम् ।
मुहूर्तं युद्धयात्राया इदानीमेव वर्तते ।
अस्मिन्मुहूर्ते दोषोऽस्ति कोऽपि तत्रापि श्रूयताम् ॥
यैरेव युद्धप्रोत्साहो जनितोऽस्ति तव प्रभो ।
तैरेव कालभेदेन निग्राह्योऽस्ति भवान् द्रुतम् ॥
अस्मिन्मुहूर्ते प्रस्थानाद् यद् योग्यं तद्विधीयताम् ।
इति तद्वचनं श्रुत्वा कथितं तेन तं प्रति ॥
तद्भविष्यति चावश्यं यद्दैवः संविधास्यति ।
भवितव्यस्य विध्वंसो विधातुं केन शक्यते ॥
इत्युक्त्वा मुदमीं(१) स्मृत्वा प्रस्थानं विहितं स्वयम् ।
फर्कसाहेन युद्धार्थमवदुल्लादिभिः सह ॥
दृष्ट्वा तु पृतनां यान्तीं शोभनां चतुरङ्गिणीम् ।
तस्य तत्समये तत्रागत्य गौ कथितं मुखात् ।
केनचिद्[द ?] रवेशेन(२) हसित्वा प्रीतिपूर्वकम् ॥
त्वं कोऽसि यासि गौ कुत्र किमर्थं मम सन्निधौ ।
ब्रूह्यहं चापि कश्चास्मि विलम्बं न समाचर ॥
एवं तद्वचनं श्रुत्वा फर्कसाहेन तत्क्षणे ।
हासः संविहितः किञ्चित् कथितं न च तं प्रति॥१८२

क्रोधकाले हसन्तं तं विलोक्य स्मितपूर्वकम् ।
भाषितं वचनं चेदं तत्काले तेन तं प्रति ॥
योद्धुं संयासि त्वं चाद्य नाहंकारः प्रदृश्यते ।
त्वयि युद्धं कथं कार्यं त्वया तद्ब्रूहि मां प्रति ॥
साकलंदो(३) न यस्यास्ति करदस्य(४) न तेन तु ।
करिमो(५) निकटस्थोऽपि शस्त्रयुक्तो न हन्यते ॥
साकलंदयुतो योऽस्ति करिमं चकनै(६)रपि ।
करोति रणभूमौ स भृशं पामरवो(७)ज्झितम् ॥
पातसाहं त्वया जेतुं गम्यते त्वयि नास्ति गौ ।
अहंकारः कथं जेयो भवता पुत्तलात्मना ॥
हरफवहा(८)सामसरात्(९)साह(१०)शृङ्गेऽनुमीयते।
यथा तथैव क्रोधेन प्रतापश्चानुमीयते ॥
दरमेण (११) यथोदारो ह्यधस्तात् परहस्तकम् ।
करोति तद्वच्छूरोऽपि निस्त्रिंशेन रिपोः शिरः ॥
सरोजस्यान्तिके शोभां वेरोजो (१२) नैति वै यथा ।
जमीजूपं (१३) न शक्नोति संद्रष्टुं रजह (१४)स्तथा ॥
तस्मान्मद्वचनात्तिष्ठ मन्दिरे सर्वसुन्दरे ।
अवदुल्लस्य वचनात् संग्रामार्थं न वै गमः (?) ॥
सधमे(१५)वहन(१६)ज्ञानं कुरु मा सन्नतः(१७)कचित्।
वासलायां(१८)यथा कारकल(१९)ज्ञानं भ्रमात्मकम् ॥
सधमे वहनज्ञानं न तथास्ति सलमा (२०) त्मकम् ।
मुदमीं(२१) भज तावत्त्वं सधमो वहनान्वितः ॥१९३

---

(१) ईश्वरं । (ईश्वरे मुदमी भवेत्)। (२) (यतौ तु दरवेशः स्यात्)। (३) अहङ्कारः । (साकलन्द-स्त्वहंकारे)। (४) मानवस्य । (५) शत्रुः । (६) नखरैः । (नखरे चकनो भवेत्)। (७) प्राण । (८) वह्नि । (९) धूमः । हरफवहा भवेद्वह्नौ, धूमे सामसरो भवेत्)। (१०) पर्वत । (साहस्तु पर्वते स्मृतः ।) (११) द्रव्येण । (१२) मूर्खः । (१३) शूरं । (भवेच्छूरे जमीजूपः । (१४) कातरः । (कातरे रजहो भवेत्)। (१५) देहे । (सधमस्तु भवेद्देहे) (१६) जीव । (जीवे वहनः कथ्यते)। (१७) राजा । (१८) रज्जौ । (वासला तु भवेद्रज्जौ)। (१९) सर्पं । (सर्पे कारकलो भवेत्)। (२०) भ्रम । (२१) ईश्वरं ।

यावदस्ति कचित् याति रथः सारथिवर्जितः(?)।
विजने वीजनो (१) येन ध्यातो नास्ति निरन्तरम्।
वृणुते तं न राज्यश्रीः पुण्यमात्रैकलभ्यका ॥
पदस्थितस्य नृपतेर्भंगाय यैस्तु चोद्यमः।
कार्यते तैः कथं त्वं हि स्थातुं देयश्च तत्पदे ॥
जारकाचेन (२) रहिताः सन्न [त] स्य तु नंदनाः।
विना सदरशिक्षां तु नाप्नुवन्ति कचित् सुखम् ॥
सादरः सदरो (३) क्तौ तु सन्नतस्य (४) तु नाजमः।
न जायते यतस्तस्माद्व्याकुलो जायते रणे ॥
उदारकरगं द्रव्यं यथा दुर्गतदुर्गतिम् ॥
क्षिणोति शूरहस्तस्थः सरहोपि (५) रणे रिपुम् ॥
न चायाति यथा द्रव्यं कृपणस्य गृहाद्बहिः।
सरहो न बहिःकोशात्तथा कातरपाणिगः ॥
तव चेद्यूद्धसामर्थ्यमस्ति तर्हि रिपुं प्रति।
व्रज भूपप्रकारेण समुन्नासपुरःसरम् ॥
सामर्थ्यं तव चेन्नास्ति तर्हि मागम मन्त्रिणः।
वचनात् समरं कर्तुं सत्वरं चारपुत्रवत् ॥
न जायते कचिद् युद्धं नृणां सामर्थ्यमन्तरा
विदधाति प्रकाशं किं जर्जसा(६) स्नेहमन्तरा।
न शोभते यथा काशी(७) नितरां योजनी(८) युतः।
कमायिलो(९) रणोद्योगयुक्तो भूमण्डले तथा ॥
न शोभते यथा काशः पारवादी विवर्जितः।
तथोद्योगकरो राजा प्रतापानलवर्जितः ॥ २०४

सूरमर्दो(१०)ज्झितः पावो(११)लघुतां याति वै यथा।
तथा सन्नतपुत्रस्तु रणे शौर्य्यविवर्जितः ॥
यस्तु वीरव (१२) संशून्यस्तेन मानीरवो (१३) नहि।
कारणीयो हि समरयात्रार्थं नृपसूनुना ॥
उक्त्वेथ [त्थ' ?] यवनयतिर्गतोऽन्यत्र द्रुतं स्वयम्।
कर्तुं भिक्षां न कुर्वन्ति विरक्ताः परसेवनम् ॥
वैश्वानरो यथा शीतहानिमाशु करोति वै।
तथोपदेशं कुर्वन्ति सज्जना : कपटोज्झिताः ॥
दमयानेन (१४) संस्पृष्टं न संत्यजति शीतताम्।
यथा हिमं तथा मूर्खो असंगादपि मूर्खताम् ॥
क्षीरं त्यक्त्वा यथाऽदत्ते विडालो मूषकं स्वयम्।
तथोपदेशमुत्सृज्य वैरोजो दुष्टवाक्यकम् ॥
यो वै विषधरप्रायै र्विषयै र्नास्ति बंधितः।
सोऽपि संमनुते वाक्यमाप्तोक्तं विप्रियं कचित् ॥
नितरां विषयासक्ताः सन्ति ये राजनन्दनाः।
आप्तोक्तं तैः कथं वाक्यं मन्तव्यं किल सुप्रियम् ॥
किर्किणा (१५) रम्नदाश्चैव (१६) बहवस्तत्र चागताः।
यवना युद्धकुशलास्तत्क्षणे बलसंयुताः ॥
वर्षाकाले यथा पूर्णा जलैर्भवति निम्नगा।
तथा तद्वाहिनी जाता सर्वतस्त्वागतैर्भटैः ॥
पूर्णां स्ववाहिनीं दृष्ट्वा फर्कसाहाभिधो नृपः। २१६

---

(१) परमात्मा। (परमात्मनि बीजनः)। (२) जनकेन। (३) माता। (४) राज्ञः। (५) करवालः। (करवाले तु सरहः)। (६) प्रदीपः। (जर्जसा प्रदीपे स्यात्)। (७) यतिः। (यतौ काशी निगद्यते)। (८) भार्य्या। (९) बलहीनः। (बलहीने कमायिलः)। (१०) पानीय०। (सूरमर्दस्तु पानीये)। (११) दुर्गः। (दुर्गे पावः समीरितः)। (१२) प्रताप०। (वीरवस्तु प्रतापे स्यात्)। (१३) दुन्दुभिः। (१४) श्रीसूर्येन। (श्रीसूर्ये दमयानः स्यात्)। (१५) गजारोही। (१६) अश्वारोही। (किर्किणस्तु गजारोहे, वाज्यारूढे तु रम्नदः)।

गजैरश्वैस्तथा चोष्ट्रैः पत्तिभिश्च समन्विताम् ।
सबलं मौजदीनं तु मेने वै स्वकरागतम् ॥
व्रजता तेन संदृष्टा महेशनगरी शुभा ।
मुक्तिदा गङ्गया युक्ता स्वर्गादपि वरिष्ठका ।
तां दृष्ट्वा तेन प्रणतिर्विहिता पापनाशिका ॥
यथा स्पर्शमणेर्योगात् सर्वं भवति काञ्चनम् ।
तथात्र मृत्वा सर्वेऽपि जायन्ते देहशून्यकाः ।
यतस्ततस्तु माहात्म्यं वर्तते ते विलक्षणम् ॥
पार्वतीनाथवसतिसाधिके काशिके नमः ।
मम सन्नाशायादृष्टं राज्यप्राप्तिनिरोधकम् ॥
तत्र स्थितजनैः सर्वैराशीर्भिः सोऽभिवर्धितः ।
जनानुरागं स्वस्मिंस्तु दृष्ट्वा तेन तु भाषितम् ॥
ईशेन यदि संदेया मह्यं वै सार्वभौमता ।
तर्ह्येतन्नगरस्थानां पीडासंजनकः करः ।
संत्यज्योऽस्ति मया चात्र साक्ष्यस्ति परमेश्वरः ॥
इत्युक्त्वा द्रविणं दत्तं दीनेभ्यः प्रीतिपूर्वकम् ।
गाङ्गं च सलिलं पीतं सर्वपातकनाशनम् ॥
तुचना(१)-प्राशनान्मृत्युर्यथा नश्यति वै नृणाम् ।
गहनी-सूवमर्दस्य(२) प्राशनात् पातकं तथा ॥
कालक्रमेण संदृष्टः प्रयागस्तेन शोभनः ।
नगरीणां तु सप्तानां नायकस्तपनप्रभः ॥
जह्नु सूर्यसुताभ्यां तु मण्डितः कामितार्थदः ।
शंबरैस्तु सरस्वत्याः पावितः सर्ववन्दितः ॥
तत्रात्मपूर्वजकृतं दृष्टं दुर्गं महत्तरम् ।
यत्राक्षयवटः श्रीमानस्ति तत् क्षेत्रच्छत्रकम् ॥
दुर्गाध्यक्षस्य निकटे तेनोक्त्वा प्रेषितं स्वयम् । २२६

इदं दुर्गं त्वयाऽस्मभ्यं द्रष्टुं देयं यथासुखम् ॥
इति तद्वाक्यमाकर्ण्य तेनापि किल तं प्रति ।
उक्त्वा संप्रेषितं वाक्यं तत्कालसदृशं स्वयम् ॥
मौजदीने जीवमाने नाशा कार्या त्वयास्य तु ।
दुर्गस्य येन दिल्यां वै स्थीयते तस्य शासनम् ।
अस्माभिः क्रियतेऽन्येषां शासनं न हि मन्यते ॥
पारिजातो यथा नेन्द्रविभिन्नस्य गृहान्तिके ।
संतिष्ठते तथास्माभिः शासनं नहि मन्यते ।
सार्वभौमविभिन्नस्य तस्मात्त्वं वस मात्र वै ॥
अवस्थातुं त्वया चात्र क्रियते यदि चाग्रहः ।
तर्हि युद्धं विधातव्यं मया साकं यथाविधि ॥
पापिष्ठस्य यथा चास्ति दुर्लभं स्वर्गदर्शनम् ।
तथा मत्स्थितिपर्यन्तं तवैतद्दुर्गदर्शनम् ॥
अस्मिन् दुर्गे लगित्वा त्वं दुर्गाया भव मा पशुः ।
साहवी (३) صاحبی भजनं कृत्वा कुरु ताप-(४)विनाशनम् ॥
अनाराध्य महादेवमध्यात्वा जगदम्बिकाम् ।
ईदृशं दुर्गरत्नं तु न चायाति कराम्बुजे ॥
अत्र यैर्भगवान् श्रीशो नार्चितो ब्राह्मणप्रियः ।
पूर्वजन्मनि तैर्लभ्या कथं वै क्षितिपालता ॥
अकब्बरमहीन्द्रेण दुर्गमेतन्महत्तरम् ।
विहितं चास्ति यत्रेन स्थित्वास्मिन् क्षेत्रनायके ॥
सति राजनि यो भृत्यो राजपुत्राय यच्छति ।
तदीय-दुर्गरत्नादि स वध्यो नृपतेर्भवेत् ॥
नेदं दुर्गं राजपुत्रैर्दृष्टमस्ति पुरा क्वचित् ।
महीनाथे विद्यमाने संद्रष्टव्यं कथं त्वया ॥

---

(१) पीयूष० । (पीयूषे तुचना भवेत् ।) (२) गङ्गाजलस्य । (गङ्गायां गहनी भवेत् । पानीये सूवमर्दः ।) (३) साहवी—देवी । (देव्यां तु साहवी भवेत् ।) (४) पाप० । (पापे तापः० समाख्यातः ।)

साहजाहे विद्यमाने सुजाकेन न दृष्टिसात् ।
कृतं स्थितं कथं चेदं द्रष्टव्यं भवताऽधुना ॥
दुर्गाध्यक्षस्य वचनमाकर्ण्य कर्णविप्रियम् ।
फर्कसाहोऽर्जुनसमः संजुहावावदुल्लकम् ॥
तस्याज्ञया तु तत्कालमवदुल्लः समागतः ।
तदन्तिके तु तद्वाक्यं फर्कसाहेन भाषितम् ।
तदुक्तं श्रुतिगं कृत्वा कथितं तेन तं प्रति ॥
इन्द्रप्रस्थे स्थितिर्यावत्तव राजन् न जायते ।
तावद्दुर्गान्तरस्थित्या तव कार्यं न जायते ॥
इन्द्रप्रस्थस्य दुर्गं चेत् करगं संभविष्यति ।
तर्हि सर्वाणि दुर्गाणि संभविष्यन्ति वै तव ॥
तस्मादत्र त्वया स्थातुमाग्रहो न विधीयताम् ।
जीयतामिन्द्रप्रस्थस्थो मौजदीनमहीपतिः ॥
एतस्मिन् समये प्रोच्य❀ जुल्फिकारेण प्रेषितम् ।
पत्रद्वाराऽतिदक्षेण भविष्येशप्रियेप्सया ॥
मौजदीनस्य तनयो नययुक्तो बलान्वितः ।
त्वां विजेतुं समायाति कलीचखानकादिभिः ॥
मौजदीनस्तु स्त्र्यासक्तो वर्तते सर्वकालकम् ।
तत्सुतोऽपि सदा पानासक्तोऽस्ति सर्वभावतः ।
सावधानतया कार्यं कार्यं क्वापि न व्यग्रता ॥
सर्वदोद्योगयुक्तानां व्यसनाशीविषेषु वै ।
भृशं संदत्तपृष्ठानां कार्यसिद्धिः प्रजायते ॥
सचिवोक्तं तु यो राजा मनुते विन्ध्यवाक्यवत् ।
अवश्यं तत्कृतं कार्यं सिद्धिमेति धरातले ॥
यथा चतुर्णां वर्णानां मुख्योऽस्ति मनहः(१)सदा।२५५

विशिखानामपि तथा वर्तते किल शैयदः ॥
असौ ते सचिवश्चास्ति तस्मात्ते समराङ्गणे ।
अचिरेणैव कालेन विजयः संभविष्यति ॥
इति तस्यापि चिल्कस्थं (२) ज्ञात्वा तत्समये कृतः ।
खासः(३)शस्त्रधराणां तु सदा सस्वल(४)वर्धकः ॥
मूलहस्य(५) यथा तालो(६) जायते तु घनोदये ।
अजकूच(७) ? गमी यूपैर्लभ्यते ? सुखमुत्तमम् ॥
सर्वपारवराणां(८) तु सन्नते तु प्रयागके ।
श्रुत्वा समागतं शीघ्रमजमदीननाजमम् ॥
प्रहितो भूमिनाथेन तं जेतुं स्वस्य नन्दनः❀ ।
सामग्रीसहितो ज्येष्ठो न क्वचिद्दृष्टसङ्गरः ॥
तमजित्वा त्वया वक्त्रं दर्शनीयं न वै मयि ।
उक्तं प्रस्थानसमय इत्थं च किल तं प्रति ॥
अभिवाद्य महीनाथमविचार्य मुहूर्तकम् ।
दरादुर(९) मसंस्मृत्य भवितव्यवशाद् गतम् ॥
ततः समागतं तेन मौजदीनात्मजेन च ।
इतो गतं मध्यभागे चोभयो राजपुत्रयोः ।
समागमस्तु संजातो गमागमविवर्जकः ॥
रक्षको वह्नियन्त्राणां तदीयः संस्थितो हि यः ।
सम्बन्धी सोऽजमद्दीनपुत्रामात्यस्य संस्थितः ॥
तद्वशादग्नियन्त्राणां सेनात्त्रयविधायिनाम् ।
रोपणं नैव विहितं तेन संग्रामवर्त्मनि ॥
स्वस्य वै दोषनाशाय कानिचिद्रोपितान्यपि ।
अकाले तानि मुक्तानि न पुनर्योजितानि च ॥ २६८

१ । मनहः—ब्राह्मणः । २ । चिल्कं—तस्करणं(?) । (चिल्कं तस्करणे भवेत्) । ३ । खासः—प्रस्थानं । (प्रस्थाने षास इत्युक्तं) । ४ । सस्वल—आनन्द० । (आनन्दे सस्वलो भवेत्) । ५ । मूलहः—मयूरः । (मूलहस्तु मयूरे स्यात्) ६ । तालः—सुखं । (सुखे तालो निगद्यते) ७ । कूचः—प्रस्थानं । (प्रस्थाने तु तु भवेत् कूचः) । ❀ M. क्त्वा । (८) पारवरः—तीर्थः । (तीर्थे पारवरो भवेत्) । (९) दरादुरं—गणेशं । (गणेशे तु दरादुरः) ।

* i. e. Azz-ud-din. See introduction for details.

अर्धरात्रे ❀ बलीवर्दान् शकटोद्वहनक्षमान् ।
दीपश्रृङ्गान् बहून् कृत्वा मौजदीनात्मजस्य तु ॥
व्यूहस्याभिमुखान् कृत्वा पृष्ठभागे तु वाहिनी ।
अवदुल्लेन विहिता नितरां बुद्धिशालिना ॥
गवामागमनं दृष्ट्वा सैन्यागमनशङ्कया ।
अध्यक्षेणाग्नियन्त्राणां मोचनं विहितं स्वयम् ॥
तत्कालमेव त्वरया फर्कसाहेन सेनया ।
संहतव्यूहमध्ये तु पतितं चतुरेण तु ॥
रक्षकं चाग्नियन्त्राणां समुत्साहविवर्जितम् ।
परैर्बलं पीड्यमानं नितरां बलवत्तरैः ॥
दृष्ट्वा करौ योजयित्वा तत्क्षणे प्रीतिपूर्वकम् ।
उक्तं गोपालसिंहेन नृपतेर्नन्दनं प्रति ॥
कलीचखानप्रमुखा भटाः सर्वे पलायितुम् ।
वर्तन्ते तु समुद्युक्ता योद्धुं कस्यापि मानसम् ।
नास्ति तस्मान्महीनाथपुत्र कालोचितं कुरु ॥
अत्र स्थित्वा निश्चितोऽस्ति निग्रहोऽन्यत्र वै गमात् ।
संदिग्धोऽस्ति मया किं वै वक्तव्यमधिकं प्रभो ॥
पर्वणोक्तं(१) जलासं(२)यो मनुते त्वयथार्थकम् ।
न तेन मलये(३) सौख्यं लभ्यते नापि मन्दिरे ॥
पराजयस्तु जातोऽस्ति तव सर्वात्मनाऽत्र तु ।
अनुकूले विधौ स्वल्पसामग्रीकोऽपि नै जयम् ।
प्राप्नोति प्रतिकूले तु सुरेन्द्रोऽपि पराजयम् ॥
इति गोपालसिंहस्य समाकर्ण्य तु वाक्यकम् ।
राज्याशां संपरित्यज्य भिक्षाशां संविधाय तु ॥ २७०

रणभूमिं परित्यज्य गतो देशान्तरं प्रति ।
मौजदीनस्य तनयो युद्धोपकरणोज्झितः ॥
मौजदीनस्य तनये रणदेशाद् गते सति ।
न कोऽपि संस्थितिं तत्र चक्रुर्वीरा धृतायुधाः ॥
इरंदै(४) [:] स्थीयते किं वै कचित् पामरवे(५)गते ।
अस्ति प्राणममो राजा सङ्गरे दृढसङ्गरः ।
सुभटाश्चेन्द्रियप्रायाः सामग्री देहसन्निभा ॥
एतत्त्रितयसम्पत्त्या संगरे लभ्यते जयः ।
ईश्वरस्यानुकूल्येन संग्रामधरणीतले ॥
यदि स्यात् संगरे चार्म(६) सर्वेषामेव कस्यचित् ।
तर्हि न स्यान्मामसस्तु(७)स मह्यं दायको भुवि(?)॥
मौजदीनात्मजव्यूहं दृष्ट्वा विगतमानुषम् ।
कारितस्त्ववदुल्लेन वीरसो(८) नृपनन्दने ॥
मौजदीनजिनाहस्तु(९) जातोऽस्ति तव वासगः(१०) ।
विजिते सति तत्पुत्रे सांप्रतं समराङ्गणे ॥
अतः परं यथाकामं विषयाद् विणादिकम् ।
गृहीत्वा युद्धसामग्री संपाद्या जयसाधिका ॥
सामग्रीमन्तरा कार्यसिद्धिर्यस्मान्न जायते ।
अतः कार्यार्थिना कार्यं सामग्र्याश्चार्जनं द्रुतम् ॥
ताश(११)हीना यथा मामी(१२)कंचुकोत्पादनाक्षमा ।
सामग्रीरहितो राजा तथा रिपुजयं प्रति ॥
इत्युक्त्वा जयसिंहस्य निकटे पत्रहारकः ।
प्रेषितः कर्णद(१३) स्त्वेको राज्योरं प्रति तत्क्षणे ।
राणाकस्यापि निकटे प्रेषितः कर्णदः परः ॥ २२८

❀ Ms. त्रौ ।

(१) पर्वण—आप्त० । (आप्ते पर्वणः) । (२) जलासं—वाक्यं । (वाक्ये तु जलासः कथ्यते बुधैः) । (३) मलये—भूतले । (मलयो भूतले भवेत्) । (४) इरंदैः—इन्द्रियैः (५) पामरवे—प्राणेषु । (६) चार्म—जयः । (जये चार्म समाख्यातं) । (७) मामसः—पराजयः । (८) वीरसः—अभिषेकः । (वीरसस्त्वभिषेके स्यात्) । (९) जिनाह—राष्ट्रं । (जिनाहस्तु भवेद्राष्ट्रे) । (१०) वास—हस्तः । (हस्ते वासः समाख्यातः) । (११) ताश—तन्तु । (?) (तन्तौ ताशः समाख्यातः) । (१२) मामी—सूची । (मामी सूच्यां निगद्यते) । (१३) कर्णदः—पत्रहारकः । (कर्णदः पत्रहारके) ।

एतावत्कालपर्यन्तं भवद्भिर्न यथा कृतम् ।
मौजदीनस्य साहाय्यं तथा मम जयावधि ॥
न कर्तव्यं यदा तस्य विधातव्यः पराजयः ।
मया तदा भवद्भिस्तु यथाकामं मदन्तिके ।
आगन्तव्यं भवद्भाग्यं वर्धनीयं तु प्रीतितः ॥

सहना (१) दमयानस्य(२) सार (३)वृद्धिः प्रजायते ।
यथा तथोदयाद् वृद्धिर्मम वः संभविष्यति ॥
इत्युक्त्वा पत्रमध्ये तु चतुरेण सुबुद्धिना ।
अन्येऽप्येवं प्रकारेण निरुद्धा दरसंस्थिताः ॥

निकटस्थाः स्वसंगे तु नीता रणविशारदाः ।
राजानो राजपुत्राश्च नितरां जयकाशिना ॥
तत् काले मौजदीनस्य निकटेऽपि मनस्विना ।

उक्त्वा संप्रेषितं वाक्यमवदुल्लनिदेशतः ।
फर्कसाहेन समरदक्षिणेन तरस्विना ॥

ममागमनपर्यन्तं न कर्तव्यं पलायनम् ।
आगम्यते मया यावत्तावद्राज्यं विधीयताम् ।
भुज्यतां दीयतां चापि दुःखं नैव विधीयताम् ॥
यावदस्ति धरापृष्ठे देहः पामरवा(४)न्वितः ।
तावद्देयं च भोक्तव्यं भूमिपैर्भूतिसंयुतैः ॥

यद्दत्तं यच्च संभुक्तं तदेव धनिनो धनम् ।
गतप्राणस्य धनिनो धनमन्येन भुज्यते ॥ २९२

अकृत्वैव तु संग्राममदृष्ट्वैव तु मद्बलम् ।
पलायितोऽस्ति भवतां तनयो रणभूमितः❀ ॥

भवत्-पुत्रस्य शौर्येण भवतामपि शूरता ।
ज्ञाताऽस्ति किन्न कार्येण जायते कारणानुमा ॥

इति वाक्यं समाकर्ण्य भ्रातृव्यस्य तु कर्कशम् ।
दिल्लीशेन समारब्ध उद्योगः समरस्य तु ॥

राजानः सर्वलोकानां बाह्यप्राणापहारिणः ।
रणानले स्वकान् प्राणान् हुत्वा शुध्यन्ति नान्यथा ॥

सन्नतो यस्तु संग्रामं कर्तुं भवति चोद्यतः ।
ईर(५)स्तस्मै स्वविन्ध्येन(६) सार्धं तुष्टः प्रजायते ॥

पुण्यात् संलभ्यते राज्यं पुण्यात् संलभ्यते यशः ।
पुण्यात् संलभ्यते युद्धं पुण्यात् संलभ्यते जयः ॥

स्नेहक्षयाद्दीपनाशो यथा भवति वै तथा ।
भोगादृष्टक्षयान्नाशो देहिनामपि जायते ॥

जरले(७) सर्वलोकानां मरणं किल जायते ।
वीराणामेव वेमानं(८) जायते समराङ्गने ॥

स्वपामरव(९) सत्वस्य(१०) भूमो(११)येन विधीयते ।
रणाग्नौ प्रीतिपूर्वं तु तस्य तापं विनश्यति ॥
समद्पूर्णे सारसे तु मम पातो न जायताम् ।
इति चिन्तयता त्याज्या प्राणाः समरमूर्धनि ॥ ३०२

---

(१) सहनात्—उदयात् । (उदये सहनः प्रोक्तः) । (२) दमयानस्य—सूर्यस्य । (३) सार०—कमल० । (सारस्तु कमले भवेत्) । (४) पामरव०—प्राण० । (प्राणे पामरवो भवेत्) । (५) ईरः—इन्द्रः । (६) बिन्ध्येन —गुरुणा । (७) जरले— गृहे । (जरलस्तु भवेद्गृहे) । (८) वेमानं—मरणं । (वेमानं मरणे भवेत्) । (९) पामरव—प्राण । (१०) सत्वस्य—घृतस्य । (११) भूमः—होमः । (सत्वं घृते समुद्दिष्टं, होमे भूम निगद्यते) ।

❀ Ms. भूगतः ।

यत्र विश्वम्भरो जंदी(१) मुदद्(२) तव न वै जयः।
सामग्रीसत्वकालेऽपि, जायते रास्त(३)दायकः ॥
प्रतिकूले तु सिलहे(४) तिलमे(५) सति किं गृहे।
निर्वाणं जर्जमा(६) नैति ताज(७) सन्तानननाशकः॥
अय कूजासू वमर्दो(८) यथान्यत्र न मे दरद् (९)
रवत्(?) زرد ॥
तथा विश्वम्भरे तुष्टे हस्ते तिष्ठति वै जयः ॥
आफताव (१०) آفتاب स्थिति पर्यन्तं दिनं
वासद् (११) باشد यथा तथा ॥
राहतो راحت तुपादकादृष्टं (१२) यावत्
संलभ्यते सुखम्।
प्रभुःकर्मानुरूपेण मजूरीं(१३) مزدوری संप्रयच्छति।
यथा भृत्याय मुदमी(१४) तथा यच्छति वै फलम्॥
नाजमं जारकाचस्तु(१५) सर्वभावेन पानसद्(१६)।
यथा तथैव करदं(१७) मुदमी(१८) परिरक्षति॥
दरूशत् درشت आदमखोर(१९) آدمخور जोर زور
युक्तः प्रजायते।
यथा तथा सुखादृष्टे सति चार्म(२०) प्रजायते॥३१०

आजराइलो(२१) عزرائیل यथा भोगादृष्टहानिं
विना नरम्।
न मारयति, तद्वत्तु समरे तत्त्रयं विना ॥
मृत्यु र्न जायते यस्मात्तस्मात्यक्त्वा तु यह्नकम्(२२)।
विधातव्यस्तु संग्रामो नितरां जयमिच्छता ॥
करार(२३) قرار नाज(२४) ناز गजव(२५) غضب
वर्जितो योऽस्ति मानवः।
तस्यै कबाल اقبال (२६) नेकी نیکی (२७) च न च
कुत्रापि गच्छतः॥
एकबालो ममाफ़ाव افلاح साम्यमाप्नोति सर्वदा।
इति चिन्तयता त्याज्यं तरसं ترس (२९)रणचत्वरे॥
संजायतां ❀ नेकनामी माहताव مہتاب
बरावरि(३०) برابری।
एवं चिन्तयता त्याज्यो लिवासः لباس (३१)
सर्वभावतः ॥ ३१५
फमोस فسوس (३२) जनकं न स्याद्दोजकं(३३)
دوزخ मम सर्वदा।

(१) जंदी—प्रतिकूल। (२) भवत्यर्थे मुदद् भवेत्। (३) रास्त—सुख। (सुखे रास्त समाख्यातं)। (४) सिलहे—पवने। (५) तिलमे—तिलजतैले। (६) जर्जमा—प्रदीपः। (जर्जमा तु प्रदीपे स्यात्)। (७) ताज—विकार(?)। (८) वमर्दः—जलं। (९) नमे दरद्—(न गच्छतीत्यर्थः)। (१०) आफताव—सूर्यः। (११) वासद्—(तिष्ठति)। (१२) राहतोत्पादकादृष्टं—सुखसंजनकादृष्टं ?। (१३) मजूरी—पारिश्रमिकः। (१४) मुदमी—ईश्वरः, धनी। (१५) जारकाचः—जनकः। (१६) पानसद्—रक्षा करा। (रक्षतीत्यर्थः)। (१७) करदं—पुरुषं। (१८) मुदमी—ईश्वरः। (१९) दरूशत्—निष्ठुरः। आदमखोर—कौणपः। (२०) चार्म—विजयः। (२१) आजराइलः—अन्तकः। (आजराइलोऽन्तके प्रोक्तः)। (२२) यह्नकं—त्रासं। (२३) करार— स्थैर्य०। (करारस्तु भवेत् स्थैर्ये)। (२४) नाज—मान०। (माने नाजो निगद्यते)। (२५) गजव— क्रोधः। (गजवस्तु भवेत् क्रोधे)। (२६) एकबाल—प्रताप। (२७) नेकी—कीर्त्तिः। (२८) ममाफ़ाव—कल्याण०। (२९) तरसं—त्रासं। ❀ Ms. ता (३०) नेकनामी —यशः। माहताव-चन्द्र बरावरि—सदृश। (३१) लिवासः—अनुकारः। (३२) फमोस—पश्चात्ताप०। (पश्चात्तापे फमोसः स्यात्)। (३३) दोजकं—नरकं। (नरके दोजकं भवेत्)।

एवमाशंसता त्याज्यं गुणाहं گناه सर्वगर्हितम् ।
जहरं زهر (१) तु यथा क्षिप्रं मारयत्येव षारकम् ।
दोजखं دوزخ(२)पातयत्येव गुणाह(३)मपि वै तथा ॥
यथा चम्पकपुष्पस्य खुसवोह خوشبو (४) वातसंगतः ।
याति सर्वत्र शूरस्य नेकनामी نیکنامی(५) विसर्पति ॥
यकीन یقین (६) हिम्मताभ्यां همت (७) तु वर्जितो योऽस्ति मानवः ।
मस्वरी (८) जायते तस्य गौरवं च विनश्यति ॥
हफ्तरंगो (९) यथा पार्चो (१०) लाल (११) जर्दादि زرد (१२) रिंगतः ।
जायते तु तथाप्नोति गुरुतां बहुभिर्गुणैः ॥
दिलासा دلاسا(१३) क्रियते येन बहूनां तस्य जायते ।
दिलासा न च वै वीमः بیم (१४) कोऽपि संजायते भुवि ॥
न चास्ति यस्य वै लाको(१५) वदनामी (१६) न तस्य तु ।
जायते यस्य नैवास्ति गुणाहं گناه (१७) तस्य स्यासति سیاست (१८)॥ ३२२
बहुमो وهم (१९) न विधातव्यः कार्यकर्त्ता निरन्तरम् ।
अब्जसंपत्तितः काय भवत्येव विभाव्य तु ।
कार्यं सम्यक् प्रकारेण साधनीयं यथासुखम् ॥
अप अस्त्वं(२०) जायते कार्यमिति सर्वं दलीलकम् دلیل (२१) ।
वर्त्तते तु यतस्तस्मान्नोचितो बहुमो नृणाम् ॥
कारणे सति कार्यस्य भवने भवसम्मते ।
मादी(२२) यथा न कुत्रापि नरो(२३) भवति वै तथा ।
दलीलमन्यथा नैव जायते श्रुति-सम्मतम् ॥
गोसला غسل (२४) चरणाच्छीतहानिः संजायते यथा ।
तथा वै जंगकरणाज्जयोऽपि जायते किल ॥
तवीवा طبیب (२५) तुष्टिते लाजा (२६) द्वीमारस्तु بیمار (२७) यथा सुखी ।
जायते तु तथा युद्धे जयवकृत وقت (२८)कृते जयः ।
ताविस्तानो تابستان (२९) यथा गर्म گرم (३०) दायकोऽपि स्वभावतः ।
जयदोऽस्ति तथा जंग وقت جنگ (३१) वक्तो मर्द (३२) مرد जनस्य तु ॥
बकृत وقت(३३) लाभाद् यथा रासो راس (३४) माह ماه (३५) ग्रासं करोति वै ।
तथा लब्ध्वा दिनं शत्रुर्मारणीयस्तु शत्रुणा ॥ ३३०

(१) जहर—विषम् । (२) दोजखं—नरकम् । (३) गुणाहं—पापम । (४) खुसवोह—सुगन्धः । (५) नेकनामी—यशः । (६) यकीन०—निश्चय० । (यकीनं निश्चये प्रोक्तं) । (७) हिन्मत—शक्ति । (८) मसूवरी—कालिमा । (९) हफतरंगः—वित्तम् । (१०) पाची—··· । (११) लाल—रङ्गः । (१२) जर्द—पीतम् । (१३) दिलासा—आश्वासः । (१४) वीमः—भयानकः । (१५) लाक—··· । (१६) नामी—···। (१७) गुणाहं—पापम् । (१८) स्यासति—यातना । (१९) बहुमो—सन्देह । (२०) अस्त्वं—कारणं । (२१) दलीलकम्—सिद्धान्तः । (२२) मादी—स्त्री । (२३) नरः—तरी । (२४) गोसल—स्नानम् । (२५) तवीव—वैद्य । (२६) लाज—··· । (२७) वीमार—रोगयुक्तः । (रोगयुक्ते वीमारः) । (२८) वकृत—समयः । (२९) ताविस्तान—ग्रीष्म । (३०) गर्म—उष्म । (३१) जंग—युद्ध० । (३२) वकृत—समये । मर्द—वीर० । (३३) वकृत—समयः । (३४) रास—राहुः । (३५) माह—चन्द्रः ।

जामानह् زمانه (१) प्राप्तिः शत्रोः कुरुतेऽभिनवं तपः ।
कालान्तरे स तेनैव नितरामभिभाव्यते ॥
इत्युक्त्वा संगरं कर्तुं मौजदीनो विनिःसृतः ।
पुरात् पुरा कालयवन इव सैन्यसमन्वितः ।
तेन तत्र तु संदृष्टः सचिवोत्पादकः सुधीः ॥
तदन्तिके तु कथितं युद्धार्थं गम्यते मया ।
त्वया सम्यक् प्रकारेण पुररक्षा विधीयताम् ॥
अकृत्वा पुररक्षां यो जेतुं गच्छति वै रिपुम् ।
स नृपः स्वयशःकेतौ वायसं संप्रयच्छति ॥
तत्कालात् पूर्वकालं तु फर्कसाहेन प्रेषितम् ।
असदायासतां चित्तसंतोषस्य तु दायकम् ॥
पत्रं चातुर्ययुक्तैस्तु किं किं नैव विधीयते ।
अवदुल्लस्य वाक्येन मुद्राशपथगर्भितम् ॥
इन्द्रप्रस्थं कदाचिन्मे यदि हस्ते पतिष्यति ।
राज्यार्धं तर्हि वै देयं मया तुभ्यं न संशयः ॥
मौजदीनो यदा योद्धुं समायास्यति वै पुरात् ।
इन्द्रप्रस्थे तदा त्वां तु स्थापयिष्यति❋ सर्वथा ॥
तदा त्वयेन्द्रप्रस्थस्य प्राप्तिर्मम यथा भवेत् ।
यतनीयं तथा नूनं त्वत् पुत्राद् (?) ध्यानतस्त्वहम् ।
आगतोऽस्म्यधिकं किं वै वक्तव्यं तव सन्निधौ ॥
इति तद्वाक्यतः पूर्णकामेन स्वनृपं प्रति ॥
कथितं न विधातव्या पुरचिन्ता त्वया प्रभो ।
मयि जीवति जेतव्यः फर्कसाहः स्वको रिपुः ॥
विजित्य करिसं यो वै पुरं प्रविशति स्वकम् ।
तस्मै पुरस्थितो देवः सिद्धिं यच्छति चातुलाम् ॥
इति तद्वचनं श्रुत्वा प्रीतो राजा रिपं प्रति ।
गतः स्वबलमादाय तूर्यघोषपुरःसरम् ॥ ३४३

तत्कालं निजपुत्राय फर्कसाहस्य पत्रकम् ।
प्रदर्शितं प्रीतिपूर्वं कथितं चापि वाक्यकम् ॥
पुत्रास्माकं राजपुत्राः समानाः सन्ति चाखिलाः ।
तस्मात्त्वया स्वकाः प्राणा मौजदीनजयाशया ।
न हातव्या रणे किं किं दृश्यते नहि जीवता ॥
आजमस्य तु संग्रामे मृतं स्याद्भवता यदि ।
आगता स्यात् कथं तर्हि तव हस्ते ह्यमात्यता ॥
यैः संविधीयते राज्यं राज्यार्थं समराङ्गणे ।
तैरेव किल मर्तव्यं नापरैः पिंडजीविभिः ॥
राज्यार्थं यस्तु भूजानिः स्वशरीर-समुद्भवैः ।
शोणितैर्हरिकान्तायास्तृप्तिं न तनुते द्रुतम् ॥
तस्य हस्तग्रहं कर्तुं जायते लज्जिता धरा ॥
तस्मात् सर्वात्मना राज्ञा धरालाभाय सादरम् ।
युद्धे स्वशत्रुप्रहिताः सोढव्या निशिताः शराः ॥
स्वयं च शत्रवे कामं मोचनीयाः शिलीमुखाः ।
यथा कृत्वा तु धरणी तज्जशोणितधारया ।
आर्द्रा भवति वीराणां शोणितप्राशनोत्सुका ॥
इत्यात्मजारकाचस्य(२) वचनं श्रुतिगोचरम् ।
कृत्वा तत्पादयुगलं स्पृष्ट्वा भूमिपतेरनु ।
गतः स्ववाहिनीं सर्वामादाय रभसान्वितः ॥
तत्काले मौजदीनेन समाहूतोऽन्तिके स्वयम् ।
कोकिलाख्यः सदा राजकार्येषु निरतः शुभः ।
तदन्तिके तु कथितं वाक्यं तत्समयोचितम् ॥
जयसिंहादयो देशपतयो मम सङ्गके ।
न सन्ति युद्धकुशलास्तथान्ये मण्डलेश्वराः ॥
छविलोऽपि न चायातो विलेशयनिभो रणे ।
कलीचखानप्रभृतयः प्रपलाय्य रणाङ्गनात् ।
सद्ध(३) वेकिल(४) संशून्या मुखानि दर्शयन्ति न ॥
३५७

(१) जामानह्—समयः। ❋ MS. सि। (२) जारकाचस्य—जनकस्यः। (३) सद्ध—युद्ध। (४) वेकिल—सामग्री। (युद्धे सद्धः समाख्यातः सामग्र्यां वेकिलो भवेत्)।

एकस्त्वमसि सन्तोषकारकः किल संप्रति ।
असद्खानस्य तनयो न दक्षो रणकर्मणि ॥
वर्त्तते तु रसः कोऽपि तस्य वाचि विलक्षणः ।
तेनैव फर्कसाहस्तु समाहूतोऽस्ति चात्र तु ॥
बहुकालं न केनापि महीपेन धरातले ।
अमात्यः संविधातव्यस्त्वेक एव गुणान्वितः ॥
यथोपकारजनिका प्रत्यंचा कार्मुकस्य वै ।
अस्ति मन्त्री तथा राज्ञः सर्वोपकार-साधकः ॥
सचिवो भूमिनाथस्य हितं यो न करोति वै ।
द्रुतं स सचिवस्त्याज्यो महीनाथेन सर्पवत् ॥
कोकिलेन यथा तोषः सर्वेषां स्वस्वनेन तु ।
जन्यते मम सन्तोषो जननीयस्तथा रणे ।
त्वया कोकिल किं वाच्यमधिकं तव सन्निधौ ॥
इति भूनाथवचनं तत्कालं कोकिलेन तु ।
श्रुत्वा तदन्तिके वाक्यं कथितं प्रीतिपूर्वकम् ॥
मया त्वत्कृपया देवभोग्यो भोगः-कृतोऽस्ति वै ।
अतः परं विधेयं न ममास्ति किल संप्रति ॥
मया त्वज्जयलाभाय यतनीयं यथाविधि ।
स्वस्य जीवनपर्यन्तं चिन्ता कार्या त्वया न हि ॥
एतावत्कालपर्यन्तं भटैरेव रणाङ्गने ।
महीपेभ्यः प्रदत्तोऽस्ति विजयो राज्यदायकः ।
स्वयमेव रणं कृत्वा न राजा जयमृच्छति*॥
पुराणेषु यथा राज्ञां युद्धं संश्रूयते तथा ।
इदानीं जायते नैव च्छलेनैव प्रसाध्यते ॥
जयस्तस्मान्ममापायपर्यन्तं न भयं स्वयम् ।
कर्तव्यं मयि भूमौ तु पतिते सति वै रिपोः ।
जयाय यतितव्यं हि न विधेयं पलायनम् ॥ ३७०

चितिभ्रष्टा यथा नारी कचिन्नाप्नोति सत्क्रियाम् ।
रणभ्रष्टस्तथा राजा कीर्तिं नाप्नोति कुत्रचित् ॥
इति कोकिलतासस्य(१) वचनं कोकिलप्रमम् ।
श्रुत्वा राजा जहौ तापं यावत्तावत् समागतः ।
जुल्फिकाराह्वयो धीमान् युद्धोपकरणान्वितः ॥
तमागतं समालोक्य प्रीतेन भूमिपेन तु ।
सेनानिवेशो भवता यथायोग्यो विधीयताम् ।
इति संकथितं वाक्यं तत्क्षणे किल तं प्रति ॥
भूमिपस्य निदेशं तु धृत्वा स्वस्य तु मूर्धनि ।
सेनानिवेशो विहितस्तेन वैरिजनस्य तु ।
अभेद्यो युद्धकुशलजनानामपि सम्मतः ॥
एवं दिनेषु गच्छत्सु फर्कसाहोऽपि वाहिनीम् ।
समादायागतो योद्धुं समुत्साहपुरःसरम् ॥
तस्यावलोक्य पृतनां पताकाशतकैर्युताम् ।
गजराजिरथैर्भीमां मौजदीननृपस्य तु ।
वाहिनीसंस्थिता वीरा बभूवुर्भयसंयुताः ॥
तत्कालं कोकिलाख्येन स्वयं योद्धुमुपस्थितम् ।
स्वकीयां वाहिनीं सर्वां संगृह्य रिपुदुर्जयाम् ।
नमस्कृत्य महीपालमश्वमारुह्य शोभनम् ॥
आयान्तीं वीक्ष्य तत्सेनां फर्कसेरस्य वाहिनी ।
कर्तुं तद्वाहिनीभङ्गमागता बलगर्विता ॥
तत्कालं श्येनवद् गत्वा बलिना कोकिलेन तु ।
बहवो निहता वीरास्तदीयपृतनास्थिताः ॥
मार्यमाणां स्वकां सेनां संवीक्ष्य कोकिलेन तु ।
फर्कसाहमहीनाथस्तं हन्तुं स्वयमागतः ॥
आगते तु महीपाले कोकिलेन तु तं प्रति । ३८३

(१) Really कोकलतास—meaning foster-brother

* MS. त ।

कथितं वचनं चेदं तत्कालसदृशं स्वयम् ॥
मौजदीन-महीपाले विद्यमाने न शोभते ।
तवात्र किल चाञ्चल्यं तस्मात्त्वं सुस्थिरो भव ॥
राजपुत्रतया वध्यो मम नास्ति यतो भवान् ।
अतो मया प्रहारो न शस्त्रेण तव गात्रके ॥
क्रियते भवता पूर्वं प्रहारः संविधीयताम् ।
ममाङ्गे वीरसंभेद्ये सत्वरं विशिखादिभिः ॥
इति कोकिलतासस्य समाकर्ण्य तु भाषितम् ।
नरनाथेन वै भाला (१) मोचिता कोकिलं प्रति ॥
राजनिर्मुक्तविशिखैर्भिद्यमानस्तु कोकिलः ।
सशिखाचलवद् रेजे तत्कालं भूमिपाय तु ॥
कोकिलेनापि निर्मुक्तः सायको रुधिराशनः ।
कोकिलोन्मुक्तबाणेन संविद्धो नृपनन्दनः ॥
यावद् बभूव व्यथितस्तावत्तेन तदन्तिके ।
कथितं स्मितपूर्वं तु वाक्यमर्थविजृम्भितम् ॥
राजपुत्र रणे प्राणान् मद्धस्तमोचितेन तु ।
दस्तहस्तेन(२) मा मुञ्च गच्छ कामं यथासुखम् ॥
एवमुक्त्वा दस्तहस्तं यावन्मोक्तुमुपस्थितः ।
तावदेकेन चागत्य कर्तुमात्मप्रभोर्हितम् ।
अन्यस्त्रेण हतः शूरः कोकिलो रणदक्षिणः ॥
कोकिले विगतप्राणे जाते सति पलायिता ।
तदीया पृतना सर्वा पीडिता परसेनया ॥
कोकिलस्य वधं श्रुत्वा मौजदीनाभिधो नृपः ।
मृत्युकालं समायातं बुबुधे स्वस्य निश्चितम् ॥
असदखानतनूजोऽपि कोकिलस्य क्षयोत्तरम् ।
बाह्युद्धं प्रकुर्वाणस्त्वकुर्वाणस्तु वाजिना ॥
कुत्रास्ति पातसाहस्तु साम्प्रतं चेति वै वदन् ।
रणदेशात् समायातः संस्थितो यत्र भूपतिः ॥ ३६७

सेनामुखात् समायाते जुल्फिकारे ذو الفقار प्रभुं प्रति ।
तदीया निखिला सेना प्रपलाय्य क्षयं गता ।
चण्डवायुसमायोगात् सत्वरं शारदाभ्रवत् ॥
विलोक्य वाहिनीं भग्नां मौजदीनमहीपतिः ।
जुल्फिकारसमुद्दिष्टवर्त्मना स्वपुरं प्रति ॥
समागतः पुरं प्राप्य योद्धव्यमिति मानसे ।
कृत्वाऽमात्येन सहितो भृशं तद्बुद्धिपाशितः ॥
श्रुत्वा पराभवं राज्ञो दुर्गाध्यक्षस्य सन्निधौ ।
उक्त्वा संप्रेषितं वाक्यं असद्खानेन तत्क्षणे ॥
त्यक्त्वा संग्राममायात(३) सन्नताय त्वया नहि ।
इदं दुर्गं प्रदातव्यं मम वाक्येन सर्वथा ॥
दुर्गं चानेन लब्धव्यं चेत्तर्हि समरोद्यमः ।
अवश्यमेव चास्माकं विधातुं संपतिष्यति ॥
इति तद्वचनाशेन गुप्तद्वारं पुरं कृतम् ।
तत्काले मौजदीनस्तु معز الدین समायातस्तु मन्त्रिणा ॥
सह तत्र समागत्य पुरमध्यस्थितं प्रति ।
उक्त्वा संप्रेषितं वाक्यं तत्कालसदृशं मुखात् ॥
दुर्दैववशतो भङ्गो युद्धे जातोऽस्ति वै मम ।
प्रविश्यास्मिन् पुरे योद्धुमागतोऽस्मि त्वया द्रुतम् ।
मह्यं पुरप्रवेशाय शीघ्रं मार्गः प्रदीयताम् ॥
इति भूमीन्द्रवचनमाकर्ण्य तेन तं प्रति ।
उक्त्वा संप्रेषितं वाक्यं नितरां कर्णकर्कशम् ॥
एतावत्कालपर्यन्तं स्वत्वं दुर्गे तव स्थितम् ।
अस्मिन् युद्धात् परावृत्य समायातोऽसि वै यतः ॥
अविजित्य(४) रिपुं स्वस्य तस्मात्ते नास्ति तत्त्वतः ।
स्वत्वं येन जितोऽसि त्वं तस्यास्मिन् वर्त्तते मया ॥
तदीयमेतत्त्भ्यं तु कथं देयं त्वयापि वै । ४११

(१) भाला—शरः । (२) दस्तहस्त—तोमरः । (३) M. व्यातः । (४) M. जित्वा ।

विचार्य किल द्रष्टव्यं किं वाच्यमधिकं मया ॥
एवं तदुक्तमाकर्ण्य मन्त्रिणा तेन स्वस्य तु ।
गृहोपान्ते प्रीतिपूर्वं स्थापितश्चापि भोजितः ॥
एतस्मिन् समये दूताः फर्कसाहनृपं प्रति ।
असदूखानेन (1) प्रहिता मनोमारुतरंहसः ।
उक्त्वा च प्रेषितं वाक्यं तत्कालसदृशं स्वयम् ॥
इतो न(१)याति चान्यत्र यावद्वै मौजदीनकः ।
तावदागत्य धरणं युष्माभिः संविधीयताम् ।
अस्यायं भवतां वाक्यादवरुद्धोऽस्ति वै मया ॥
इति तन्मन्त्रिवचनादवदुल्लस्तु عبد الله सेनया ।
सहितः प्रेषितः पूर्वं पृष्ठतस्तु समागतः ।
फर्कसाह فرخ السير महीपालो लोकपालसमप्रभः ॥
आगत्य तत्र त्वरया महत्या सेनया सह ।
अवदुल्लेन कथितं मौजदीन-नृपं प्रति ॥
मौजदीनमहीपाल ललनालालनोत्सुक ।
असदूखनेनावरुद्ध प्रणमन्तमवेहि माम् ॥
अतः परं परित्यज्य राज्याशां मम वाक्यतः ।
फर्कसाहाय संदातुं स्वकीयां क्षितिपालताम् ।
आगन्तव्यं हि मत्सङ्गे गजमारुह्य शोभनम् ॥
अस्माभिर्भुज्यते यस्य हितं तस्य विधीयते ।
दुःखं संदीयतेऽस्मभ्यं यैस्तेषां क्रियते क्षयः ॥
ये यथा मां प्रपद्यन्ते तांस्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥
इति श्रीकृष्णवाक्येन सव धरणिमण्डले ।
हिताहितं प्रकुर्वन्ति हिताहितविधायिनाम् ॥
यावत्कालं हितं येन यस्य वै संविधीयते ।
तावत्कालं हितं तस्य तेनापि किल चिन्त्यते ॥
इति तस्योक्तमाकर्ण्य मौजदीनाभिधो नृपः । ४२५
गजमारुह्य निःश्रीकस्त्वं द्रष्टुं भीतवद् गतः ॥
तस्यामात्योऽपि सत्रीतस्तदनु भ्रष्टपौरुषः ॥
स्वसङ्गे तावुभौ नीतौ लोकानां माननाशकौ ।
अवदुल्लेन बलिना कालकल्पेन धीमता ॥
मध्यं गत्वा तु मार्गस्य महीपं प्रति तेन वै ।
वाक्यमुक्तमिदं प्रीत्या योजयित्वा करद्वयम् ॥
महीपतीनां निकटे स्थित्वा वै जालहो (२) परि ।
अन्येषामुचितं नास्ति गमनं तु यतस्ततः ।
वाचालो (३) परि संस्थेयं समुत्तीर्य मतङ्गजात् ॥
यस्मिन् क्षणे गजात्तेन समुत्तार्य तु भूपतिः ।
यानान्तरे तु संदत्तस्तत्कालं तेन वै मता ॥
अधिकारच्युतिः स्वस्य कथितं वचनं त्विदम् ॥
औरङ्गजेव اورنگ زیب भूमीन्द्रो यस्य
मे शौर्यचिन्तनात् ।
नालभत् (?) संस्थितो निद्रां सोऽहमद्य दुरात्मना ।
जालहादवदुल्लेन द्रुतमुत्तारितोऽस्म्यहम् (?) ॥
येनानेन न संभोक्तुं मह्यं दत्तास्ति राजता ।
तेनानेन कथं देया संभविष्यन्नृपाय वै ।
इत्युक्त्वा चिन्तयामास मुदमीं(४) सर्वकारकम् ॥
ततोऽवदुल्लखानस्तु फर्कसाहान्तिकं गतः ।
तत्र गत्वा तु कथितं वाक्यं तेनार्थगर्भितम् ॥
फर्कसाहमहीनाथ चिरं जीव धरातले ।
पश्य मां सर्वदा प्रीत्या नियोगस्य तु कारकम् ॥
सामात्यो मौजदीनस्तु भवन्तं द्रष्टुमिच्छति ।
ब्रह्मघ्न इव श्रीरामबद्धसेतुं त्वरान्वितः ॥
इति तद्वचनं श्रुत्वा फर्कसाहेन भाषितम् ।
कातरस्य मया तस्य क्रियते न समीक्षणम् ॥
तस्य संदर्शनाच्छौर्यं ममापि निर्गमिष्यति ।
रणात् पलायितनृपवदने तमसः स्थितिः ॥ ४२६

1. This is a unique statement. This fact has not been recorded in any other chronicle.

(१) Ms. ना । (२) जालह—मतङ्गज । (३) वाचाल—घोटक । (४) मुदमी—ईश्वर ।

अस्ति तद्दर्शनाद्राज्ञां यशःशीतांशुमण्डलम् ।
क्षुब्धं भवति वै यस्मात्तस्मात्तद्दर्शने मम ॥
रुचिर्नास्ति यथाकामं सहवीप्रीतये हि सः ।
व्यापादनीयो राज्यस्य व्याघातप्रतिपादकः ॥
अस्माभिर्यदि जीवंश्चेत् स्थापनीयो धरातले ।
तर्हि तत्पक्षमाश्रित्य बहुभिर्मण्डलेश्वरैः ॥
उपद्रवो विधातव्यस्तस्माच्छत्रुस्तु शत्रुणा ।
प्राणयुक्तो न संस्थातुं देयश्चेत्थं तु मे हृदि ।
समायाति भवच्चित्ते किमायाति तदुच्यताम् ॥
एवमात्मनृपोक्तं तु वाक्यमाकर्ण्य तेन तु ।
कालोचितं तु कथितं स्मितपूर्वं यथाविधि ॥
शूद्रस्य वेदपठने नाधिकारोऽस्ति वै यथा ।
तथा नैवास्ति चास्माकं महीपहननस्य तु ॥
राजभिन्नस्य नैवास्ति राजसूयाधिकारता ।
यथा तथा न चास्माकमस्ति तद्घातनार्हता ।
नृपस्यैवाधिकारोऽस्ति नृपस्य हननं प्रति ॥
सोऽपि राजास्ति त्वं राजजातोऽसि भवता हि सः ।
घातनीयो न चास्माभिः क्रियते तस्य वै वधः ॥
चालकः शिवलिङ्गस्य राजव्यक्तिप्रहारकः ।
द्वेषकृद्ब्राह्मणानां तु प्राप्नोति न सुखं क्वचित् ॥
निरागस्कस्य यो द्वेषं कुरुते भूमिपस्य तु ।
तस्य भद्रं न कुत्रापि जायते किं पुनर्मया ।
वाच्यं त्वयैव कर्तव्यमुचितं सत्वरं प्रभो ॥
नृपो यस्य च विद्वेषं कुरुते तस्य निग्रहे । ४५१
निग्राहकस्य नैवास्ति दोषः कोऽपि धरातले ॥
अवधार्यमिदं राजन् भवतापि निरन्तरम् ।
मदुक्तं वचनं युक्तं कदाचित् संस्मरिष्यसि ॥
स्वस्य वै विजयासक्तमात्मानं किन्न वै मनः ।
संपातयति संसारे कारागेहनिभे बलात् ॥
मनसा पात्यते ह्यात्मा यथा स्वभयदायकः ।
तथा संपात्यते राजा मन्त्रिणापि भयङ्करः ॥
इत्यमात्योक्तमाकर्ण्य सविषान्नं तु भोजितम् ॥*
तत्क्षणे मौजदीनाय फर्कसाहेन संस्कृतम् ।
तदन्नं तेन संभुक्तं प्रीतिपूर्वं यथाविधि ॥
सन्नतो ह्यवरुद्धस्तु ग्रासमात्रेण तुष्यति ।
असंरुद्धस्तु स्वं राज्यमपि स्वल्पं प्रपश्यति ॥
तदन्नभोजनात्तृप्तो यथा जातस्तथैव हि ।
तत्कालं धरणीपालो जातः पामरवोज्झितः ॥
गतपामरवं (१) श्रुत्वा मौजदीनमहीपतिम् ।
फर्कसाहेन भूपेन सुखलाभाय स्वस्य तु ॥
छित्वा वर्षधरा दुष्ट-क्षयकर्मणि दक्षिणाः ।
असद्खान اسد خان तनूजस्य हननाय नियोजिताः ॥
तत्कालमबदुल्लेन महीनाथं प्रति स्वयम् ।
योजयित्वा करौ वाक्यं परिणामहितावहम् ।
कथितं सर्वलोकानां शृण्वतां प्रीतिपूर्वकम् ॥
राजन् मा मन्त्रिणं मौलं जहि त्वं विजयं कुरु ।
मनसो मन्त्रिकार्यं ते कः करिष्यति तं विना ॥ ४६२

---

*For contemporary evidence of Muizzud-din's death, see Introduction. Md. Yar Khan the Nazim allowed the messengers carrying an order in Farruksiyar's own handwriting to enter the room for finishing Farruksiyar off. He had to be forced away from Shrieking Lal Kumari. It is said that he was kicked to death. Lakṣmīpati's account is indeed a very innocent one.

(१) पामरव—प्राण ।

राज्यभृत्तो विनाऽमात्यमूलं कस्यापि हस्तके ।
न तिष्ठति यतस्तस्मात् सचिवो* धरणीभृता ।
रक्षणीयो न वै नाशश्चिन्तनीयस्तु तस्य वै ॥
सचिवस्य तु यो नाशं संचिन्तयति पार्थिवः ।
अचिरेणैव कालेन तस्य नाशः प्रजायते ॥
अजरा(१) न्मामकासारो(२) यथा संजायते नृणाम् ।
सन्नतानां तथा राज्यं स्थिरं भवति मन्त्रितः ॥
भादरं (३) कुरुते यस्तु सचिवस्य निरन्तरम् ।
स नृपो न क्वचित्तालं (४) लभते द्रविणान्वितः ॥
हरफुहा (५) यथा वृद्धिं नाप्नोति रङ्ग(६) मन्तरा ।
विनाऽमात्यं तथा राजा बलेनापि समन्वितः ॥
सर्वाणामपि मर्दानां श्रूयन्ते मन्त्रिणः शुभाः ।
मर्त्यानां मन्त्रिसद्भावे वर्त्तते का विचित्रता ॥
ईरस्य (७) चर्चेला (८) मन्त्री बलेः पाशोऽस्ति सर्वदा ।
ताभ्यां तयोश्च वचनं श्रूयते मन्यतेऽपि च ॥
स्वयमेव तु यो राजा मन्त्रिकार्यं करोति वै ।
स राजा भाजरे(९)गत्वा विनैव किलवेकिलम्(१०) ।
करोतु पाकं प्रत्यंचां विना वा शरमोचनम् ॥
जनरानी(११)न कुरुते चार(१२)कार्यं यथा क्वचित् ।
सन्नतो न तथा मन्त्रिकार्यं संकर्तुमीहते ॥ ४७२

मन्त्रिसाध्यं तु यत् कार्य तदन्यस्मान्न जायते ।
यतस्ततस्तु सचिवस्त्यक्तव्यो न महीभृता ॥
वको जनमद (१३)स्थाने स्थापितोऽपि न कुत्रचित् ।
नीरक्षीरविवेकन्तु कुरुते स्वस्वभावतः ॥
इरां(१४)विना यथा नद्या जलहो(१५)वर्धते नहि ।
सन्नतस्य तथा वाग्म(१६)नयज्ञं मन्त्रिणं विना ।
अस्माभिस्तु न वै किञ्चिद् ज्ञायते मन्त्रिकार्यकम् ॥
अस्माकं मस्तके दत्त्वा मन्त्रितां निजमन्त्रिणम् ।
एनं मा जहि चैतस्य जारकाचं (१७) यथाविधि ।
अमन्दस्य स्थले नूनं संस्थापय निरन्तरम् ॥
तोयं विना[यथा]तंगु(१८)मनहानां(१९)न शोभते ।
सन्नतानां तथा राज्यं सर्वदा मन्त्रिणं विना ॥
विलाह(२०)युक्तभूपालवासे(२१) तिष्ठति वै यतः ।
जयलक्ष्मीस्ततो राज्ञा विलाहः सर्वकालके ।
कर्तव्यो लोकवचनान्न कार्यो जनसंचयः ॥
यथा सहन(२२)काले तु सर्वदा पारवादिनः(२३) ।
जर्चोषा(२४)युगलं भूमौ वियुक्तं जायते प्रभो ।
तथापर्वण(२५)वाक्येन वियोगो मन्त्रिभूपयोः ॥
नाथ मा मन्त्रिणं हत्वा कुरु मां मेषु(२६)सन्निभम् ।
अहत्वैनं द्रुतं प्रीत्या कुरु सार(२७)समं(२८)द्रुतम् ॥
४८२

*Ms. स्तस्माच्छ० ।

(१) अजरात्—ज्ञानात् । (२) मामकासार—निर्वाणम् । (३) भादर—द्वेषः । (४) ताल—सुखम् । (५) हरफुहा—वह्निः । (६) रङ्ग—काष्ठम् । (७) ईरस्य—देवनाथस्य । (८) चर्चेला—बृहस्पतिः । (९) भाजर—महानसम् (रन्धन-शाला) (१०) वेकिल—सामग्री । (११) जनरानी—गौः । (१२) चार—व्याघ्रः । (१३) जनमद—हंस० । अतःपरं मेदहा इत्यधिकम् आदर्शे । (१४) इरां—वृष्टिं । (१५) जलहः—प्रवाहः । (१६) वाग्म—बुद्धि । (१७) जारकाचं—जनकम् । (१८) तंगु—जपः । (१९) मनहानां—ब्राह्मणानां । (२०) विलाह—विवेक । (२१) वासे—हस्ते । (२२) सहन—उदय । (२३) पारवादिनः—चन्द्रस्य । (२४) जर्चोषा—चक्रवाक । (२५) अपर्वण—अनाम । (२६) रात्रि । (२७) दिन । (२८) शतपत्र ।

एनं सार सम हत्वा सोमो भव न भूमिप ।
अहत्वा मन्त्रिणः पुत्रं मलये त्वं रविर्भव ॥
इति स्वामात्यवचनं श्रुत्वा भूपेन तं प्रति ।
कथितं प्रीतिपूर्वं तु शिविरं प्रति गम्यताम् ॥(1)
इति तस्य निदेशेन तस्मिंश्च शिविरं प्रति ।
गते सचिवपुत्रस्तु कारितो मस्तकोज्झितः ॥(2)
तन्मस्तकं मौजदीनपाददेशैकदेशके ।
बन्धयित्वा तु द्विरदपृष्ठदेशावलम्बितम् ।
कृत्वा समग्रनगरे भ्रामितं दिवसत्रयम् ॥
मौजदीनमहीनाथमरणश्रवणेन तु ।
संभविष्यति यः कोऽपि व्याकुलो मम पत्तने ।
स मयेत्थं प्रकारेण मारणीयो न संशयः ॥
क्षेत्रस्थितानां भूतानां प्रीतये न मया कचित् ।
महिरम्(१) कथ्यते वाक्यमिति चापि प्रभाषितम् ॥
एवमुद्घोषितं श्रुत्वा पुरस्था निखिला जनाः ।
ऊचुस्तत्प्रीतये स्वस्य हिताय च शिवाय च ॥
फर्कसाह महीनाथ चारुप्रतिमविक्रम ।
जय सर्वावनीपालमौलिरत्नमरीचिभिः ॥ ४६१

नीराजिताङ्घ्रियुगल पुरमेतत् स्वभासया ।
विभासय सदा शत्रून् स्वप्रतापानलार्चिभिः ।
भस्मतां नय चास्माकं पालनं पितृवत् कुरु ॥
औरङ्गजेबतनयतनूजस्य तु नन्दने ।
त्वयि राज्ये स्थिते चाद्य जातं नः सुखमुत्तमम् ॥
नाजमोत्पत्तिकाले तु तालरा जायते यथा ।
सर्वेषां तु तथा जातमस्माकं त्वद्विलोकनात् ॥
एवं वाक्यं तु पौराणामाकर्ण्य तेन तत्क्षणे ।
गत्वा मन्दिरमध्ये तु शुशुभे पूर्वराजभिः ।
उपभुक्ते प्रीतिपूर्वमुपविष्टं नृपासने ॥
तत्काले सान(२) धरस(३)जलजादि(४) समर्पितम् ।
मान्येभ्यो याचकेभ्यश्च चपाभ्य(५)श्च यथाविधि ॥
तेन तत्समये वेजजी (६) न कोऽपि तत्र चाभवत् ।
न कोऽपि चिलिद (७) स्तत्र कोऽपि दुःखसमन्वितः ॥
जस्तः (८) कोऽपि न तत्रासीत् खुस्कलः (९)
सकलो जनः ।
अभवत्तत्क्षणे नीत्वा रत्नानि विविधानि च ।
अवदुल्लः समायातः सर्वदौर्बल्यभंजकः ॥ ५००

---

1. This is in accord with other evidence about the cold-blooded murder of Zulfiqar Khan, which was preceded by his father's leaving the place. At this time Khwaja Asim was with Zulfiqar Khan. Two hundred men armed with sword and shield congregated for killing one man.

2. Ibadullah Khan, Daroga, entered asking, "His Majesty asks what reason there was for you to imprison Md. Kam Baksh and inflict injury on his followers?" By and by, he was confronted with the question of killing the Emperor's Elder brother Md. Karim. Zulfiqar complained of this meaningless talk and wanted to be killed. Lachim Beg and some Qalmaq slaves strangled him to death. Even then, some mounted on his chest and others plunged daggers into his body many a time.

(१) मिथ्या ॥ (२) स्वर्णं । (३) रजत । (४) रत्नादि । (५) स्त्रीभ्यः । (६) याचकः । (७) व्याधितः । (८) धूर्तः । (९) खुस्कलः—सन्तुष्टः ।

भ्रामयित्वा तु भूपस्य मूर्ध्नि रत्नानि तेन तु ।
प्रक्षिप्तानि चतुर्दिक्षु योजयित्वा करद्वयम् ।
उक्तं भूपालनिकटे सर्वेषामुपकारकम् ॥
राजराज चिरं जीव प्रजाः * पालय पुत्रवत् ।
मौजदीनवियोगाग्निज्वालाभिर्दह्यमानकम् ॥
अवरोधजनं चैनं स्वकृपादृष्टिदानतः ।
शीतलं कुरु भूमिस्था याऽस्ति वै करपीडिता ॥
प्रजा तव महीपाल तां च तापविवर्जिताम् ।
कुरु सर्वमहीपालान् समाहूय निजान्तिके ॥
उज्जये योऽस्ति विषयस्तव तं जनमण्डितम् ।
कारयस्व यथा चौरा न चरन्त्यवनीतले ॥
तथा यतस्व मर्यादां वंधितां पूर्वराजभिः ।
मा विभञ्जय भद्राय स्वयशोरजनीश्वरम् ॥
विस्तारय रिपून् सर्वान् प्रतापदहनेन तु ।
दाहयित्वा स्वकीयांस्तु पूर्वजान् बलिसद्मनि ।
संस्थितान् सुखधाराभिः संतोषय निरन्तरम् ॥
असंदं स्वामितनयनाशतो नष्टसौख्यकम् ।
स्वगेहमध्यपतितमन्नवस्त्रादिदानतः ॥
सन्तोषय न दीनानां दुःखमुत्पादनेन तु ।
अभुक्त्वैव तु त्वं भोगान्न नदीकूलवत् पत ॥
अहं तवास्मि करदस्त्वं चासि मम सन्नतः ।
त्वया मम हितं कार्यं मयापि च हितं तव ॥
स्वामिद्रोहो न कर्तव्यो भृत्येन तु कदाचन ।
स्वामिद्रोहकरो भृत्यो याति वै निरयं ध्रुवम् ॥
इति सर्वपुराणेषु श्रूयते पठ्यतेऽपि च ।
रक्षणीयः सदा ह्यात्मा सर्वेभ्यः सर्वभावतः ॥
आत्मरक्षां न कुरुते यस्तु वै मूढमानसः ।
न तस्य निर्गमः शीघ्रं कुम्भीपाकात् प्रजायते । ५१४

इदं च श्रूयते राजन् पुराणेषु निरन्तरम् ।
तस्मान्मया त्वया यावन्न ममानिष्टचिन्तनम् ॥ ५१५

\+ \+ \+ \+

यदा त्वया ममापायश्चिन्तनीयस्तदा मया ।
आत्मरक्षा विधातव्या व्यापाद्यापि च त्वां प्रभो ॥
इति त्वया स्वके चित्ते कृत्वा मेऽनिष्टचिन्तनम् ।
न कर्तव्यं त्वया यावन्मयापि सर्वभावतः ॥
इष्टं तव विधातव्यं सर्वथा भवता यदा ।
विधातव्यः स्वयं यत्नो मम व्यापादनाय तु ।
यतनीयं तदा राजन् मयापि तव हानये ॥
कृष्णपुत्रेण किं पूर्वं वज्रनाभो न वै हतः ।
आत्मानं हन्तुमुद्युक्तः श्वशुरः सर्वमानितः ॥
ईरेण (१) सर्वशर्वाणां (२) सन्नतेन (३) न किं हतः ।
दितेर्गर्भः स्वरक्षार्थं चर्चला (४) शिक्षितेन वै ॥
न किं पुरा हतः स्वस्य मातुलो राज्यसंस्थितः ।
कंसः कृष्णेन रक्षार्थमात्मनो हननोन्मुखः ॥
बलभद्रेण वीरेण दूयते वित्तापहारकः ।
न हतः किं पुरा कृष्णश्यालको राज्यसंस्थितः ॥
साहजाहो न किं राजा तनयेष्वसमानदृक् ।
औरङ्गजेबभूपेन कारागारे निवेशितः ॥
आत्मद्वेषकरो राजा कंसेन हरिशत्रुणा ।
किन्न दत्तः पुरा कारागेहे मान्यः स्वकः पिता ॥
मन्त्री वा मन्त्रिपुत्रो वा भ्राता वा तनयोऽपि वा ।
आत्मद्वेषकरो राज्ञा निहन्तव्यो निरन्तरम् ॥
आत्मद्वेषकरं भृत्यं यो न वै क्षीणशक्तिकम् ।
करोति तस्य वै नाशस्तस्मादेव प्रजायते ॥
उन्मत्त-दुष्ट-कितव-धूर्त-याचकसंगतिः ।
सन्नतेन न कर्तव्या सर्वदा ताल (५) मिच्छता ॥ ५२८

(१) इन्द्रेण। (२) देवानां। (३) नृपतिना। (४) बृहस्पति। (५) सुखम्।
* Ms. प्रजां।

अनाथानां तथा स्त्रीणां बालानां वैरिसेविनाम् ।
विश्वासो न विधातव्यो भूभुजा सुखमिच्छता ॥
शस्त्रं विना कचिन्नैव स्थातव्यं स्वान्तिके नहि ।
बद्धशस्त्रः समागन्तु दातव्यः सुखमिच्छता ॥
अनालोके न वस्तव्यं स्मर्तव्यः सर्वदेश्वरः ।
संविभज्य प्रभोक्तव्यमन्नमागतमन्तिके ॥
कोनाह (१) भीतिविध्वंसकारकाणि निरन्तरम् ।
रत्नानि किल धार्याणि सर्वभीतिहराणि च ॥
अपराधं विना लोका दण्डनीया न कुत्रचित् ।
विलम्बो न विधातव्यः सागस्कानां तु दण्डने ॥
न दण्डयति सागस्कमागोहीनस्य दण्डने ।
उदुथक्तो जायते यस्तु शूरं(२) स्तस्य प्रहीयते ॥
बलिना वध्यमानस्य दुर्बलस्यावनं न यः ।
करोति भूमिपस्तस्य कीर्तिनाशः प्रजायते ॥
व्रजता तिष्ठता चैव भुंजता जाग्रता तथा ।
हसता शोचता चैव स्मर्तव्यो जगदीश्वरः ॥
मयि तिष्ठति विश्वेशो यथा सर्वगतोऽव्ययः ।
तथा सर्वेषु भूतेषु तिष्ठतीत्थं विभावयेत् ॥
अपमानो न मान्यानां कर्तव्यो धरणीभृता ।
अमान्यानां न सत्कारः कर्तव्यो भूतिमिच्छता ॥
दत्तापहारो न कचित् कर्तव्यो भूमिपेन तु ।
दत्तापहारकृद् याति न च वासमनाहकम्(३) ॥
विजर्जमेव(४) वक्तव्यं न कचिन्महिरम्(५) नृपैः ।
न सत्यात् सुकृतं किंचिन्नानृतात् पातकं तथा ॥
समुत्कृष्टस्य निकटे नापकृष्टक्रिया नृपैः ।
कारणीया न चोत्कृष्टा चापकृष्टस्य सन्निधौ ॥
मिसल्कर्दस्य(६) संवृद्धिः कर्तव्या धर्मसाधिका ।
महीनाथेन नितरामात्मरक्षणपूर्वकम् ॥ ५४२

न स्याद् यथात्मनो हानिस्तथा कार्यं धनार्जनम् ।
यत्रात्महानिशङ्का स्यात्तत्र कार्यो न चाग्रहः ॥
आत्मना साध्यते द्रव्यं द्रव्येणात्मा न साध्यते ।
दारिका(७)ज्जायते तल्लो(८)न तल्लाद्दारिकः कचित् ॥
यावता भोजनात्तृप्तिर्जायते तावदेव तु ।
भोक्तव्यं नाधिकं राज्ञा रोगविध्वंसमिच्छता ॥
जनानुरागो नितरां जननीयो महीभृता ।
जनानुरागतः सद्यो जायन्ते संपदो यतः ॥
त्यक्त्वा सर्वाणि कार्याणि प्रजाया रक्षणं नृपैः ।
कर्तव्यं शत्रुविजये न कार्या दीर्घसूत्रता ॥
व्यसनाशीविषाणां तु संगस्त्याज्यो महीश्वरैः ।
मायाविषु प्रकर्तव्या माया मतिसमन्वितैः ॥
मायाविषु न यो मायां कुरुते चाप्यमायिषु ।
मायां संकुरुते तस्य जायते चायुषः क्षयः ॥
वृत्तान्तग्राहकाश्चारा नियोक्तव्या महीभृता ।
सर्वत्र तेषां वाक्यन्तु श्रोतव्यं प्रीतिपूर्वकम् ॥
यथा तु सहजामोदो(९) न सानसह(१०) मंतरा ।
भुज्यते न तथा वृत्तं ज्ञायते चारमन्तरा ॥
विप्राणामपि बन्धूनां मित्राणामपि सर्वदा ।
उपेक्षा न विधातव्या महीपेन मनस्विना ॥
देवगोविप्रवह्न्यर्कातिथीनामवहेलनम् ।
न कर्तव्यं महीपैस्तु तथा लोकविरुद्धकम् ॥
वाजिनः करभाश्चैव मातङ्गा रासभास्तथा ।
द्रष्टव्याः पोषणीयाश्च सर्वदा धरणीभृता ॥
वन्दिनश्चारणा मल्ला गायकाश्चापि राजभिः ।
स्थापनीया भटेभ्यस्तु प्रतिमासं तु वेतनम् ॥
दातव्यमश्वशिक्षा च गजशिक्षा च तत्त्वतः ।
ज्ञातव्या सर्वदा कार्यं धनुर्वेदस्य दर्शनम् ॥ ५५६

(१) विष । (२) धर्म । (३) स्वर्ग । (४) यथार्थ । (५) मिथ्या । (६) कोशस्य ।
(७) क्षीरात् । (८) दधि । (९) ओदनः । (१०) सूपं ।

पूर्वाह्णे चैव सायाह्णे धनुषा लक्ष्यवेधनम् ।
विधातव्यं वृथा चेष्टा न कार्या विफलं वचः ॥
न वाच्यं न विधातव्यं पूर्वजानां तु शासनम् ।
अप्रमाणं विधातव्याः सर्वत्र तु जलाशयाः ॥
शाखापुराणि कार्याणि तथा देवगृहाणि च ।
चत्वराणि न कार्याणि तथा चोपवनानि च ॥
सेनापाला विधातव्याः शूराश्च कृतसङ्गराः ।
जलान्नशंखपूर्णानि कार्याणि निखिलानि तु ।
दुर्गाणि तेषु संस्थाप्याः शूराश्चाप्ताश्च मानवाः ॥
बहुकालं न कोऽप्येकः स्थापनीयस्तु दुर्गके ।
एकस्मिन् प्रतिवर्षं तु परावृत्य तु दुर्गपाः ।
कर्तव्याः सचिवोऽप्येको न कार्यो भूमिजानिना ॥
अनाश्वासो न यावत्तु जायते सचिवस्य तु ।
तावत्तस्य तु साचिव्यकरणे चाधिकारिता ॥
बोद्धव्या यत्क्षणे तस्य विश्वासस्य तु संक्षयः ।
जायते तत्क्षणे स वै कर्तव्यः क्षीणशक्तिकः ॥
अविश्वस्तं न यो राजा करोति क्षीणशक्तिकम् ।
सचिवं सत्वरं स वै तमेव क्षीणशक्तिकम् ।
करोति किन्न दहनं क्षीणं स्थूला घृताहुतिः ॥
मन्दिरा (१) वदनाम्भोजमधुपानमृतावृतौ ।
कर्तव्यं मलिनं तत्र न कार्यं किल मानसम् ॥
महिषीसेवनं कर्तुं त्रपां यो मनुते नृपः ।
तस्य विध्वंसनं कर्तुं तया संदीयते मनः ॥
संसुप्य* भार्यया साकं संस्नातव्यं महीभृता ।
दिवा धृतानि वासांसि न धार्याणि निशासु च । ५५६

रात्रौ धृतानि वासांसि न धार्याणि दिवासु (?) च ॥
अरिमायां (२) तु यो गत्वा कुरुते नेश्वरार्चनम् ।
भादरं (३) तस्य कुरुते सर्वदा जगदीश्वरः ॥
सधमः (४) सुस्थिरो यावदस्ति तावत् समर्जनम् ।
शूरस्य (५) संविधातव्यं महीनाथेन यत्नतः ॥
अरयोऽपि यतो दानान्मित्रायन्ते निरन्तरम् ।
अतो दानं प्रदातव्यं महीनाथेन प्रीतितः ॥
न दीर्घसूत्रता कार्या नाप्रतीतिर्न चापि वै ।
कार्पण्यं भूतिकामेन सन्नतेन स्वकार्यके ॥
कस्यचित् कार्यहानिस्तु कार्पण्येन प्रजायते ।
कस्यचिच्चाप्यविश्वासादालस्येनापि कस्यचित् ॥
अकार्पण्यमनालस्यं विश्वासैस्तु समन्वितम् ।
सन्नतं परराज्यश्रीः समाश्रयति सत्वरम् ॥
एवं सचिववाक्यं तु † परितुष्टेन तं प्रति ।
कथितं प्रीतिपूर्वं तु सन्नतेन विनीतवत् ॥
त्वद्भिन्नस्य नैवास्ति ममान्यस्याधिकारिता (?) ।
यतस्त्वमेव चामंदो (६) विहितोऽसि मयाधुना ॥
मम जीवनपर्यन्तं न तवामन्दताक्षयः ।
संभविष्यति वै तुभ्यं ‡ गते वान्यत्र वै पुनः ।
त्वद्भ्रात्रा संविधातव्या भृशं सचिवता मम ॥
ईरस्य (७) चर्चला मन्त्री यथा वासमनाहके (८) ।
वर्तते त्वं तथाऽमन्दो भव मे बुद्धिसंयुतः ॥ ५७०

(१) महिषी । (२) देवगृहे । (३) द्वेषं । (४) शरीरं । (५) धर्मस्य । (६) मन्त्री । (७) इन्द्रस्य । (८) स्वर्गे ।

* M. ०सुप्त्वा ।

† अथ किञ्चित् पतितमिति प्रतिभाति । अथ न पतितं तदा 'सचिववाक्येन' इति कृते कथञ्चित् समञ्जसं स्यात् ।

‡ अत्र वैतृष्ण्यमिति भवेत् ।

सन्ददस्य(१) यथा मन्त्री पाशो(२)स्ति
बलिसद्मनि ।
अमन्दो(३) भव त्वं साधो प्रमंदं(४) वचनं मम ॥
मन्तव्यं सर्वकालं तु सन्नतस्य तु शासनम् ।
अमन्देन विधातव्यं विरंद(५)सदृशं सदा ॥
राजोक्तं यश्च कुरुते न च चैतद्विरुद्धकम् ।
कदापि स तु भूपस्य प्रियो भवति मन्त्रिराट् ॥ ५७३
अभिमानं नृपाग्रे तु कुरुते न हि यो नरः ।
राजदण्डं प्रीतिपूर्वं गृह्णाति स च वै प्रियः ।
जायते भूमिनाथस्य सर्वदा जगतीतले ॥
रहस्यं भूमिनाथस्य प्रकाशयति यो न हि ।
स नरो भूमिनाथस्य जायते प्रीतिभाजनम् ॥
राजमातरि दारे च कुमारे द्वाररक्षके ।
राजमान्ये च योऽमात्यो राजवत् परिपश्यति ।
तस्मिन् राज्ञो विरोधस्तु न कदाचित् प्रजायते ॥
अनाहूतः समायाति द्वारि यश्च नृपांतिके ।
आहूत एव चायाति स प्रियो नृपतेर्भवेत् ॥
चलहचार(६)समो नित्यं सेवायां यस्तु मानवः ।
विक्रमे चारवत्तस्मै प्रीतो भवति भूमिपः ॥
सन्नतो मयि सुप्रीतो जायतामिति वाञ्छता ।
स्वप्नेऽपि विप्रियं राज्ञो न कार्यं सर्वदा प्रियम् ॥
झषे(७) वल्को(८) यथा शशी (?) धेल्यां(९)
तिष्ठति सर्वदा ।
प्रियकारिणि भूपानां तथा प्रीतिः प्र-तिष्ठति ॥ ५८१

राजवेषं न कुरुते राजभोगस्पृहां च यः ।
तस्मै संजायते प्रीतो नरनाथो निरंतरम् ॥
कोनाहमपि(१०) भूनाथदत्तं पीयूषवर्त्मना ।
भृशं पिबति यस्तस्मै प्रीतो भवति भूमिपः ॥
आज्ञाभङ्गं न कुरुते नरनाथस्य यो नरः ।
तस्मै भवति सुप्रीतो राजा रञ्जितभूतलः ॥ ५८४
आयान्तीं शत्रुसेनां यः कृत्वा विक्रममुत्कटम् ।
विमुखां कुरुते तस्मै प्रीतो भवति भूमिपः ॥
राजद्वेषकरो योऽस्ति तस्य द्वेषं करोति यः ।
तस्मै भवति सुप्रीतो राजा रविसमप्रभः ॥
पैशुन्यं यो न कुरुते स्वकार्याय परस्य तु ।
तस्मै भवति सुप्रीतो नृपो नयसमन्वितः ॥
अन्यायं यो न कुरुते विनयेन प्र-तिष्ठति ।
तस्मै भवति सुप्रीतो नृपो नयविशारदः ॥
व्यसनेषु न चासक्तः कुशलो राजकर्मणि ।
त्यक्तद्वेषोऽस्ति यस्तस्मै प्रीतो भवति पार्थिवः ॥
पातकं यो न कुरुते सङ्गं पातकिनां तु यः ।
तस्मै भवति सुप्रीतः पार्थिवः पृथुसन्निभः ॥ ५९०
अयथार्थं न यो वक्ति न संत्यजति सत्यकम् ।
तस्मै भवति सुप्रीतः सत्यसन्धो नराधिपः ॥
अपराधं न कुरुते दण्डते चापराधिनम् ।
यस्तस्मै जायते प्रीतो राजा धर्मस्य रक्षकः ॥
यस्य कस्यापि द्रव्यस्य हरणं कुरुते न यः ।
तस्मै भवति सुप्रीतो राजा रतिपतिप्रभः ॥ ५९३

---

(१) बाणतातस्य । (बाणताते तु सन्ददः) । (२) शुद्धः (?) । (शुद्धे पाश समीरितं) । (३) मन्त्री । (अमन्दो मन्त्रिणि स्मृतः) । (४) प्रमाणं । (प्रमाणे तु प्रमंदं स्यात्) । (५) वेदवाक्य० । (वेदवाक्ये विरंदः स्यात्) । (६) ग्रामसिंह० । (चलहचारी ग्रामसिंहे) । (७) पदे । (८) अर्थः । (पदे झषः समाख्यातमर्थे वल्क निगद्यते) । (९) क्षितौ । (क्षितौ धेलीति कथ्यते) । (१०) विषं । (कोनाहस्तु भवेद्विषे) ।

परकीयं न चाश्नाति स्वकीयं यः प्रयच्छति ।
तस्मै भवति सुप्रीतो राजा समरदक्षिणः ॥ ५९४
दीनानामवनं यस्तु चौराणां मारणं हि यः ।
करोति तस्मै सुप्रीतो राजा भवति सर्वदा ॥
शास्त्रोक्तं कुरुते यस्तु न च शास्त्रविरुद्धकम् ।
तस्मै भवति सुप्रीतो राजा शास्त्रार्थरक्षकः ॥
परस्त्रीविमुखो यस्तु स्वस्त्रीरक्षणतत्परः ।
तस्मै भवति सुप्रीतो राजा रमणिरक्षकः(१) ॥
एवं वदति भूमीशे तन्मात्रा (२) तु तदन्तिके ।
उक्त्वा संप्रेषितं वाक्यं तत्कालसदृशं स्वयम् ॥५९८
उपकर्तुर्न यो राजा स्वयं प्रत्युपकारकम् ।
करोति तस्य विफलं ज्ञातव्यं किल जीवनम् ॥
त्वत्तातेन न वै तुभ्यं दत्ताऽस्ति सार्वभौमता ।
नापि त्वत्ताततातेन न चान्येन न वै मया ॥६००
अवदुल्लेन चानेन तुभ्यं दत्ताऽस्ति साम्प्रतम् ।
तस्मादेतस्य वचनात् सर्वं कार्यं त्वया सुत ॥
यावन्नायं विरुद्धस्तु संभविष्यति वै त्वयि ।
तावत्तव भयं नास्ति कार्यं सम्यक् प्रकारतः ।
राज्यं पुण्यैकसंलभ्यं सर्वसन्तोषसाधकम् ॥
विरुद्धस्तु यदा चायं संभविष्यति वै त्वयि ।
तदा तवावनं देवनाथोऽपि न विधास्यति ॥
जनिर्विधीयते येन यस्य तेनैव संहृतिः ।
तस्य वै जन्यते तंतुनामरीत्या तु भूतले ॥
अनुकूलो यथा चायं त्वयि तिष्ठति मातृवत् ।
तथोपायस्त्वया कार्यो मम वाक्येन पुत्रक ॥

दशां पूर्वतनीयां स्वां स्मृत्वा त्वमवहेलनम् ।
सार्वभौमाभिमानेन कुरुष्वैतस्य मा सुत ॥
आत्माभेददृशा चैनं विलोकय निरन्तरम् ।
साहजाहप्रकारेण क्षितिं पालय चाखिलाम् ॥
राज्यं लब्ध्वा न यो राजा प्रजायाः परिपालनम् ।
करोति तस्य सुकृतं क्षीयते सुखदायकम् ॥
इति मातुर्वचः श्रुत्वा सार्वभौमोऽतिदक्षिणः ।
स्थापयामास चामात्यभावे तमवदुल्लकम् ॥ ६१०(३)

फर्रुकसाहमहीनाथे राज्यं शासति चाखिला ।
मोदमाप प्रजा [*sic*] तत्र न कोऽपि कश्मलान्वितः ॥
आसंस्तस्य गुणान् श्रुत्वा राजानो जातसम्भ्रमाः ।
संद्रष्टुं तं समायाताः प्रीतिपूर्वं त्वरान्विताः ॥ ६१२
यथोदितं निशानाथं समालोक्य चकोरकाः ।
समायान्ति तथा द्रष्टुमागतास्तं तु वै नृपाः ॥
जयसिंहादयो नित्यं सार्वभौमहिते रताः ।
उपायनकराः सैन्ययुक्ता रणसमुत्सुकाः ॥
तत्कालमवदुल्लेन सव ते प्रीतिपूर्वकम् ।
सार्वभौमस्य निकटे प्रापिताः पूर्णविक्रमाः ॥
योजयित्वा करं शीर्षे तैः सर्वैरवनीपतिः ।
वन्दितस्तन्निदेशेन स्थितं स्व-स्व-स्थले हि तैः ॥
तेभ्यस्तेन तदा पूर्वजातानां तु प्रकारतः ।
गजरत्नादिकं दत्तं समुत्कर्षप्रदायकम् ॥
तत्कालमवदुल्लेन नृपाणामन्तिके स्वयम् ।
तत्कालसदृशं वाक्यं कथितं प्रीतिपूर्वकम् ॥
भवद्भिर्भूमिनाथैश्च नतिभिर्वर्धितोऽस्त्ययम् ।
यथा तथाग्रेऽप्येतस्य रक्षणीयं तु गौरवम् ॥ ६१६

(१) 'रतिदूतिपदेष्वि'त्यादिवत् साधु ।

2. It is the Emperor's Mother who is reported to have brought about an amity & friendly attitude between Farruksiyār & the Sayyid Brothers. She used to guide her son on many occassions. 3. Here begins the 2nd part of this biographical History of Farruk-Siyār.

यावत्कालं भवद्भिस्तु दुहिताऽस्मै न दीयते ।
तावदेतस्य भूपस्य गौरवं न हि जायते ।।
तस्मान्मदुक्तादेतस्य गौरवस्थापनाय तु ।
स्वकीया संप्रदातव्या कन्यकाऽस्मै यथाविधि ।।
एवं चामन्दवाक्यं तु श्रुत्वा सर्वमहीश्वरैः ।
तदन्तिके तु कथितं स्मितपूर्वं शुभाक्षरैः ।।
अस्माकं छत्रभूतस्तु मरुदेशेश्वरोऽस्ति वै (1) ।
तेन चेत् कन्यका देया तर्ह्येतस्य तु गौरवम् ।
संस्थास्यत्य(?)धिकं किं वै वक्तव्यं किल संप्रति ।।
एवं सर्वमहीपानां वचनं चावधार्य तु ।
अवदुल्लेन स्वभ्राता (2) प्रेषितो मरुदेशके (3) ।
वाहिनीसहितो नूनमजितानयनं प्रति ।। ६२५
आगतं चावदुल्लस्य भ्रातरं बलगर्वितम् ।
श्रुत्वा समागतं शीघ्रं मरुदेशाधिपेन तु । ६२६
अजितेन स्वकां कन्यामादायातिबलीयसा ।।
आगतं कन्यया सार्धमवलोकयितुं प्रभुम् ।
अवदुल्लानुजेनोक्तं तत्कालसदृशं वचः ।।
आगम्यतां महाराज सुखं विश्रम्यतां मुदा ।
स्वगेहरीत्या स्थातव्यं भयमुत्सृज्य मेऽन्तिके ।।
त्वयाद्य रक्षितं चास्ति गौरवं मम वै यथा ।
अत्रागमनतो नूनं तथैवाग्रेऽपि प्रीतितः ।
स्थापनीयं त्वया राजन् क्रीतोऽस्मि बहुशस्त्वहम् ।।
एवं तदुक्तमाकर्ण्य मरुदेशेश्वरेण तु ।
कथितं प्रीतिपूर्वं तु चित्तसन्तोषदायकम् ।। ६३१

औरङ्गजेव-भूमीन्द्रभोगपत्नीजनस्य तु ।
हरणान्मम तातेन यत् पुरा तु विरुद्धकम् ।।
सार्वभौमस्य विहितं तद्दोषक्षयहेतवे ।
औरङ्गजेवपौत्राय दास्यामि निजकन्यकाम् ।।
इति तद्वचनं श्रुत्वा तस्मै प्रीत्या तु तेन वै ।
फर्कसाहप्रदत्तास्तु संदत्ता बहवो गजाः ।।
राजसिंह महाभाग राजराजसमर्पितान् ।
गजान् गृहाण चोन्मत्तानेतान् समरदक्षिणान् ।।
गजानादाय सहितस्तेन वै मारवेश्वरः ।
सह शीघ्रं समायातः सार्वभौमपुरं प्रति ।। ६३६
अजितसिंहनृपतिं समायातं निशाम्य तु ।
फर्कसाहस्तु संतोषपूर्णो भूत्वा तु तत्क्षणे ।
अवदुल्लखाननिकटे कथयामास वाक्यकम् ।।
अजितो विजितश्चास्ति त्वद्भ्रात्रा सत्वरं यतः ।
अतस्तस्मै मया प्रीत्या देशो दक्षिणसंज्ञकः ।।
दीयते मम वाक्येन त्वयापि शीघ्रमेव सः । ६३९
तत्र संप्रेषितव्यो हि समुत्साहपुरःसरम् ।।
एवं राजोक्तमाकर्ण्य तेनोक्तं किल तं प्रति । ६४०
अजितसिंहभूमीशमिलनोत्तरकालके ।
त्वदाज्ञया द्रुतं तत्र हस्नलीको गमिष्यति ।।
एवं वार्ताप्रलापे तु जायमाने समागतः ।
हस्नलीकः समानीय नृपं जोतपुरेश्वरम् ।।
तत्काले पातसाहेन समाहूतोऽन्तिके स्वयम् ।
स्वामात्यभ्रातृसहितो राजा समरदक्षिणः ।। ६४२

---

1. i. e, Ajit Sinha who actually gave his daughter in marriage with Farruksiyar. But the hostilities between the father-in-law and the son-in-law never ceased. After the Emperor's cold-blooded murder, he came to be known as "The murderer of the son-in-law, *Damadkush.*"

2. i. e. Husain Ali Khan,

3. Jodhpur and neighbouring area.

दूरतः प्रणतिं कृत्वा रत्नानि सुबहूनि च ।
तेन वै सार्वभौमाय दर्शितानि बहूनि च ॥
उक्तं च तिल्किला (१) चैका समानीताऽस्ति वै मया ।
त्वदर्थं भव त्वं शीघ्रमादायी (२) सर्वदा तया (३) ॥
इति राजोक्तमाकर्ण्य पातसाहेन तं प्रति ।
कथितं प्रीतिपूर्वं तु तत्कालसदृशं वचः ॥
एतावत्कालपर्यन्तं संस्थिता क्षितिपालता ।
ममाद्य त्वत्सुताप्राप्त्या संजाता सार्वभौमता ॥
इत्युक्त्वा स्वप्रकारेण नृपतेस्तस्य कन्यका ।
स्थापिता निजपत्नीनां मध्ये रूपसमन्विता ॥
सार्वभौमस्य दाक्षिण्यमौदार्यं चापि शूरताम् ।
विलोक्य परितुष्टस्तु जातो जोतपुरेश्वरः ॥
तस्यापि स्वस्मिन् सौहार्दं दृष्ट्वा चातिचमत्कृतम् ।
सार्वभौमोऽपि संजातः परितुष्टो महीपतौ ॥ ६५०
अजितस्य तु सम्मानं जायमानं दिने दिने (४) ।
संविधातुं च स्वोत्कर्षं जयसिंहेन भाषितम् ।
सुरत्राणान्तिके वाक्यं द्रुतं चित्तसुखप्रदम् ॥
औरङ्गजेवभूमीन्द्रे भूतलाद्‌तलं प्रति ।
गते सति यदा युद्धं संजातं तत्तनूजयोः ॥
तदा सर्वाणि रत्नानि राजयोग्यानि भूमिप (५) ।
गतानि सन्ति जट्टस्य भवने रणभूमितः ।
चूडामणेर्यथा तानि समायांति तथा कुरु ॥
ईर (६) भिन्नस्य जरले (७) वीरमाली (८) न शोभते ।
यथा तथा तु रत्नानि त्वद्भिमिन्नस्य मन्दिरे ॥ ६५५
इत्यामेरपतेर्वाक्यमाकर्ण्य भूमिपेन तु (६)।
त्वयैव जट्टविषये गत्वा सोऽत्र बलेन तु ॥
आनेयो न विलम्बस्तु कर्तव्यः सर्वभावतः ।
चूडामणेस्तु विध्वंसं कृत्वा नृपमणिर्भव ॥
मथुरायां पुरा जट्ट मुखविध्वंसनाय तु ।
त्वदीयैरेव वसतिः स्वयं संविहिता स्थिता ॥
इदानीमपि मद्वाक्यात्त्वया चूडामणेर्गृहात् ।
आनेयानि मदीयानि रत्नानि विविधानि च ॥
इति भूमिपतेराज्ञां शिरस्याधाय तत्क्षणे ।
तेनोक्तं तस्य निकटे द्रविणं दीयतां प्रभो ॥ ६६०
मह्यं द्रव्यस्य विरहात् सैन्यसम्पादनं क्वचित् (१०) ।
जायते भूमिनाथानां किं वाच्यमधिकं मया ॥
एवं राजोक्तमाकर्ण्य पातसाहेन तत्क्षणे ।
तस्मै संदापितं कोशान्नवलक्षमितं धनम् ॥
धनं लब्ध्वा महीनाथनिदेशेन तु सत्वरम् ।
चूडामणिं समानेतुं सेनया सह वै गतम् ॥
वर्षत्रयं यथाकामं तेन भूपेन वै समम् ।
युध्यता संस्थितं तत्र श्रान्तो राजा न चापि सः ॥६६४
एकदा चावदुल्लस्य मातुलेन (११) तदन्तिके ।
उक्त्वा संकथितं (१२) वाक्यं यथायोग्यं सुखावहम् ॥ ६६५
परिणामेन भूपानां सम (१३) युद्धान्न कस्यचित् ।
जयो भवति तस्मात्त्वं प्रणतो भव सत्वरम् ।
सार्वभौमाय मद्वाक्यादवदुल्लस्य वर्त्मना ॥
इति तद्वचनात्तेन दुर्गमध्ये स्वकं बलम् ।

---

(१) कन्यका । (कन्यका या तु तिल्किला) । (२) नारीसमन्वितः । (भार्याहीने त्वनादायी आदायी योषिदन्विते) । (३) M. त्वया । (४) दृष्ट्वेति शेषः । (५) M. ०पः । (६) इन्द्र० । (७) गृहे (इन्द्रे ईरः समाख्यातो जरलस्तु गृहे भवेत् । (८) पारिजाते वीरमाली ॥ (६) अतः परं श्लोको वा तदर्धं वा पतितमिति प्रतिभाति । यद्वा, उक्तमित्यध्याहार्यम् । (१०) अत्र नहीति पाठे अर्थः स्पष्टो भवेत् । (११) i. e. Sayyid Muzaffar Khan, Khan Jahan, then Governor of Ajmer. (१२) सम्प्रेषितम् इत्युचितः पाठः । (१३) M. समं ।

त्यक्त्वा समागतं शीघ्रमवदुल्लस्य सन्निधौ ।
आगत्य तेन कथितमवदुल्लं प्रति स्वयम् ॥ ६६८
नवाव जायते प्रीतः सार्वभौमो यथा मयि ।
तथोपायस्त्वया कार्यो मया तुभ्यं तु भाटकम् ॥
देयं कोटिमितं द्रव्यं यावज्जीवं त्वदन्तिकात् ।
अन्यत्र नैव गन्तव्यं किं वाच्यमधिकं मया ॥
रत्नानि यानि नीतानि संस्थितानि मया पुरा ।
तानि चानीय देयानि सार्वभौमाय सत्वरम् ॥
इति चूडामणेर्वाक्यमाकर्ण्य तेन तत्क्षणे ।
सार्वभौमान्तिके गत्वा योजयित्वा करद्वयम् ।
उक्तं वाक्यमिदं सर्वान् श्रावयित्वा स्वयं मुखात् ॥
त्वत्प्रतापानलज्वालासंगतो भ्रष्टपौरुषः ।
चूडामणिः समायातो द्रष्टुं त्वां धरणीश्वर ॥
महीनाथेक्षणात् पापविलयो जायते यथा ।
तथा दुर्गतिनाशस्तु जांदाराणां(१) جاندار प्रजायते ॥ ६७५
आज्ञा चेत् स मया चात्र कर्तुं प्रणतिमुत्तमाम् ।
आनेयो मम संकोचो न कार्यः कोऽपि वै प्रभो ॥
सार्वभौमेन सचिवसंकोचेन न कार्यकम् ।
कर्तव्यं स्वहितं कार्यं स्वातन्त्र्येण निरर्गलम् ॥
परतन्त्रोऽस्ति यो राजा न तस्य केनचित् क्वचित् ।
प्रमाणं मन्यते वाक्यं सत्यमेतद्ब्रवीम्यहम् । ६७८
इत्यात्मसचिवोक्तं तु वाक्यमाकर्ण्य तेन तु ।
कथितं प्रीतिपूर्वं तु तत्कालसदृशं वचः ॥
शरणागतसंत्राणं कुरुते यो न पार्थिवः ।
तस्य पुण्यं तु निखिलं हिमवत् प्रविलीयते ॥ ६८०
चूडामणिस्तु भूपेन समं युद्ध्वा यथाविधि ।
समागतोऽस्ति मां द्रष्टुं यतस्तं मम सन्निधौ ।
समानय विलम्बं मा(२) कुरु नीतिसमन्वित ॥
एवमात्मप्रभोर्वाक्यादवदुल्लेन तत्क्षणे ।
चूडामणिः समानीतो नानामणिसमन्वितः ॥
आगतं मणिभिः सार्धं तं चूडामणिजट्टकम् ।
विलोक्य परितुष्टस्तु संजातः पृथिवीपतिः ॥
चूडामणे त्वया भीतिर्मन्तव्या कापि नो मम ।
यथापूर्वं तु सेवायां स्थातव्यं सर्वभावतः ॥ ६८५
अस्माकं सेवनं येन क्रियते सर्वभावतः ।
जायते सर्वदा भद्रं तस्याभद्रं न जायते ।
इत्युक्त्वा जयसिंहस्तु समाहूतो निजान्तिके ॥
यमा(३)नेतुं त्वया तत्र गत्वा युद्धं महत्तरम् ।
विहितं सोऽद्य त्वद्भीत्या मम पादतलेऽमले ॥
पतितोऽस्ति मयैतस्मै दत्तमस्त्यभयं द्रुतम् ।
आगन्तव्यं त्वया चात्र विलम्बो न विधीयताम् ॥
इत्युक्तः(४) पातसाहस्य निदेशेन समागतः ।
जयसिंहः सार्वभौमनिकटे प्रीतिपूर्वकम् ॥
भूमिपेनापि नृपतिः (५) सुप्रीत्या प्रविलोकितः(६) ।
उक्तं च तस्य निकटे प्रीतिपूर्वमिदं वचः ॥
रामसिंहेन वै पूर्वं गत्वा वै ब्रह्मपुत्रके ।
अस्माकं पूर्वजातानां कृतं कार्यं हृदि स्थितम् ॥
तत्पुत्रेणापि वै कृष्णसिंहेनापि प्रसाधितम् ।
अस्माकं पूर्वजातानां नितरां मनसेप्सितम् ॥
त्वत्तातेनापि वै पूर्वं विष्णुसिंहेन साधितम् ।
अस्माकं पूर्वजातानां कार्यं स्थैर्यप्रदायकम् ॥
त्वयेदानीं तु चौतस्य(७) समानयनकर्मणा ।
कार्यं तेभ्यो विशिष्टं हि कृतमस्ति सुबुद्धितः ॥ ६९५

---

(१) जांदारः प्राणिनि स्मृतः । (२) M. मां । (३) M. समा । (४) M. ०क्त्वा । (५) M. ०तेः । (६) M. ०कृतः । (७) M ०न्य । The Jat campaign lasted from Sept. 1716 to April, 1718. Ajit Sinha started on the 25th Sept., 1716, which was the Dasahara Day.

शीघ्रं चाशक्यमन्येषां यतस्तस्मान्मयाधुना ।
तुभ्यं संदीयते राजन् राजेन्द्रपदवी शुभा ॥
अद्यारभ्य जनाः सर्वे राजेन्द्रेति त्वदन्तिके ।
वदिष्यन्ति ममादेशात् सत्यमेतद्ब्रवीम्यहम् ॥
इति राजोक्तमाकर्ण्य परितुष्टः स भूपतिः ।
करौ संयोज्य शिरसि तस्थौ तन्न्यस्तलोचनः ॥६९८
राजा त्वमसि चास्माकमहं भृत्योऽस्मि ते प्रभो ।
वक्तव्यं यत्त्वया राजन् तत् कार्यं सर्वदा मया ॥
आमेराधिपतिं(१) चैवं भाषन्त(२) मवलोक्य तु ।
परितुष्टः सार्वभौमो ददौ गजचतुष्टयम् ॥ ७००
गजानादाय नृपतिर्गतः स्वभवनं प्रति ।
फर्कसाहोऽपि कान्तानां पुरं प्रति गतः स्वयम् ॥

× × ×

परितुष्टे महीपाले परलोकस्य साधनम् ।
कुरुते यो न वै यज्ञं विभवे सति सोऽधमः ॥
इति निश्चित्य भूनाथं पृष्ट्वा तेन तु श्रद्धया ।
यागः संविहितो देवब्राह्मणानां प्रियंकरः ॥
एतस्मिन् समये मौजदीनविध्वंसनोद्भवात् ।
पातकाज्जातरोगेण नितरां कवलीकृतः ॥
अर्शसा(३) पुरुषाणां तु शरीराकर्षणेन तु ।
फर्कसाहः समुत्साहयुक्तोऽप्युत्साहवर्जितः ॥
अभूद्रोगवशात्तेन लोकानां प्रणतिस्थले । ७०७
कञ्चित् कालं न चायातमशक्तेन तदा पुरे ।
कोलाहलस्तु संजातो नृपादर्शनतो ध्रुवम् ॥
व्याकुलान् वीक्ष्य वै लोकानवदुल्लेन भूमिपम् ।
प्रत्युक्तं भवता गेहाद्बहिर्नागम्यते कुतः ॥ ७०८

अनागमनतो राजन् पुरस्थास्तव(४) मानवाः ।
व्याकुला [ः] किल जायन्ते हिमात्
कोकनदा(५) इव ॥७१०
एवमाकर्ण्य वचनमवदुल्लस्य तेन तु ।
उक्तं तदन्तिके वाक्यं यथार्थं प्रीतिपूर्वकम् ॥
अर्शसा पापरोगेण कृतमाक्रमणं मम ।
यद्दिनात्तद्दिनारभ्य (?) बहिर्गन्तुं न शक्यते ॥
न रात्रौ जायते निद्रा न दिने जायते क्षुधा ।
कार्यं कर्तुं न सामर्थ्यमस्ति संप्रति मे त्वया ।
द्रुतं कोऽपि भिषक्श्रेष्ठः समानेयो मदन्तिके ॥
इति राजोक्तमाकर्ण्य वैद्यस्यान्वेषणाय तु ।
अवदुल्लः समायातो यावद्वै मन्दिराद्बहिः ॥
तावच्चादृष्टवशतो रोगनिर्मूलनाय तु ।
वाक्पटुर्वाग्भटोद्गाता सुवेषः श्रुतसुश्रुतः ॥
कृतकर्मा भिषक्श्रेष्ठः फेरंगात् कोऽपि चागतः(६) ।
स तेन सार्वभौमस्य निकटे विनिवेदितः ॥
महीनाथ त्वदादेशान्मकरान्वेषणाय तु ।
गतं स्थितं मया चायं लब्धोऽस्ति सुविचक्षणः ।
एनं पश्य यथाकाममौषधं चापि कारय ॥
इति तद्वचनं श्रुत्वा महीपेन तदन्तिके ।
प्रीतिपूर्वन्तु कथितमर्शोघ्नमौषधं त्वया ॥
कर्तव्यं यदि रोगस्य शान्तिर्मे संभविष्यति ।
तर्हि भाग्यं वर्धनीयं तव वै सर्वथा मया ॥ ७२१
सद्वैद्यं प्राप्य यो राजा न करोति गदक्षयम् ।

---

(१) M पत्नौ । (२) भाषमाणमिति साधु । (३) According to some chroniclers, Fistula, and not piles. (४) M. तव । (५) पुंस्त्वं चिन्त्यम् । (६) William Hamilton, the English surgeon. He treated Farruk-siyar by the 16th October, 1715.

स कथं समरे ध्वंसं शत्रूणां संविधास्यति ।। ७२२
योऽपि वैद्यो न राजानं रोग-व्यालेन दंशितम् ।
स्वस्थं करोति किं तेन कर्तव्यं क्षितिमण्डले ।।
इति भूमीशवचनं भिषजा (१) श्रुतिसात् कृतम् ।
ततो भूमीशनिकटे तेन दत्तं समुत्तरम् ।। ७२४
ममौषधेन भविता तव रोगस्य संक्षयः ।
यथा तथैव नितरां भविता षण्डता तव ।।
अङ्गीकृत्यापि षण्डत्वं यदि वै रोगसंक्षयः ।
आशा (२) स्यते त्वया तर्हि कार्यतामौषधं स्फुटम् ।।
मकरस्येदृशं वाक्यं श्रुत्वा राज्ञा तु तं प्रति ।
कथितं मरणापेक्षा रम्यास्ति किल षण्डता ।। (३)
तर्हि केऽपि न जीवेरन् भूमौ वर्ष [ध ? व] राधवम् ।
यथा कृत्वा न मे मृत्यू रोगादस्मात् प्रजायते ।
तथा त्वया विधातव्यं संकोचो न विधीयताम् ।।७२६
एवं सर्वमहीपानामधिपस्य निदेशकम् ।
लब्ध्वा वैद्येन तत्काले संछिन्नं गुदकीलकम् ।
तस्य संछेदनाद्राजा जातः पीडाविवर्जितः ।। ७३१
निवृत्तोपि॥ च रोगेण राजकार्यं यथाविधि ।
चकार पूर्ववत् सर्वं परितुष्टेन चेतसा ।।
जलदस्य तु सम्बन्धाद्दमयानस्य (४) वै प्रभा ।
आविला जायते यद्वत्तथा रोगेण वै नृणाम् ।।
रात्रिक्षयाद्यथा स्वास्थ्यं जायते किल चक्रयोः ।
रोगक्षयात्तथा नृणां जायते सुखमुत्तमम् ।।
क्षीणरोगस्य भूजानेर्गुदकीलस्य कर्तनात् ।
संजाता पुंस्त्वहानिर्या तया (५) स्त्रीसेवनादिषु ।
विमुखं मानसं जातं यतेरिव निरन्तरम् ।। ७३६

एकदा पुस्तकं दृष्टं स्वकीयं भूमिपेन तु ।
तत्रेदं वचनं प्राप्तं सर्वप्राचीनसम्मतम् ।।
सन्नतस्य (६) न यस्यास्ति नाजमो (७)
मलये (८) शुभः ।
न सुखं लभ्यते तेन परत्रेह च जातुचित् ।। ७३८
औरसो यस्य तनयो जायते न हि भाग्यतः ।
क्षेत्रजस्तेन संपाद्यः पुत्रो निरयभीतिनुत् ।।
एवं ज्ञात्वा तु शास्त्रार्थं क्षेत्र [ज्ञ? ज] सुत (९)
लब्धये ।
एकदा खानदौलाख्यः स्ववेशेन यथाविधि ।
अवरोधजनानां तु सन्निधौ प्रहितः स्वयम् ।। ७४१
तत्र चाजितसिंहस्य कन्यया पतिदेवया ।
पतिभिन्नजनः सम्यक् प्रकारेण सुताडितः ।।
अवरोधस्थिताभिश्च दासीभिस्तदनुज्ञया ।
बंधितः कज्जलं तस्य मुखबिम्बे प्रलेपितम् ।
दध्ना साकं बन्धयित्वा प्रेषितो नृपतिं प्रति ।।
तदारभ्य तु सर्वाभिः स्त्रीभिस्तस्य तु षण्डता ।
ज्ञाता (१०) मद्वचनात्तत्र गतो वद्धो (११) यतस्त्वयम् ।।
अवरोधजनैरत्र प्रेषितोऽस्ति मदन्तिके ।
अतो मयापि चैतस्य वर्धनीयं तु गौरवम् ।।
एवं विनिश्चयं कृत्वा स्वदोषमार्जनाय तु ।
भृशं राज्ञः प्रियतरो जातः सोऽपि त्रपोज्झितः ।
ईदृशं नृपतेः शीलं ज्ञातं सर्वैस्तु राजभिः ।।
तत्कालं भूमिनाथेन हस्नलीखानकं प्रति ।
उक्तं त्वया दक्षिणस्यां गत्वा शीघ्रं मदन्तिके ।
दावताखानसंज्ञस्य (१२) प्रेषणीयं हि मस्तकम् ।।७५०

(१) M जां। (२) M. आशां०। (३) अतः परं किञ्चित् पतितमिति भाति। (४) सूर्यस्य। (५) M. ०था। (६) सन्नतस्तु भवेद् राज्ञि। (७) तनयः। नाजमस्तनये भवेत्। (८) मलयो भूतले भवेत्। (९) M ०ख। (१०) ज्ञात्वा। (११) अतः परं किञ्चित् पतितमिति प्रतिभाति।

(१२) श्र। Daud Khan was Julfiqar's deputy in the South. He was secretly instructed to kill Husain Ali or Mir Bakshi, the reward being succession to the six Subahs of the South.

यावत्तस्य न चायाति मस्तकं मम सन्निधौ ।
तावन्न जायते निद्रा मयि सर्वेषु संस्थिता ।। ७४९
जुल्फिकारस्य मरणं श्रुत्वा तेन ममोपरि ।
विद्वेषः क्रियते नूनं शत्रुतोऽप्यधिकः सदा ।। ७५०
स्वविद्वेषकरं भृत्यं न घातयति यो नृपः ।
तस्य तच्छ्रयतो मृत्युर्जायते नात्र संशयः ।।
चेत्त्वया दावताखानहस्ततो मम संत्त्रयः ।
कांद्यते तर्हि मा याहि गम्यतामन्यथा द्रुतम् ।।
इत्यात्मस्वामिवाक्येन प्रेरितः सायकप्रभः ।
हस्नलीखानकः शीघ्रं गतो वै दावतं प्रति ।।
हस्नलीखानगमनत्तणवादितदुन्दुभेः ।
स्वनं श्रुत्वा तु जलदप्रतिमं भूपसन्निधौ ।
जयसिंहेन प्रहितं लिखित्वा पत्रमुत्तमम् ।।
नमुचिस्तु यथा दैत्यः शक्रेण निहतः स्थितः ।
हस्नलीकं तथा चैनं दावतो निहनिष्यति ।।
इति तद्वाचयित्वा तु प्रीतिपूर्वं तु सत्वरम् ।
तस्मिन्नेव त्तणे राज्ञा जयसिंहस्य वाक्यतः ।
पत्रं संप्रेषितं चैकं दावताखानकं प्रति ।।
जुल्फिकारस्य विध्वंसकारकस्यानुजो मया ।
दक्षिणस्यां तु त्वद्द्वारा निहन्तुं प्रेषितोऽस्ति वै ।।
त्वया मद्वचनाच्छीघ्रं हस्नलीखानकस्त्वयम् ।
प्राणभूतोऽवदुल्लस्य हन्तव्यो बुद्धिपूर्वकम् ।।
एतस्य मरणं श्रुत्वा मम दौर्बल्यसाधकः ।
अवदुल्लोऽपि विप्राणः संभविष्यति सत्वरम् ।।
अवदुल्ले गतप्राणे जाते त्वं संभविष्यसि ।
ममामात्यो जगद्वन्द्यः शक्रस्येव बृहस्पतिः ।। ७६१
यावत्त्वया न साचिव्यं मम वै संविधीयते ।
तावन्मया सार्वभौमपदवी सुस्थिरा स्वका ।। ७६२

न मन्यतेऽधिकं किं वै लेख्यं तस्मात्त्वया द्रुतम् ।
हस्नलीको विधातव्यो विप्राणो वचनान्मम ।।
इति संगच्छता तेन हस्नलीकेन चैकदा ।
नर्मदायास्तटे रम्ये कर्णदः सन्नतस्य (१) तु ।।
संदृष्टस्तस्य निकटे कस्येदं चास्ति पत्रकम् ।
कुत्र यातीति संपृष्टं तेन तस्मै समर्पितम् ।।
इदं दावतखानाय सार्वभौमेन प्रेषितम् ।
वर्तते पत्रममलं दृश्यतां सर्वभावतः ।।
इत्युक्त्वा वाचितं तेन तत् पत्रं पत्रदः स्वके ।
सद्मे संस्थापितस्तस्मै द्रविणं चापि दापितम् ।।
तत् पत्रं यत्नपूर्वं तु स्थापितं तादृशं पुनः ।
कृत्वा पत्रान्तरं शीघ्रं दावताय तु प्रेषितम् ।
तादृशं चापरं पत्रं स्वाग्रजाय तु प्रेषितम् ।
दावताखान निकटे तेनोक्त्वा प्रेषितं वचः ।।
अवदुल्लो यथा मान्यो ममास्ति त्वं च वै तथा ।
असि तस्य यथा चाहमस्मि चाहं तवापि वै ।।
त्वया चेत् स्थीयते दुर्गमध्ये तर्हि क्वचिन्मया ।
बहिर्देशे स्वयं स्थेयं त्वदाज्ञावशवर्तिना ।।
सार्वभौमदिदृत्ता चेदस्ति तर्हि यथासुखम् ।
गम्यतां निखिलां सेनां गृहीत्वा ❀चेन्द्रप्रस्थकम् ।
दुर्गमध्ये मया स्थेयं रोचते यत्तद्विधीयताम् ।।
अनित्यं देहमासाद्य परप्रेषणया हि यः ।
परप्राणवियोगाय यतते न ततोऽधमः ।।
जीवः सर्वशरीरेषु कृतगेहो निरञ्जनः ।
शरीरस्य विनाशेन न नाशं याति कुत्रचित् ।। ७७४
दहलस्य विनाशेन खर्णस्य न जायते ।
यथा त्तयस्तथा देहनाशादात्मा न नश्यति ।। ७७५

---

(१) राज्ञः । ❀ M. ते ।

परस्य यस्तु विद्वेषं कुरुते तस्य चेश्वरः ।
द्वेषं विप्रद्रुहो दैत्या हन्यन्ते हरिणा न किम् ॥ ७७६
ज्ञायते तव सामर्थ्यं मया सर्वात्मना भृशम् ।
अलौकिकं त्वया साकं योद्धव्यं हि कथं मया ॥
उच्छिष्टभक्षणाद् यस्य चक्षुष्मन्तश्च मानवाः ।
जात्यन्धाश्चापि जायन्ते तव साकं कथं मम ।
संग्रामकरणाद्भूमौ भविष्यति जयो भृशम् ॥
ज्ञात्वा मया प्रभावं ते युद्धं नैव विधीयते ।
त्वया यत् क्रियते तद्वै क्रियतामविलम्बतः ॥
अवदुल्लानुजस्येदं वचनं श्रुतिगोचरम् ।
कृत्वा तेन न किंचिद्वै कथितं वीरमानिना ।
ईश्वरप्रणतिं कृत्वा युद्धार्थी निर्गतं बहि [:] ॥
अवदुल्लानुजो हन्तुमागतोऽस्त्यधुना हि माम् ।
अहं च यामि तं हन्तुं युद्धोद्योगो विधीयताम् ॥
युक्तं न बद्धशस्त्राणां मरणं भवने यतः ।
अतः समरभूमौ तु कांक्ष्यते मरणं मया ॥
ब्राह्मणानां यथा क्षेत्रे मरणं मुक्तिदायकम् ।
तथाऽस्माकं हि मरणं वर्तते समराङ्गणे ॥
नर्मदासलिलं पीत्वा कातरस्य प्रकारतः ।
इन्द्रप्रस्थं प्रति कथं यातव्यं क्षुद्रभृत्यवत् ॥
एतावत्कालपर्यन्तं मम युद्धे पराजयः ।
न जातोऽस्ति कथं चाद्य यातव्यं तमजित्य वै ॥
एवं निर्धारणं कृत्वा स्वकीयान् सर्वसैनिकान् ।
समाहूय गजे स्थित्वा हस्नलीकस्तु तेन वै ।
युद्धार्थं तु समाहूतः संग्रामरसिकेन तु ॥
संग्रामार्थं समायात-वीरस्य परितोषणम् ।
कुरुते यो न संग्रामे तस्य जन्म निरर्थकम् ॥ ७८६

तस्मात्त्वया स्वकं सर्वं बलमानीय युध्यताम् ।
मयापि निजसामर्थ्याद्योद्धव्यं प्रीतिपूर्वकम् ॥ ७९०
इति दावतखानस्य वाक्यमाकर्ण्य सत्वरम् ।
नर्मदां सर्वकामानां दायिकां शम्भुसम्भवाम् ॥
प्रणिपत्य यथाशास्त्रं भक्तिभावेन सादरम् ।
अवदुल्लानुजो योद्धुं गतः प्रोत्साहपूर्वकम् ॥
एवं दिनेषु गच्छत्सु द्वयोः सेनासमागमः ।
एकस्मिन् दिवसे जातः शूराणां हर्षवर्धकः ।
तयोर्युद्धं तु तुमुलं जातं भीरुभयप्रदम् ॥
अकस्माद्दावताख्यस्तु द्विरदोपरि संस्थितः ।
हस्नलीखानसेनास्थचालितैरग्नियन्त्रकैः ।
पातितो धरणीपृष्ठे स्वर्गतो भुक्तपुण्यवत् ॥ ७९५
दावतस्य तु गौ गात्रान्मषीपात्रस्थ-तूलवत् ।
बहिर्निःसारिते प्राणे हस्नलीकोऽनलप्रभः ॥
तदीयां वाहिनीं सर्वां समाश्वास्य यथाविधि ।
पुरप्रवेशमकरोद्योगीव विगतव्यथः ॥
ईदृशं विक्रमं श्रुत्वा हस्नलीकस्य संगरे ।
फर्कसाहो भयं मेने जहौ जह्नु(१) तदग्रजः ॥
जयसिंहेन निखिलं हस्नलीखानकस्य तु ।
वृत्तं श्रुत्वा समायातं यावद्भूपतिसन्निधौ ॥
तावत्तेन महीनाथनिकटे स्वस्य पत्रकम् ।
प्रेषितं सर्वलोकानां सन्तोषस्य तु साधकम् ॥
भूमीन्द्र त्वत्प्रतापेन मया दावतसंज्ञकः ।
जारीक(२) सहितो युद्धे घातितोऽस्ति रणाङ्गणे ॥
तव कण्टकभूतस्तु सांप्रतं सुरमा(३) त्वया ।
निशासु संविधातव्या चिन्ता कार्या न कापि गौ ।
अतः परं यथाकामं दरदः संविधीयताम् ॥ ८०३

(१) त्रासम् । त्रासे जह्नुः समाख्यातः । (२) सेनापति । सेनापतौ तु जारीकः । (३) निद्रा । निद्रायां सुरमा भवेत् ।

यथा संदृश्यते स्वच्छे* तामजे(१) मुखमण्डलम् ।
सद्धभेल्यां(२) तथा नृणां शूरता चाप्यशूरता ॥ ६०४
इति तत्पत्रमाकर्ण्य भूपेन नृपतेर्मुखम् ।
विलोकितं कथं कार्यं कथमीशेन वै कृतम् ॥
इच्छा बलीयसी चैशी पुंप्रयत्नो निरर्थकः ।
इत्युक्तं तु समुत्थाय जयसिंहेन तत्क्षणे ॥
तत्काले खानदौलाख्यः सार्वभौमस्य सन्निधौ ।
तदीयं चारिबलं वृत्तं (?) वक्तुं शीघ्रं समागतः ॥
सूर्य-संस्पृष्ट-कुमुदसदृशं तस्य चाननम् ।
दृष्टं तेन तु राजानं प्रत्युक्तं चाद्य श्रीमताम् ।
क्षुब्धं संदृश्यते चित्तं किमर्थं तत्तु कथ्यताम् ॥
इति तद्वचनं श्रुत्वा हस्नलीकस्य चाखिलम् ।
वृत्तं संवर्णितं राज्ञा प्रीतिपूर्वं तदन्तिके ॥
हस्नलीकस्य समरे विजयश्रवणेन तु ।
मम चित्तं तु संक्षुब्धं जातमस्ति कथं हि सः ।
साग्रजो याति वै नाशं तद्वाच्यमविलम्बतः ॥ ६११
यावद्द्वयोर्मया नाशो जन्यते नहि सर्वथा ।
तावन्मे सुस्थिरा नास्ति जगत्यां सार्वभौमता ॥
मदीया ये स्थिताः पूर्वमाप्ता भृत्याश्च सर्वदा ।
ताभ्यां ते स्फोटिताः सन्ति नीताः सन्ति
च स्वान्तिके ॥
पार्वतीयास्तथा भूपा जालहादि(३) प्रयच्छणात् (?) ।
स्वकीया विहिताः सन्ति सर्वत्र च स्वकीयकाः ।
बन्धवः प्रहिताः सन्ति देशेषु च पुरेषु च ॥
अजितसिंहभूपोऽपि स्वाधीनो विहितोऽस्ति नौ ।
ताभ्यां किं क्रियतेऽस्माभिर्ज्ञायते†न हि तत् पुनः ॥
६१६

अयमामेरनाथोऽस्ति ममैको हितसाधकः ।
सर्वेषां क्षत्रबन्धूनां मध्ये द्वित्राश्च याजताः (?) ।
हितसंसाधकाः सन्ति तयोर्वै सन्ति चाखिलाः ॥
तावुभौ ज्वाल-मसमौ (४) बन्धयित्वा यदा मया ।
कारागृहे प्रापणीयौ तदा मे सार्वभौमता ।
ज्ञातव्या सर्वलोकैस्तु भवद्भिश्च विशेषतः ॥
वधं विधाय च तयोराप्ताः सन्ति च ये तयोः ।
ते मया सर्वराजानः (?) पार्वतीयाश्च काविले ॥६२०
प्रापणीया यदा शीघ्रं तदा मे शासनं जनै [:]।
अखण्डं संविधातव्यं सत्यमेतन्मयोच्यते ॥
यावज्जालह (५) विध्वंसकारको मृगनायकः ।
न दृष्टिपथमायाति तावत् फेरुः प्रवल्गति ॥
श्रुत्वेत्थं वचनं तेन फर्कसाहस्य तं प्रति ।
जयसिंहेन कथितं तत्कालसदृशं वचः ॥
कोनाहादिभिः संयुक्तं चंदादि (६) भक्षदानतः ।
कुतो न क्रियते नाशस्तयोः सर्वहिताय च ॥
दशरात्रोषितं कांस्ये सर्पिर्मधु विषायते ।
इत्यादिवचनात् कांस्यपात्रे दशदिनावधि ॥ ६२५
स्थापयित्वा घृतं क्षौद्रं तच्च† भक्षेण नौ समम् ।
भोजयित्वा तयोर्नाशः क्रियतां स्वहिताय च ॥
यत्रैकस्य वधात् सौख्यं बहूनां जायते भुवि ।
तत्रैकहनने कोऽपि दोषो नास्त्यनुमात्रकः ॥
तस्मात् सर्वात्मना दुष्टं सानुजं स्वसुखाय तु ।
उर्वीनाथ द्रुतं शूरमानिनं चावदुल्लकम् ॥
एनं नाशय पश्चात्त्वं तस्य नाशं विचिन्तय ।
तिल्कं (७) हत्वा तु वरसं (८) जहि त्वं
स्वस्य भृत्यकम् ॥ ६२६

(१) दर्पणे । दर्पणे तामजः प्रोक्तः । (२) युद्धभूमौ । (३) स्याज् जालहस्तु द्विरदे । (४) ज्येष्ठ-कनिष्ठौ । ज्येष्ठे ज्वालः कनिष्ठे तु मसमः कथ्यते बुधैः । (५) द्विरदः । (६) चंद—··· । (७) वृद्धं । वृद्धे तिल्कं समाख्यातं । (८) तरुणं । तरुणे वरसो भवेत् ।

* M. स्वजे । † M. तद्वा ।

अहत्वा निकटस्थं यो दूरस्थं हन्तुमिच्छति ।
अरिं चार्मं (१) न चाप्नोति द्रुतं चाप्नोति
मामसम् (२) ॥
तस्मादादौ त्वया चायमवदुल्लो बलान्वितः ।
हन्तव्यस्तस्य हननाद्रत्नलीकोऽपि संक्षयम् ।
गमिष्यत्यधिकं किं नौ वक्तव्यं तव सन्निधौ ॥
इति वाक्यं समाकर्ण्य जयसिंहस्य तत्क्षणे ।
कोनाह(३) मिश्रितं किञ्चिद्भक्ष्यं चातिचमत्कृतम् ॥
कृत्वा पात्रे तु सौवर्णे तद्गेहे प्रापितं द्रुतम् ।
अत्यन्तप्रीतिपात्रस्य द्वारा प्रीतिपुरःसरम् ॥
ततकालं रत्नचंदेन कथितं स्वप्रभुं प्रति ।
मया रात्रौ तु संदृष्टः स्वप्नः कोऽपि चमत्कृतः ॥ ६३५
अद्यारभ्य त्वया तस्मात् यत् किञ्चिद्भक्ष्यमात्रकम् ।
अन्यस्मै भोजयित्वैव भोक्तव्यं न तु चान्यथा ॥
तत्कालमेव रुचिरं महीपप्रहितं हि तत् ।
समानीतं हि भक्षाणां मध्ये सर्वोत्तमं शुभम् ॥
मुद्रया मुद्रितं सानभाजनोपरि संस्थितम् ।
यास्तालाषयिकभूयास्तासरदूसूरं रादिभिः(?) ॥
संयुक्तं वासनी (४) तोषदायकं चारुहा(५)ःप्रियम् ।
आगत्य राजभृत्येन नितरां तत्प्रियेण तु ॥
तत्कालं प्रणतिं कृत्वा समुत्थाय यथासुखम् ।
कृत्वा तु हस्तयोस्तद्वै तस्मात् किंचित्तु सत्वरम् ॥
दत्तं भोक्तुं स्वभृत्याय सर्वं स्वार्थं तु स्वान्तिके ।
स्थापितं भक्षणात्तस्य राजभृत्यस्य पश्यतः ।
ममार चावदुल्लस्य भृत्यः कर्मसुदक्षिणः ॥
सुरत्राणस्य कापट्यं दाक्षिण्यं सचिवस्य तु । ६४२
ज्ञात्वा महीपभृत्यस्तु त्रपानामितमस्तकः ।
अवदुल्लमपृष्ट्वैव गतो नौ राजसद्मनि ॥
तदारभ्य समारब्धमवदुल्लेन भोजनम् ।
स्वसद्मजातभक्षस्य व्यावृत्तिस्तु यतस्ततः ॥
समागतस्य भक्षस्य विहिता रत्नचन्द्रकः ।
भूषणैर्भूषितो भव्यैः प्रीतिवाक्यैश्च संस्तुतः ॥
अद्य त्वत्स्वप्नकथनान्ममानिष्टस्य संक्षयः ।
यतो यातोऽस्त्यतस्त्वं हि ममाप्तोऽसि न संशयः ॥
तदारभ्य भयं जातं तस्य तत्परिहानये ।
सेनामादाय सर्वत्र सन्नह्य गच्छता स्थितम् ॥ ६४७
मुख्यामात्यस्य चैवं तु शीलं दृष्ट्वा करद्वयम् ।
योजयित्वा तु कथितं राजानं प्रति सस्मितम् ।
जयसिंहेन सततं महीपहितकारिणा ॥
लोकपालांशसंभूत महीपाल महाभुज ।
अमात्यवशगो भूत्वा गम मा[illegible]दमनं प्रति ।
अमात्यं वशगं कृत्वा जिनाहं परिपालय ॥ ६५०
प्रबला यस्य जायन्ते सन्नतस्य तु मन्त्रिणः ।
तस्य राज्यं न तद्धस्ते स्थातुं संदीयते हि तैः ॥
सुरथो मन्त्रिभिः किन्न विहितो विपिनालयः ।
इदानीं मन्यते नैव भवता मम भाषितम् ॥
यदा त्वं मन्त्रिभिर्बद्धा दातव्योऽसि बलेन नौ ।
कारागृहे तदा वाक्यं संस्मरिष्यसि नौ मम ॥
एवं तदुक्तमाकर्ण्य महीपेन तदन्तिके ।
को नौ समभवत् पूर्वं राजा नौ सुरथाभिधः ।
मन्त्रिभिः स कथं राजा प्रहितो विपिनं प्रति ॥
तत्र गत्वा च किं तेन विहितं स्वहिताय तु ।
एतत् सर्वं समासेन ब्रूहि त्वं मम सन्निधौ ॥ ३५६

---

(१) जयं । जये चार्मं समुद्दिष्टम् । (२) पराजयं । मामसस्तु पराजये । (३) विष । (४) नासिका । नासायां वासनी प्रोक्तं । (५) नयन । चारुहा नयने भवेत् ।

इति राजोक्तमाकर्ण्य जयसिंहेन तं प्रति ।
कथितं चैत्रवंशोत्थः सुरथः कोऽपि पार्थिवः ॥
मन्त्रिणः प्रबलास्तस्य संस्थिता दुष्टबुद्धयः ।
तैरेव तस्य कोशस्तु निखिलो लुठितः स्वयम् ॥ ६५८
हृतकोशं तु तं ज्ञात्वा मन्त्रिभिस्तस्य वैरिभिः ।
युद्धं कर्तुं समायातं सबलैरुद्यतायुधैः ॥
विजितः स तु भूमीशो भवने स्थातुमक्षमः ।
आखेटकस्य व्याजेन वाचालोपरि संस्थितः ।
करदै रहितः शीघ्रं विपिनं प्रति संगतः ॥
तत्रैकस्य मुनेर्दृष्टमाश्रमं* तेन शोभितम् ।
मृगैर्बहुविधैर्भव्यैर्नानापुष्पैश्च मण्डितम् ॥
अभिवाद्य मुनिश्रेष्ठं तं तेन तत्र संस्थितम् ।
तत्रैकस्तेन संदृष्टो वैश्यः शोकसमन्वितः ।
हृतद्रव्यस्तनूजैश्च बन्धुभिश्च निराकृतः ॥ ६६३
समानशीलव्यसनवत्त्वेन तु तयोर्द्वयोः ।
संजाता प्रीतिरतुला दम्पत्योरिव तत्र तु ॥
ताभ्यां तत्र तु संपृष्टः स मुनिः करुणान्वितः ।
आवयोर्येन वै शीघ्रमापच्छेदः† प्रजायते ।
तथोपायस्त्वया शीघ्रं वक्तव्यः प्रीतिभावतः ॥
इति वाक्यं तयोः श्रुत्वा कथितं तेन वै तयोः ।
निकटे द्वेष-रागाभ्यां रहितेनामलात्मना ॥
साह्वी (१) पूजनं कार्यं युवाभ्यां भक्तिभावतः ।
तस्या वरप्रसादेन युवयोः संभविष्यति ।
आपद्ध्वंसस्तु नितरां सर्वार्थप्रतिपादकः ॥
इत्याकर्ण्य मुनेर्वाक्यं ताभ्यां वै भक्तिभावतः ।
देवीपूजनमारब्धमापत्संघनिवर्तकम् ।
वत्सरत्रयपर्यन्तं वर्णाश्रमप्रकारतः ॥ ६७०

परितुष्टा तु संजाता ततः संपूजनात्तु सा ।
तया तयोरन्तिके तु कथितं वचनं त्विदम् ॥
युवाभ्यां भक्तिभावेन यद्वै नियमपूर्वकम् ।
अर्चनं विहितं चास्ति तेनाहं प्रीतिपूर्वकम् ।
युवाभ्यां संप्रयच्छामि वरमापद्विघातकम् ॥
एवमाकर्ण्य सह्वीवचनं सन्नतेन तु ।
अत्र तत्रापि मे राज्यमस्तु वैरिविवर्जितम् ॥
इत्युक्तं मम कैवल्यं जायतामिति भाषितम् ।
वैश्येन राज्ञा स्वगृहे समागत्य विरुद्धकान् ॥
निहत्य सचिवान् राज्यं विहितं हृतकंटकम् ।
अकरोत्तेन चाग्रेऽपि दमयानस्य(२) मन्दिरे ॥
अवतीर्य विधातव्यमस्ति राज्यमकण्टकम् ।
वैश्यो देहं समुत्सृज्य संजातस्तु विदेहभाक् ॥
एवं तन्मुखतो वाक्यं श्रुत्वा तेन महीभुजा ।
अस्माभिरपि शर्वाणीप्रीतये भक्तिभावतः ।
कर्तव्यो मनह(३) द्वारा चण्डीपाठो यथाविधि ॥ ६७८
यया वै हृतराज्याय सुरथाय तु राज्यकम् ।
संदत्तं न कथं कार्यमस्माकं सुस्थिरं हि तत् ॥
इत्युक्त्वा तस्य निकटे सर्वपारावरेषु वै ।
राज्यस्य स्थिरतां कर्तुं चण्डीपाठस्तु कारितः ॥
चण्डीपाठन्तु तीर्थेषु कारितं भूमिपेन तु ।
श्रुत्वेत्थमवदुल्लेन कथितं भूमिपं प्रति ॥
भूनाथ दशदिग्नाथकलाभिर्धृतविग्रह ।
मदुक्तं वचनं चेदमवधारय संप्रति ॥
विशिखानां यथास्माकं सशिखानां न शोभते ।
धर्मः सशिखधर्मस्तु तथास्माकं न शोभते ॥ ६८३

---

(१) देवी । देव्यां तु सह्वी भवेत् । (२) सूर्यस्य । श्रीसूर्ये दमयानः स्यात् । (३) ब्राह्मण ।

* 'आश्रम'-पदस्य क्लीवत्वं विरलम् ।

† M ०पतच्छेदः ।

यस्य यो विहितो धर्मो विधात्रा तस्य सेवनम्।
कर्तव्यं तेन नान्यस्य जातुचित् सुखमिच्छता॥
द्विजानां मदिरापानं निषिद्धमस्ति वै यथा।
वेदपाठस्तथास्माकं ब्राह्मणानां च पूजनम्॥
यवनानां तु यो धर्मस्तस्य संसेवनाद् यथा।
पतन्ति विप्रास्तेषां तु धर्मतो यवनास्तथा॥
दाराकेन(१) द्विजानां तु धर्मस्याश्रयणेन तु।
प्रभुत्वं तु यथा स्वस्य नाशितं संस्थितं पुरा॥
तथा त्वमन्यधर्मस्य सेवनान् मा क्षयं व्रज।
स्वधर्माचरणाद्राज्यं कामं संपरिपालय॥
"श्रेयान् स्वधर्मो विगुणः" "परधर्मो भयावहः"।
इत्यादि-भगवद्वाक्यात् स्वधर्माचरणं मया॥
मन्यते सर्वसिद्धीनां जनकं यदि संशयः।
तवास्ति तर्हि संपृच्छ स्वसरोजं विमत्सरम्॥ ९९०
इत्यात्मसचिवोक्तं तु वाक्यं श्रुत्वा तु तेन वै।
स्वसरोजः समाहूतः पृष्टं चापि तदन्तिके॥
सशिखैः क्रियते यो नौ धर्मः प्रतिदिनं स्वकः।
सोऽस्माकं विहितश्चास्ति किं वा चास्ति निषिद्धकः॥
एवं राजोक्तमाकर्ण्य तेनोक्तं भूमिपं प्रति।
द्विजसंस्काररहित यवनात्मज सन्नत।
द्विजधर्मेऽधिकारस्ते नास्ति कस्यापि नौ मते॥
अस्माकमस्ति यो धर्मस्तस्मिन्नपि द्विजस्य न।
अधिकारोऽस्ति तस्माद्धि स्वधर्माचरणं कुरु॥
सर्वः सर्वस्य चेद्धर्मः संभवेत्तर्हि नौ भिदा।
न स्यात् कुत्रापि वर्णानां तस्माद्धर्मस्तु वर्णिना।
विधातव्यः स्वको नित्यं परधर्मो न जातुचित्॥ ९९६
यो यस्य वर्तते शूरस्तस्य तेनैव जायते।
भद्रं न चान्यशूरस्य करणात् कस्यचित् क्वचित्॥
विषस्थितानां जन्तूनां यथा संतोषकं विषम्।
इतरं हन्ति चान्येषां तथा धर्मोऽपि चापरम्॥
भास्करप्रभया सौख्यं पद्मानां जायते यथा।
न तथा कैरवाणां तु तस्माद् यो यस्य चास्ति नौ।
धर्मः सैव विधातव्यस्तेन नान्यस्य कुत्रचित्॥
कलानिधिकलास्पर्शात् कैरवाणां प्रफुल्लता। १०००
जायते न च पद्मानां तस्माद् यो यस्य यास्ति नौ।
धर्मस्तेन स कर्तव्यो भिन्नधर्मो न कुत्रचित्॥
स्वधर्माचरणाद्राज्यं पालयस्व यथासुखम्।
परधर्मस्य कारणाद्राज्यं भ्रंशय मा प्रभो॥
येन वासमनाहस्तु(२) कांक्ष्यते तेन सर्वथा।
स्वशूरो(३) नैव त्यक्तव्यो मलये जीवनावधि॥
आफ्ताव آفتاب (४) संगतो नित्यं यथा
नीलफुरस्य نیلوفر (५) वै।
प्रसादो जायते भिस्तं بہشت (६) सवावा ثواب (७)
जायते तथा॥
स्वसवावं समुत्सृज्य परधर्मं हि यो नरः।
करोति न स वै भिस्तं यात्यवाप्नोत्यजावकम् (८)॥
आतश آتش स्य(९) तु संसर्गादाव آبہا रा (१०)
चोष्णतां गतम्। १००६

---

(१) दाराक........। (२) स्वर्गः। स्वर्गे वासमनाहः स्यात्। (३) धर्मः। (धर्मे शूरो निगद्यते)। (४) सूर्य। (आफ्तावस्तु भवेत् सूर्ये)। (५) पद्म। (पद्मे नीलफुरं भवेत्)। (६) स्वर्गः। (स्वर्गे भिस्त मुदाहृतं)। (७) धर्मः। (सवावस्तु भवेद्धर्मं)। (८) पापं। (अजावस्तु भवेत् पापे)। (९) वह्निः। (आतशन्तु भवेद् वह्नौ)। (१०) जलं।

उपेक्ष्यं जायते यद्वत्तथान्यश्चान्यधर्मतः ॥ १००६
कस्याप्युपेक्ष्यो नाहं स्यामिति चिन्तयता सदा ।
सवावो नैव हातव्यो नरेण जीवनावधि ॥
अजावाजगरो ग्रासं मम मा कुरुतात् कचित् ।
इति चिन्तयता शूरो विधातव्यो निरन्तरम् ॥
शमशेर شمشیر (१) करं वीक्ष्य
यथा बिभ्यति मद्यपाः ।
तथा सवावनिरताद्दूरं गच्छत्यजावकः ॥
अप आफ्ताव तूलह (?) ताजो नश्यति वै यथा ।
तथा सवावतो याति समद्दूरं निरन्तरम् ।
न संतिष्ठति(?) वै दुष्टो वेमज्ज(२) सन्निधौ यथा ।
धर्मिष्ठस्यान्तिके तापं तथा नायाति कुत्रचित् ॥१०११
शोहरा(३) चक्षुषादृष्ट्वा यथाहू آهو (४) प्रपलायते ।
दृष्ट्वा सवावरा तद्वद्धर्मोऽपि विनश्यति ।
धर्मस्य करणान्नित्यं माकुलो معقول (५)
मलये भव ॥
तस्य संवर्जनान्नूनं मा जुमंदह(६) सन्नत ।
परधर्मस्य करणाद्बदबख्तो بدبخت (७) न वै भव ।
स्वधर्माचरणाद्राजन् नेकबख्तः نیکبخت (८)
सदा भव । १०१४

यथा वायवदारस्य عیب دار (९)
संगाज्जिस्तः زشت (१०) प्रजायते ।
जांदारः (११) परधर्मस्य करणादपि सन्नतः ।
परधर्मस्य करणाद्रोगसंजनकस्य ते ।
कमणः खरचः خرچ (१२) शीघ्रं संभविष्यति तेन तु ।
वाकी باقی (१३) रातु(?) विना देहात्
प्राणवायुर्गमिष्यति ॥
स्वधर्मं यः परित्यज्य कुरुते परधर्मकम् ।
अलगं(१४) कुरुते शीर्षे परित्यज्य कमानकम् (१५) ॥
विरका(१६) मौलिदेशस्थं नोत्पादयति तालकम् ।
यथा तथान्यधर्मस्तु करदस्य (१७) कचित् प्रभो ॥
वेलश्चीराक(१८)कार्यं तु न करोति कचिद् यथा ।
तथान्यधर्मतोऽन्यस्य किंचित् कार्यं न * जायते ॥
गिर्दफील(१९)विनाश्ये तु पिटके(२०) लवणं यथा ।
व्यर्थमस्ति तथान्यस्य धर्मोऽप्यन्यं प्रति ध्रुवम् ॥
गङ्गायां स्नापितः फीलो فیل (२१)
जनराली न जायते ।
यथा तथा तु यवनो हिंदू तद्धर्मतो नहि ॥
स्वधर्मचरणात्तूर्णं † मूसलमानो भव प्रभो ।
तस्य संवर्जनाच्छीघ्रं काफिरो (२२) भव मा भुवि ॥
१०२३

---

(१) खड्गः । (शमशेरस्तु खड्गे स्यात्) । (२) साधु । (वेमज्जस्तु भवेत् साधौ) । (३) सोहरा—··· । (४) मृगः । (आहू मृगे समुद्दिष्टं) । (५) योग्यः । (माकुलस्तु भवेद् योग्ये) । (६) अयोग्यं । (अयोग्ये तु जुमंदहः) । (७) दुर्भगः । (दुर्भगे वदवख्तः स्यात्) । (८) सुभगः । (नेकवख्तः सुभगे) । (९) दुष्टः । (दुष्टे वायवदारः स्यात्) । (१०) धूर्तः । (धूर्ते जिस्तः निगद्यते) । (११) प्राणिमात्रम् । (प्राणि-मात्रे तु जांदारः) । (१२) व्ययः । (व्यये तु खरचः प्रोक्तं) । (१३) अवशिष्टं । (अवशिष्ट तु वाकी स्यात्) । (१४) वस्त्रं । (अलगस्तु दुकूले स्यात्) । (१५) शिरो-वेष्टनं । (कमानं शीर्षवेष्टनं) । (१६) पादवस्त्रं । (विरका पादवस्त्रे स्यात्) । (१७) पुरुषस्य । (पुरुषे करदो भवेत्) । (१८) प्रदीपः । (चीराकस्तु प्रदीपे स्यात्) । (१९) मरिच ।(गिर्दफीलस्तु मरिचे) । (२०) पिटक······ । (२१) मतङ्गज । (मतङ्गजे भवेत् दीपः) (२२) धर्मभ्रष्ट । (काफिरस्तु भवेद् भ्रष्टे) । * M प्र । † M. तु न ।

माहतावः सुवृत्तोऽपि विकासयति किं कचित् ?
नीलोफूरं نیلوفر किमाफ़्तावः آفتاب
कुमुदं कमलप्रियः ॥
आवह्यातस्य (१) पानेन रासो (२) नाशं
यथा गतः ।
तथान्यधर्मकरणादन्यो याति विनाशकम् ॥ १०२५
मुस्तरी مشتری (३) योजनीं (४) नीत्वा
माहतावेन مهتاب (५) यत् फलम् ।
लब्धमस्ति तथान्येन लब्धव्यमन्यधर्मतः ॥
क्षीरपानाद्यथा कारकलस्तु प्रचुरं विषम् ।
विमुञ्चति तथा चान्यो ह्यन्यधर्मस्य सेवनात् ।
इह लोकान्तरे चैवायवदारः عیب دار(६) प्रजायते ॥
इह लोकान्तरे चैव मम कीर्तिर्विसर्पतु ।
इति चिन्तयता नित्यं न ह्यातव्यः स्वको वृषः ॥
तुरह्स्तु (७) यथा चान्यरागेण नहि रज्यते ।
तथान्यधर्मतश्चान्यो न किञ्चित् फलमश्नुते ॥
पवनश्चान्यदसर (८) खर्गेण (९) गुणवान् यथा ।
न जायेत तथा चान्यकर्मणा फलभाग् नरः ॥ १०३१

मुरीदस्तु مرید (१०) यथा पीरः پیر (११)
स्वगुरोर्नहि जायते ।
तथान्यधर्मश्चान्यस्य न करोति समुद्धृतिम् ॥
यतस्तु सर्वजांदारो جاندار (१२) दृश्यते
न बरावरि برابری (१३) ।
अतः साधारणो नास्ति सवारः (१४) सर्वदेहिनाम् ॥
गुल्मा (१५) दिषु यथा चौको रसो नास्ति
तथा नृणाम् ।
एको नैवास्ति नौ शूरः कुरु तस्मात् स्वधर्मकम् ॥
स्वधर्मं यः परित्यज्य करोति परधर्मकम् ।
व्योमवत्(१६)स क्षयं याति किं वाच्यमधिकं
मया ॥
स्वसवावातु (१७) सरणे सानीमो (१८)
जायते तु यः ।
तत्पदं न च कुत्रापि व्यनीमं (१९) जायते प्रभो ॥
स्वधर्मं यः परित्यज्य गृह्णाति परधर्मकम् ।
नेजुमं نظم (२०)संपरित्यज्य स गृह्णाति
व्यनेजुमम् بی نظم(२१)। १०३७

---

(१) पीयूषस्य। (आवह्यातस्तु पीयूषे)। (२) राहुः (राहौ रासः समुद्दिष्टः)। (३) बृहस्पति। (मुस्तरी तु बृहस्पतौ)। (४) स्त्री। (योषायां योजनी भवेत्)। (५) चन्द्रेण। (६) सदोषः। (सदोषोऽयवदारः स्यात्)। (७) स्फटिक। (स्फटिके तुरहो भवेत्)। (८) द्रव्य। (दसरस्तु भवेद्द्रव्ये)। (९) गुणेन। (गुणे खर्व निगद्यते)। (१०) शिष्यः। (मुरीदस्तु भवेच्छिष्ये।) (११) गुरुः। (गुरौ पीरः समीरितः)। (१२) प्राणी। (भवेत् प्राणिनि जांदारः)। (१३) सदृशः। (सदृशे तु बरावरि)। (१४) धर्मः। (१५) गुड। (गुडे गुल्म निगद्यते) (१६) राहुः। (राहौ व्योम समुद्दिष्टं)। (१७) निजधर्म। (१८) स्थिरः। (भवेत् स्थिरे तु सानीमः)। (१९) चरम्। (व्यनीमस्तु चरे भवेत्)। (२०) नित्यं। (नेजुमस्तु भवेन्नित्ये) (२१) अनित्यं। (अनित्ये तु व्यनेजुमः)।

قران कुराणोक्तस्य करणाद्दासो भव सर्वदा ।
عیب دار अयव दारोऽन्यधर्मस्य करणाद्भव
मा प्रभो ॥ १०३८
شیر शेरो भूत्वा स्वशूरस्तु परधर्मविधायिनम् ।
मारयत्येव संदेहो नास्त्यत्र नृपसत्तम ॥
स्वसवाव ثواب परित्यागो वेसब्बोऽस्ति यतस्त्वतः ।
केनापि नहि त्यक्तव्यः स्वधर्मः सुखमिच्छता ॥
परधर्मस्य करणात् स्वकीर्तिदामनं دامن प्रभो ।
खरावं कुरु मा वीर वीरवं संप्रदर्शय ॥ १०४१
परधर्मस्य करणान्नादानो نادان भव मा ध्रुवम् ।
भव दानिममंदस्तु स्वधर्माचरणात् प्रभो ॥
······यातस्तस्मात्त्वं सुस्थिरो भव ॥

*　　*　　*　　*

यवनीवदनांभोजमधुपानरतेन तु ।
यथा चानेन यज्ञास्तु विधीयन्ते निरन्तरम् ॥ १०५०
तथा त्वन्निकटे धर्मान् परकीयांश्च बुद्धितः ।
कारयित्वा त्वदीयं तु राज्यध्वंसं विधास्यति ॥
यथा शंबूकशूद्रस्य तपसा राघवेण तु ।
दुःखं लब्धं पुरा चास्य यज्ञादिकरणेन च ।
लब्धव्यमस्ति नौ राजन् त्वयाप्यत्र तथोत्कटम् ॥
अधिकारो न यस्यास्ति यत्र यस्य (?) तु तेन नौ ।
तस्यानुष्ठानतः सिद्धिर्मृत्वापि नहि लभ्यते ।
प्रत्युत(१)याति निरयमेष शास्त्रस्य निश्चयः ॥
'यः शास्त्रविधिमुत्सृज्य वर्तते कामचारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम्' ।
इत्यादिभगवद्वाक्यात् शस्तहोक्तं شسته
समाचर ॥ १०५६

देशाश्रमवयःकालवर्णजातिविभेदतः ।
धर्मोऽप्यधर्मतां याति किं वाच्यमधिकं मया ॥१५७
पिता पितामहो यस्य संस्कृतो नास्ति केनचित् ।
तस्य संस्कार्यता नास्ति कस्यापि च मुनेर्मते ॥
अनेन हठतः स्वस्य कारितं चास्ति संप्रति ।
प्रत्यंचाबंधनं देहे व्ययित्वा (?) बहुधा धनम् ॥
सिंहपञ्जरसंस्थानमात्रतो मुखकान्तकः ।
यथा न द्विरदानां तु जायते कुंभभेदकः ॥
तथा संस्कारमात्रेण पतितो न द्विजत्वकम् ।
प्राप्नोत्येतस्य संसर्गात् पत मा भूभुगासनात् ।
त्यक्त्वा पतितवच्चैनं सुस्थिरं कुरु स्वासनम् ॥
योग्यो भूत्वा त्वयोग्यस्य संगतश्चास्य मा पत ।
योग्यस्य संगतो वीरभोग्यां चेमां धरामव ॥
अयोग्यस्य तु संसर्गाद् याति योग्योऽप्ययोग्यताम् ।
अन्धवदन्धलग्नस्तु न किं पतति वै भुवि ॥
इत्युक्त्वा यवनानां तु पण्डितः सार्वभौमकम् ।
अभिवाद्य गतो नूनमरिमां(२) प्रति सत्वरम् ॥
सार्वभौमोऽपि स्वं कर्म कर्तुं कर्मगृहं प्रति ।
गतः सन्तोषसंयुक्तो विसृज्य नृपमुख्यकान् ।
भ्रूसंज्ञया तु सुभ्रूणां मनोनयनतोषदः ॥१०६६ (३)

*　　*　　*　　*

राजसंप्रहितान्नस्य भक्षणात् प्राणवर्जितम् ।
स्मृत्वा स्वभृत्यमेकस्मिन् दिवसे
समुदीरितम् । १०७५ (४)
सार्वभौमस्य निकटे ह्यवदुल्लेन दुर्लभम् ॥
राजराजनिभाव्यम्र वारिजाक्ष प्रसादतः ।
प्राप्तराज्य विरोधं मे कुरु मा भुङ्क्ष्व राज्यकम् ॥

---

(१) M. ०तो । (२) देवगृहं । (अरिमा देवगृहे स्यात्) । (३) There is a break here in the MS. (४) Here begins really the third part of the work. The hostilities between the Sayyids and the Ruler remain no longer a sealed fact.

मया संस्था(१)पितोऽसि त्वमस्मिन् राजासने शुभे ।
स्थित्वात्र भवता चाद्य लोकोक्त्या मम मारणम् ।
क्रियते तर्हि मद्दत्तं गृहाण करबालकम् ।। १०७८
जयसिंहादिकांश्चैतान् ग्रामसिंहोपमान् प्रभो ।
नियोजयसि मां हन्तुं किमर्थं नाधमाद्वधः ।
आकांक्ष्यते मया राजन्नुत्तमात् कांक्ष्यते वधः ।।
स्वस्वरूपं मया राजन् दर्शनीयं यदा त्वयि ।
जयसिंहादयस्त्वेते न स्थास्यन्त्यत्र सर्वथा ।।
मृगाधिपो यथाश्नाति मृगानेव वने वने ।
जयसिंहस्तथा चायं जयग्रासं करिष्यति ।।
तस्मादेतस्य साहाय्यमाप्य मे विजयाय तु ।
यत (२) मा मां स्वहस्तेन घातयित्वा यथासुखम् ।
कृत्वा मन्त्र्यन्तरं सम्यग्विधेहि क्षितिपालनम् ।। १०८३
इत्युक्त्वा स्वशयस्थं तु करबालं भयानकम् ।
तदग्रे स्थापयामास कृष्णवर्णं कलिप्रियम् ।।
असंस्पृश्यं तु भीरूणां वीरकीलानभक्षकम् ।
कालिकारसनाप्रायं लक्षणैश्चापि लक्षितम् ।।
तस्यैवं विनयं दृष्ट्वा महीनाथेन तं प्रति ।
कथितं वचनं चेदं जयसिंहस्य शृण्वतः ।।
नौरोपजीविभिर्वैरं पात्यते भवता नहि ।
चिन्ता कार्या मम प्राणपर्यन्तं तव वर्तते ।
अमात्यता यथापूर्वं मम कार्यं विधीयताम् ।।
एवमात्मप्रभोर्वाक्यं सवासं (३) प्राप्य मन्त्रिराट् ।
चन्द्रस्य करसंपातात् कुमुदिव (४) ज्वरं जहौ ।।
अभिवाद्य प्रभुं यावदवदुल्लो गृहं प्रति ।
गतस्तावत्तु कथितं जयसिंहेन वाक्यकम् ।। १०९०

महीप सर्वभूपानां मौलिभिः सवदा नत ।
प्राप्तगौरव सर्वेषां गौरवस्य तु साधक ।।
वेकूपे (५) नावदुल्लेन कीदृशं समुदाहृतम् ।
अद्य तच्छ्रवणाद्दुःखं मम जातं महत्तरम् ।।
विकलस्य (६) यथा शब्दः शृण्वतां न सुखप्रदः ।
तथैतस्य न कस्यापि सुखदं चास्ति वाक्यकम् ।।
यस्य वाचि सहो नास्ति कर्म तस्य कथं मृदु ।
भविष्यति भयं तस्माद्विज्ञातव्यं निरन्तरम् ।।
नृपेण क्रियते मन्त्री मन्त्रिणा न नृप [:] कचित् ।
प्रवद्धजन्य-धेलीतो (७) जायन्ते किं प्रवद्धकाः (८) ।।
तेनोक्तं मत्कृतोऽसि त्वमिति यज्जनसंसदि ।
भवन्तं प्रति चैतस्य वर्ततेऽदः (९) समुत्तरम् ।।
यदा त्वया महीपालः कोऽपि नौ पश्यतो मम ।
विधातव्यस्तदास्माभिः सामर्थ्यं तव चेदृशम् ।।
ज्ञातव्यं बल्गनात् किं नौ जायते राजसंसदि ।
इति राजोक्तमाकर्ण्य यवनेन्द्रेण भाषितम् ।।
यथायोग्यं त्वया राजन् कथ्यते केन दीयते ।
राज्यं पुण्यैकलभ्यं हि तेन विक्षिप्तवद्वचः ।।
उच्यतेति (?) तयोर्वाक्यमित्थं नौ मन्त्रिणं प्रति ।
केनचित् कथितं शीघ्रमागत्य तु ततः स्वयम् ।
तस्य संश्रवणान् मन्त्री जातः क्रोध-समन्वित ।। ११००
उक्तं च तेन वदनात् फर्कसाहो यदा मया ।
शतरंजस्य नृपवत् स्वबुद्ध्या गतिवर्जितः ।।
विधातव्यस्तदा तेन तदीयैरपि चाखिलैः ।
बोद्धव्यं वै मम प्रज्ञाबलं धरणिमण्डले ।।
एतावत्कालपर्यन्तं तदीयं तु कुचोद्यकम् । ११०३

---

(१) M. सन्ता० । (२) परस्मैपदं दुर्घटम् । (३) प्रशंसनीयं । (४) M. ०दैव । कुमुदवत् कुमुच्छब्दोऽप्यस्ति। (५) निर्बोधेन । (६) गर्दभस्य । (गर्दभे विकलो भवेत्)। (७) क्षितेः । (क्षितौ धेली निगद्यते)। (८) परमाणवः । (परमाणौ प्रवद्धः स्यात् । (९) M. ०तेदं ।

स्वस्य चिल्के(१)न चानीतं यद्वृ तस्य फलं त्विदम् ॥
जातमस्त्यधुना तेन मम द्वेषो विधीयते ।
तथा मयापि क्रियते यत्नस्तद्वन्धनस्य हि ॥ ११०४
गाजदीखानतनयममात्यं कर्तुमिच्छति ।
फर्कसाहस्तु नितरां जयसिंहप्रचोदितः ॥
अर्थवादो यथा नित्यं विदधाति प्ररोचनाम् ।
विधिवाक्यस्य तद्वत्तु जयसिंहः* प्ररोचनाम् ।
गाजदीखानपुत्रस्य करोति प्रतिवासरम् ॥
तद्वाक्यात् फर्कसाहेन कलीचखानकस्य तु ।
पुत्रः पुत्रीकृतश्चास्ति सांप्रतं चावहेलनम् ॥
सभायां सर्वलोकानामग्रे च मम निन्दनम् ।
करोति मद्वलं नैव जानाति पदसंस्थितः ॥
पदस्थितो न कुरुते यथा सुदमि(२) चिन्तनम् ।
अज्ञस्तथा फर्कसाहो न मां स्मरति सांप्रतम् ॥ १०
पदभ्रष्टो मया यावत् फर्कसाहो विधीयते ।
न तावज्जायते तस्य मम संस्मरणस्मृतिः ॥
गाजदीखानसंज्ञस्तु महीनाथानुकारकृत् ।
औरंगजेबभूपेन यथा दृकूशक्तिशून्यकः ॥
कृतः स्थितः पुरा तद्वत् फर्कसाहो मया यदा ।
कार्यो दृकूशक्तिरहितः कलीचोऽपि तदा बलम् ॥
मम ज्ञास्यति किं चोक्त्वा ह्यधिकं जायते फलम् ।
नीतिज्ञा बलगनं नैव कुर्वन्त्येव हि कार्यकम् । १११४

शारदाभ्रप्रकारेण गर्जन्त्यन्ये नयोज्झिताः ॥
···करणान्न देयं जुरमं جرم (३) क्वचित् ।
अतिलुब्धोऽस्ति यो राजा तस्य नेकी نیکی (४)
† सुनिर्मला ।
न वदी بدی (५) जुरम(६)कान्ता राजते तवकोपरि ॥
राही راهی जनं (७) परित्यज्य वदराह بدراه (८)
नरस्य तु ।
यतवारो اعتبار (९)न कर्तव्यः कदाचिदपि भूभुजा ॥
बंदगी (१०) क्रियते येन यादृशी प्रीतिभावतः । १०४०
तस्मै तादृक् प्रदातव्यं वकसीसं بخشش (११)
नृपेण तु ॥
हक حق (१२) युक्तो नरः स्वस्य सन्निधौ नृपसत्तमैः ।
हमेराह(१३) स्थापनीयो हि न कदाचित्
हराम حرام वान(१४) ॥
उस्ताद(१५)संगतो वीणं सागिर्दो(१६)लभते यथा ।
दानिशमन्द(१७) संसर्गात्तथाप्नोति मतिं नृपः ॥
अलिसं(१८)चेच्छता नूनमुस्तादस्तु यथान्तिके ।
स्थाप्यते सर्वकालं तु नितरां सुखमिच्छता ।
तथा दानिशमन्दस्तु स्थापनीयोऽन्तिके‡ स्वके ॥
दोआगी(१९) हम همه (२०) लोकस्य संग्राह्या
सन्नतेन (२१) तु । १११२

(१) तस्करणे [अन्तःकरणे ?]। (२) ईश्वर। (३) कलङ्कः। (जुरमं तु कलङ्के स्यात्)। (४) कीर्तिः। (कीर्तौ नेकी समीरितं)। (५) अकीर्तिः। (६) कलङ्क०। (अकीर्तौ तु वदी प्रोक्तं कलङ्के जुरमं भवेत्)। (७) सत्पथावलम्बिनं। (सत्पथीने तु राही स्यात्)। (८) असत्पथावलम्वी। (वदराहस्त्वसत्पथे)। (९) विश्वासः। (विश्वासे यतवारः स्यात्)। (१०) सेवा। (सेवायां बंदगी भवेत्)। (११) प्रसादः। (प्रसादे वक्सीसं स्यात्)। (१२) धर्म०। (धर्मे हक समाख्यातं)। (१३) हमेराह—···। (१४) अधर्म। (अधर्मे तु हरामः स्यात्)। (१५) अभिज्ञ। (१६) शिष्यः। (शिष्ये सागिर्द: कथ्यते)। (१७) विज्ञ०। (विज्ञे दानिशमन्दस्तु)। (१८) विद्यामात्रं। (विद्यामात्रे अलिसं)। (१९) आशीर्वादः। (आशीर्वादे तु दोआगी)। (२०) सर्वपावक। (हमः सर्वस्य पावकः)। (२१) राज्ञा।

* M. ०सिंह। † M. स०। ‡ नीया०।

वददोआ بد دعا (१) न कस्यापि ग्राह्या
शंवुव (२) मदकः ॥
त्यक्त्वा रोजह روزہ (३) दिनं काकह (४) न
विधातव्यो नृपेण तु ।
दस्तगीर دستگیر स्तु सर्वेषां कर्तव्यः प्रीतिभावतः ॥
दीनं (५) संजानता कार्या न च कुत्रापि ज्याजति ।
मखदुमो مخدوم स्ति यः कश्चित् वामोसी
तस्य चान्तिके ।
विधातव्या खसलितं (६) रक्षणीयं प्रयत्नतः ॥
सही (७) च गलनं (८) यावन् मालयं (९)
नहि जायते ।
तावद्दूराय अज्याहः (१०) कर्तव्यस्तु विवांरकः (११) ।
बस्तो بست (१२) योऽस्ति परैस्तस्य कर्तव्यस्तु
खलास خلاص कः (१३) ॥ ११२९
लफ्जो لفظ (१४) [फोह] यथा म्यान معنی (१५)
युक्तो वर्तते तु तथा स्मृतिः ।
कर्मयुक्तास्ति तस्माद्धि कर्म कार्यं शुभं नृभिः ॥
मेहमान مهمان स्य (१६) चातिथ्यं
ताजिमादि تعظیم (१७) पुरःसरम् ।
विधातव्यं स्वधर्मस्य रक्षायै सन्नतेन (१८) तु ॥
न वृथावहसः عبث (१९) कार्यः सन्नतेन सुबुद्धिना ।
सौवाल سوال (२०) कारके देयो
जवावः جواب सु (२१) विचार्य तु ॥
यन्मीरअदल میر عدل (२२) प्रेरणया
काजी قاضی (२३) कथयति वाक्यम् ।
अदल عدالت का (२४) दनुसारेणैव
पापिष्ठे नृपेण देयः ॥ ११३०
माफः معاف (२५) सजायतं شجاعت (२६)
यत्र यत्र चास्ति यदालतिः (२७) ।
गनीम غنیم (२८) विहिता तत्र वदराही بد راہ (२९)
न जायते ॥ ११३१

---

(१) शापः । (शापे तु वददोआ स्यात्) । (२) सुख । (शंवुवं तु सुखे प्रोक्तं) । (३) रोजा, व्रतं, (रोजहस्तु व्रते भवेत्) । (४) उपवासः । (उपवासे तु काकहः स्यात् (?)) । (५) परलोकं । (दीनं तु परलोके स्यात्) । (६) खसलितं—··· । (७) शुद्धं । (८) अशुद्धं । (शुद्धे सही समुद्दिष्टमशुद्धे गलनं भवेत्) । (९) विज्ञातं । (विज्ञाते मालयं भवेत्) । (१०) अज्याह—···। (११) विवांरक—··· । (१२) बद्धः । (१३) मुक्तिः । (बद्धे वस्त समाख्यातं खलासो मुक्तिवाचकः) । (१४) पदं । (१५) अर्थं । (पदे लफ्फ समाख्यातमर्थे म्यान निगद्यते) । (१६) अतिथेः । (अतिथौ मेहमानः स्यात्) । (१७) अभ्युत्थान । (अभ्युत्थाने तु ताजीम) । (१८) नृपेण । (सन्नतस्तु नृपे भवेत्) । (१९) विवादः । (भवेद्विवादेऽवहसः) । (२०) प्रश्न० । (सौवालस्तु भवेत् प्रश्ने) । (२१) उत्तरं । (जवावस्तूत्तरे भवेत्) । (२२) प्राड्विवाक् । (मीर अदल प्राड् विपाके) । (२३) पण्डितः । (काजी तु पण्डिते भवेत्) । (२४) दण्ड० । (अदलस्तु भवेद्दण्डे) । (२५) क्षमा । क्षमायां तु भवेन् माफः) । (२६) शौर्यं । (शौर्ये सजायतं प्रोक्तं) । (२७) नीतिः । (भवेन्नीतौ यदालतिः) । (२८) शत्रु । (गनीमस्तु भवेच्छत्रौ) । (२९) अतिक्रमः । (वदराही त्वतिक्रमे) ।

यावद्बदन بدن तो(१)जीवो नान्यत्र समगच्छति(?)।
तावत् किला قلعه (२) न दातव्या ययान्यस्मै (?)
तु यस्य वै।
निश्चयोऽस्ति स वै* राज्ञा कर्तव्यो दुर्गरक्षकः॥ ११३३
हुशियारो (?) هشيار (३) न यस्यास्ति
चौकीदारो(?)چوكيدار(४) न तस्य वै।
करोति वक्तरो(५) रक्षां जिरहो(६)पि न कुत्रचित्॥
पायदारो پايدار (७) रणे यस्तु
गुरेज گريز (८) परिवर्जितः।
तस्य हस्ते तु फतहः فتح (९) समायाति
च सत्वरम्॥ ११३५
मुद्दयी مدعی (१०) चास्ति यस्तस्मै
दावह دعوی(११)कार्यें(?) नृपेण तु।
दोस्तो دوست (१२) योऽस्ति स्वके संगे
स नेयः सर्वभावतः॥
पुरुखावो پر خواب (१३) न कतव्य-
श्चौकीदार(१४)स्तु··· ।
वेदारः بيدار (१५) संविधातव्यः
सर्वदा सुखमिच्छता॥
यथा रुशवतं رشوت (१६) मन्त्री
गृहीत्वा सन्नतस्य तु। ११३८

कर्तुं मुलाज़मतं ملازمت (१७) गन्तुं
ददाति उमरा أمرا उकम् (१८)॥
अश्राइल عزرائيل (१९) स्तथा नृणां
पश्यन् कर्माणि चोमरम् عمر (२०)।
नयत्यनन्तगुणवान् जांदार(२१) प्राणदारकः॥
तस्माद्धर्मस्य विज्ञेन जियानो زيان (२२)
न कदापि वै।
विधातव्यस्तु तद्वृद्धिः कार्या सर्वात्मना सदा॥
तत्कालं तेन स्वभ्रात्रा हस्नलीसंज्ञको युवा।
दावताखानदलकः सर्वदा समरप्रियः।
आहूतो जयसिंहस्य प्रतिज्ञाभञ्जनाय तु॥ ११४२
ममानुज महीनाथो जयसिंहप्रणोदितः।
साम्प्रतं वधमस्माकं कर्तुमिच्छति तत्त्वतः॥
तस्मात्त्वयापि शैथिल्यं विहायात्र ममाज्ञया।
आगन्तव्यं विलम्बो न कर्तव्यो रसनाशकः॥
इत्यात्माग्रजवाक्यं तु श्रुत्वा पीयूषसन्निभम्।
तेनोक्त्वा प्रेषितं वाक्यं पातसाहेन साम्प्रतम्॥
यस्य वाक्येन चास्माकं विनाशश्चिन्त्यतेऽशुभः।
मयापि तस्य विषयं दृष्ट्वा त्वद्दर्शनाय तु।
आगन्तव्यं न कर्तव्या चिन्ता सुखविघातिका॥ ११४७

---

(१) देहात्। (बदनस्तु भवेद्देहे)। (२) दुर्गः। (किला दुर्गे निगद्यते)। (३) सावधानं। (सावधाने हुशियारः)। (४) रक्षकः। (चौकीदारस्तु रक्षके)। (५) कवचं। (कवचे वक्तरः प्रोक्तः)। (६) युद्धं। (जिरहो लेहूकं युद्धे)। (७) स्थिरः। (स्थिरे तु पायदारः स्यात्)। (८) चञ्चलमति। (व्यत्ययेन गुरेजः स्यात्)। (९) जयः। (फते-हस्तु भवेज्जये)। (१०) प्रतिपक्षः। (मुद्दयी प्रतिपक्षे स्यात्)। (११) अभियोग०। (अभियोगे तु दावहः स्यात्)। (१२) मित्रं। (मित्रे दोस्त समीरितं)। (१३) निद्रालुः। (निद्रालौ पुरुखावः स्यात्)। (१४) रक्षकः। (१५) जागरूकः। (जागरूके तु वेदारः)। (१६) उक्तिं। (स्यादुक्तौ च रुशवतं)। (१७) प्रणामं। (मुलाज़मतं प्रणामे स्यात्)। (१८) उमराउकं—···। (१९) यमः। (भवेदश्राइलो यमे)। (२०) वयः। (उमरं वयसि भवेत्)। (२१) प्राणी। (जांदारः प्राणिनि भवेत्)। (२२) व्ययः। (जियानस्तु भवेद्व्यये)।

* सर्वं।

ममागमनपर्यन्तं त्वया सर्वात्मना स्वकः ।
यत्नः कार्यो न चोद्‌योगः कर्तव्यः समरस्य तु ॥
अनुजस्य तु संगत्या ह्यग्रजस्य कथं जयः ।
संभविष्यति चेत्थं तु चिन्तनीयं न वै त्वया ॥
उत्कृष्टोऽपि समुत्कर्षं संप्राप्नोति निकृष्टतः ।
तृणं प्राप्य तु संवृद्धिं कृशानुर्याति किं नहि ॥ ११५०
एकदा जयसिंहेन जोधपुरेश्वरं प्रति ।
कथितं प्रीतिभावेन शिवाय मन्त्रिभूपयोः ॥
किमर्थमवदुल्लेन क्रियते मुख्यमन्त्रिणा ।
दिल्लीश्वरस्य विद्वेषस्तरलेन कुबुद्धिना ॥
भादरं(१) कुरुते यस्तु सन्नतस्य(२) निरन्तरम् ।
अमन्दः(३) स तु विद्वद्भिर्ज्ञातव्यो बुद्धिवर्जितः ॥
यवनेन्द्रो न यावत्तं क्रोधदृष्ट्या प्रपश्यति ।
जीवनं जायते तावत्तस्य तस्मात्तु शिक्षणम् ।
भवता संविधातव्यं भवतामात्मविद्पतेः ॥ ११५५
इति तद्वचनादुक्तमजितेन तु तं प्रति ।
एकदा प्रीतिभावेन हसित्वा समयोचितम् ॥
अवदुल्ल यथा चायं फकसाहस्त्वया नृपः ।
कृतोऽस्ति सांप्रतं चास्य हितमाचर सर्वथा ॥
जस्तानां (४) तु जलासेन (५)
कुरु मा नृपभादरम् (६)।
अमन्देन(७) न कर्तव्यो विरोधः सन्नतस्य (८) तु ॥
सन्नतस्य विरोधेन करदेन (९) सुखं क्वचित् ।
न लभ्यते क्वचित् पापाज्जायते किं सुखं
नृणाम् ॥ ११५६

योजनी (१०) विनह بناه (११)
द्रोहाद्यथा नश्यति सत्वरम् ।
अमन्दोऽपि तथा राजद्रोहाच्छीघ्रं विनश्यति ॥ ११६०
सन्नतो गालव (१२) प्रायः कुटिलस्य तु मन्त्रिणः ।
आत्मसंरक्षणं कर्तुं कुरुते किल संक्षयम् ॥
इति राजोक्तमाकर्ण्य सन्नतस्य तु मन्त्रिणा ।
कथितं प्रीतिभावेन महीपश्वशुरं प्रति ॥
भृत्यता नात्मनाशाय केऽपि कुर्वन्ति मानवाः ।
किन्तु चोत्कर्षलाभाय भोगाय च सुखाय च ॥
जीवः सर्वेषु भूतेषु संतिष्ठते निरंतरम् ।
तस्मात् कोऽपि न कस्यापि भृत्योऽस्ति नच वै प्रभुः ॥
नादतं(१३) तु यः प्राप्य (?) न खुसी (१४)
संप्रजायते ।
خبیثان खवीशान्न (१५) विभिन्नो वै ज्ञातव्यः
स तु मानवैः ॥ ११६५
समानं (१६) मुस्किलं مشکل (१७)
यो वै समं च परिपश्यति ।
मखदुमः مخدوم स विज्ञेयो राजभिः सर्वरक्षिभिः ॥
अजीमत عظمت (Master) (१८) न यस्यास्ति
जरूर ضرور (१९) मपि तस्य न ।
संसिध्यति कथं चान्यत्तस्य हस्ते पतिष्यति ॥ ११६७
असवारो سوار (२०) जिमतः शोभां यथा नाप्नोति
فیلبان फीलवान् (२१)।

(१) द्वेषं । (२) राज्ञः । (३) मन्त्री । (४) जस्त—...... । (५) वचनेन । (६) द्वेषं । (७) मन्त्रिणा । (८) राज्ञा । (९) पुरुषेण । (करदः पुरुषे भवेत्) । (१०) नारी । (११) विनाह—विना (Without) (?) । (१२) गरुड़० । (स्याद्‌गालवस्तु गरुड़े) । (१३) प्रसादं । (नादतं प्रसादः स्यात्) । (१४) सन्तुष्टः । (सन्तुष्टे तु खुसी भवेत्) । (१५) भूत । (खवीशस्तु भवेद्भूते) । (१६) संपत्तिः । (१७) आपद् । (संपत्तौ च समानं स्यात् मुस्किलं चापदि स्मृतं) । (१८) साहसम् । (साहसे तु अजीमत) । (१९) आवश्यकं । (आवश्यके जरूरं स्यात्) । (२०) अश्ववारः । (अश्वारोही) । (असवारोऽश्ववारे स्यात् । (२१) हस्त्यारोही । (हस्त्यारोहे तु फीलवान्) ।

तथा मर्दानगी مردانگی (१) शून्यो
राजते न नृपोत्तमः ॥ ११६८

जोर زور (२) शून्यकरे यद्वत्
समसेरो شمشیر (३) न शोभते ।
तथा राज्यं तु धर्मेण रहितस्य न शोभते ॥ ११६९

वंदगीं بندگی (४) न च कुर्वन्ति
यस्य मोहर مهر (५) मण्डितम् ।
खत خط (६) मालोक्य निखिलाः किं
तेन नृपमानिना ॥

यस्य चम्पकपुष्पस्य वोय بو (७) वद् याति मोहरः ।
सर्वत्र स नृपः केन वंदनीयो न भूतले ॥११७१

गोशवारो (८) ज्झितो गोश सुप्तं मालेति(?) वै यथा।
हुक्मं (९) न मन्यते यस्य सोऽपि शाहो न शोभते ॥
मेहरो مهر (१०) दयतो द्योतो भुवने जायते यथा ।
तथा मोहरतो यस्य प्रकाशो जायते नृणाम् ।
पातसाहः स विज्ञेय आलम عالم स्य (११)
तु पालकः ॥

अस्ति यः कुदूरति قدرت (१२) शून्यस्तस्मान्न
जायते किञ्चित् ।
कार्यम्* अतः कुदरति मंद
स्वसंगे स्थापनीया शाहेन (?)॥ ११७५

इंजा اینجا (१३) येन न वै पुण्यं
कृतमुंजा آنجا (१४) न तेन व ।
सुखं संलभ्यते तस्मात् पुण्यं कार्यं निरन्तरम् ॥११७६

अजींजा از اینجا (१५) धर्मविमुखो
याति लोकान्तरं प्रति ।
यः पुमानजकुंजा کجا (१६)
तेन लब्धनमुत्तमं सुखम्(?) ॥ ११७७

हाजिरं حاضر (१७) नास्ति यद्वस्तु तत्सिद्धिः
شاید शायदेन (१८) तु ।
कर्तव्या नानुमानं तु प्रत्यक्षं किल जायते ॥

खाली خالی गेहे (१९) न वस्तव्यं
वादसाहेन कुत्रचित् । ११७८

आगन्तुं न च संदेयो नजदीकं نزدیک (२०)
स्वस्य दुश्मनः دشمن (२१) ॥
कृपया यस्य नेहालो نهال (२२)
गुलामो غلام (२३) नहि जायते ।
गदाई گدا (२४) जनतो नान्यो
बोद्धव्यः स प्रभुर्नृभिः ॥११७९

उभयोर्वीरयोर्मध्ये रणभूमौ प्रजायते ।
कस्यचिद्धुयचुर्दस्तु(२५) वाजदादस्तु(२६)
कस्यचित् ॥ ११८०

---

(१) मर्दानगी—···courage । (२) बल० । (बलं जोर समुद्दिष्टं) । (३) खड्गः । (खड्गे तु समसेरः स्यात्) । (४) —प्रणतिम् । (प्रणतौ वंदगी भवेत्) । (५) मुद्रा । (मुद्रायां मोहरः प्राप्तः) । (६) खत—पत्रं । (पत्रे खतमुद्राहृतम्) । (७) गन्ध० । (८) गोशवार—(स्यात् पूर्णवर्णे [कर्णपूरो] गोशवारो गो शस्तु कर्णके) । (९) हुक्मं—···command. (१०) सूर्य । (मेहरस्त्वरुणार्कयोः) । (११) विश्वस्य । (आलमस्तु भवेद्विश्वे) । (१२) शक्ति० । (भवेत् कुदरतिः शक्तौ) । (१३) (अत्रार्थके भवेदिंजा) । (१४) (उंजा तत्रार्थके भवेत् (१५) (अजीजा इत इत्यर्थे) (१६) अजकुंजा— (कुतोऽर्थके) (१७) प्रत्यक्षं । (प्रत्यक्षं हाजिर प्रोक्तः) । (१८) अनुमानेन । (अनुमाने तु शायदः) । (१९) शून्य । (शून्ये खाली समाख्यातं) (२०) निकटे । (नजदीकं निकटे भवेत्) । (२१) दुष्टः । (२२) कृतार्थः । (२३) परिचारकः । (नेहालस्तु कृतार्थः स्याद् गुलामः परिचारके) । (२४) याचकः । (याचनायां गदायी स्यात्) । (२५) विजयः । (२६) पराजयः ।

* M. कार्श० ।

तस्मात्तयोस्तु जनकमदमृगस्ति नेतरत् ॥
न्याजमंदः نیازمند (१) स्वान्तिके राज्ञा
स्थानीयो निरन्तरम् ।
सवदा सुखलाभाय न गुमानीं گمانی (२) कदाचन ॥
बागवान باغبان (३) प्रकारेण जनानामवलोकनम् ।
पातसाहेन कर्तव्यमुभयत्र सुखेप्सुना ॥
रंगरेजो رنگریز (४) यथा नित्यं वस्त्राणामनुरंजनम् ।
करोति च तथा कार्यं प्रभुणा लोकरञ्जनम् ॥
हम्मालस्तु حمال (५) यथा नित्यं
समुद्वहति वारवम् بارم (६) ।
राज्यभारं तथा राजा समुद्वहति सर्वदा ॥११८५
नोफरः نفر (७) परतन्त्रस्तु यथा तिष्ठति सर्वदा ।
तथैव पातसाहस्तु यस्तिष्ठति निरन्तरम् ।
यावज्जीवं स्वको देशः पाल्यते तेन वै सुखम् ॥
खललं خلل दखलं دخل (८) चापि
यस्य राष्ट्रे न जायते ।
स राजा बुद्धिसम्पन्नो ज्ञातव्यस्तु सुबुद्धिभिः ॥
सदिकं(६) यस्य संगृह्य नोफराश्च गुलामकाः ।
नेहालाः نہال (१०) किल जायन्ते
तन्न सेवेत को नृपः ॥
न च प्रकाशमाप्नोति
सीसपंजरहो پنجرہ (११) उज्झितः* ।
आत्मनः पालकत्वेन स्वामी भवति यो नृपः ।११६०
विरोधकरणात् सैव [Sic] भृशं शत्रुः प्रजायते ॥

आत्मसंबंधवशतः प्रीतिर्भवति भूतले ।
सर्वेषु भूपतनयभृत्याश्वकुञ्जरादिषु ।
आत्मानं यस्तु विद्वेष्टि तस्मिन्नात्मीयता कुतः ॥
सर्वं दत्त्वा तु संतोष्य गुरुं संगृह्यते मनुः ।
स च संत्यज्यते नूनं शत्रुतां संचरन्नृभिः ॥
अग्निहोत्रस्य दहनं भवनं दग्धुमुद्यतम् ।
निर्वापयन्ति किन्नैव नितरामग्निहोत्रिणः ॥
आत्मानं हन्तुमुद्युक्तः श्वशुरत्वे न हेतुना ।
वज्रनाभो न किं पूर्वं मारितो हरिसूनुना ॥
सूवमर्दस्य साकं तु विरोधकरणेन तु ।
हरफूवहा(१२) यथा नाशं याति शीघ्रं तथा नृपः ॥
अमन्देन समं वैरकरणात् संयुतोऽपि हि ।
युद्धोपकरणैरन्यै [:] सहायैरपि सर्वथा ॥
इति वाक्यं तत्प्रणीतमहीपं प्रति केनचित् ।
आगत्य कथितं शीघ्रं श्रुत्वा राज्ञा तु तत्क्षणे ॥
आखेटकस्य व्याजेन दुर्गतो निःसृतं बहि[:]।
अवदुल्लस्य हननं कर्तुं क्रोधपुरःसरम् ॥
तत्कालं प्रणतिं कर्तुमागतं सर्वपार्थिवैः ।
अजितोऽपि समायातो भूनाथवन्दनाय तु ।१२००
शस्त्राण्युत्सृज्य त्वरया विजितस्य प्रकारतः ॥
आगतं वीक्ष्य तं कर्तुमवदुल्लस्य निग्रहम् ।
महीनाथेन विहितं तत्कालं करचालनम् ॥
द्वास्थैः सर्वात्मना राजचित्तस्थकार्यकारिभिः ।
दण्डघातस्तु विहितस्तत्कालमजितोपरि ॥१२०३
तस्मिन्नेव क्षणे शीघ्रमवदुल्लनिदेशतः ।

---

(१) करगतः । (करगते नाजमंदः स्यात्) । (२) अभिमानी । (गुमानी चाभिमानिनि) । (३) मालाकार० । (मालाकारे बागवानः) । (४) रंगजीवः । (रंगजीवे रंगरेजः) । (५) भारवाहकः । (६) भारं । (अस्मालो (?) भारवाहे स्याद् भारे वारवमुच्यते) । (७) भृत्यः । (नफरस्तु भवेद् भृत्ये) । (८) —(उपक्रमे तु खललं, दखलं विप्लवे भवेत्) । (६)—(नीराजिते तु सदिकं) । (१०) कृतार्थाः । (११) गवाक्ष० । (गवाक्षे स्यात् पंजरहः) । (१२) हरफूवहा—वह्निः । * M. अतः परं य इत्यधिकम् ।

समागतैश्च बहुभिरश्ववारैर्महीपतिः ।
अभितस्त्ववरुद्धस्तु मण्डलीकृत्य भीषणैः ॥
तत्कालमवदुल्लस्य मुखं दृष्ट्वा नृपेण तु ।
कथितं किमिदं चेति तच्छ्रुत्वा तेन तं प्रति ।
भाषितं योजयित्वा तु करौ समरकर्कशौ ॥ १२०६
महीनाथ भवद्भिस्तु संदृष्ट्वा मारवेश्वरम् ।
यच्चालिता भुजलता तन्निवारणहेतवे ।
तस्याः फलमिदं सद्यः फलितं चास्ति शोभनम् ॥
न चास्मिन् भारते वर्षे विफला जायते कृतिः ।
कापि तत्समये राज्ञा द्रुतं प्रीतिपुरःसरम् ।
स्वकान्ताजनकः स्वस्य समाहूतोऽन्तिके शुभे ॥
भवितव्यवशाद्भूमौ भूपानामपि विस्मृतिः ।
जायते केन किं वाच्यमत्रास्ति बलवान् विधिः ॥
यं वै हन्तुं पुरस्कृत्य समायातः पुराद्बहिः ।
महीनाथो मुखं तस्य दृष्ट्वा सौम्यमुखोऽभवत् ॥

❀ ❀ ❀

अवदुल्लस्य मत्तो वै नाशायोग्यस्य संप्रति ।
नाशो न जायते तस्मात् किं कार्यं चात्र नौ मया ॥
इति चिन्तयता राज्ञा यावद्वै संस्थितं स्वयम् ।
तावन्निगमबोधं (?) तु स्नात्वा त्वेकस्तु मान्त्रिकः ।
जयसिंहान्तिके शीघ्रमागतः प्रजपन् मनुम् ॥
जयसिंहेन तं दृष्ट्वा कथितं प्रीतिपूर्वकम् ।
ब्रह्मंस्त्वद्वदनाम्भोजं सश्रीकं दृश्यते यतः ।
अतो मया ते सामर्थ्यं मन्यते सुविलक्षणम् ॥
विश्रम्यतां क्षणं स्थित्वा प्रसादः संविधीयताम् ।
मयि भूसुर संतोषसाधके प्रीतिभावतः ॥
एवं तद्वचनं श्रुत्वा ब्राह्मणेन यथासुखम् ।
स्थितं तत्सैन्यमध्ये तु हंसेन मानसे यथा ॥ १२१७
जयसिंहेन भूनाथसन्निधौ चैकदा स्वयम् ।
विहिता सर्वभावेन प्रशंसा मांत्रिकस्य तु ॥
एकदा मांत्रिकः सो नौ जयसिंहप्रशंसितः ।
सर्वदा सर्वलोकानां दृष्ट्या दृष्टिविघातकृत् ॥१२१९
फर्कसाहमहीपेन सन्तोष्य द्रविणादिना ।
मन्त्रिदृष्टिविघातार्थं प्रहितो मन्त्रिसद्मनि ॥
तत्कालं द्वारदेशस्थमनुजं प्रति प्रीतितः ।
उक्तमेकेन विप्रोऽयमवदुल्लस्य दर्शने ।
नियोक्तव्यो न मद्वाक्यादित एव व्रजत्वसौ ॥
नहुषस्तु यथा राजा पूर्वमात्मदृशा द्रुतम् ।
संहरन् संस्थितस्तज्ज(?)स्तथायमपि मान्त्रिकः ।
स्वदृष्ट्यान्यस्य हरति दृष्टिं मन्त्रप्रभावतः ॥
इति तद्वाक्यतो द्वाररक्षिणा स्वप्रभुं प्रति ।
निवेदितं तु तद्वाक्यात् स्वान्तिके स तु मान्त्रिकः ।
आगन्तुं नैव संदत्तो दत्तं तस्मै धनं बहु ॥
स तस्माद्धनमादाय संतोषेण तु संयुतः ।
आशीर्भिर्वर्धयित्वा तं गतः स्वभवनं प्रति ॥
मांत्रिके विनिवृत्ते तु विषे च विफले सति ।
फर्कसाहस्तु विमना यावज्जातस्तु तत्क्षणे ।
जयसिंहेन कथितं महीपं प्रति वाक्यकम् ।
महीनाथ न नौ मोहं मन्त्रिमारणकर्मणि ।
गम (?) तद्घातकं शीघ्रं गाजदीखाननन्दनम् ।
समाधाय (?) विनोद्योगं जायते नहि नौ जयः ॥
इभकुंभद्वयोद्भूत (?) करणे मृगराड् यथा ।

❀ ❀ ❀

[य ?] था तथा पातसाहो वजीर وزیر (१)
परिवर्जितः ॥
गावखानह گاو خانه (२)
प्रविष्टस्तु यथा शेरस्तु شیر (३) कुश्तनम् । کشتن
गवां करोति तद्वत्सु (?) पातसाहान्तिकस्थितः ॥
१२३१

---

(१) मन्त्री । (वजीरो मन्त्रिणि स्मृतः) (२) गोष्ठ । (गावहखानस्तु गोष्ठे स्यात्)
(३) सिंहः । (सिंहे शेरः निगद्यते) ।

जुमंदहस्तु(१)लोकानां करोति भद्रभिन्नकम्।
तस्माद्विं द(२)खलश्चापि स्यातुं देयो न तत्र तु ॥
हक्कं حق (३) त्यक्त्वा दुरोगं دروغ(४)
न वक्तव्यं भूमिजानिना ॥
हक्कसंत्याजके* भूपे बुत्(५) प्रकोपः प्रजायते ॥
परी پری(६) संदर्शनात् क्षोभो यस्य नैव प्रजायते।
वंदगी بندگی (७) तेन कर्तव्या
पातसाहस्य धीमता ॥
फूराकं فراخ (८)मानसं यस्य वर्तते न
तथादकम्(९)।
तमाम تمام (१०) मुलका(११) धीशो जायते
स तु भूपतिः ॥
दराज دراز स्तु(१२) तथा पुस्तं پشت (१३)
कुत्रापि नहि जायते ॥
अशीलस्तु(१४) तथा बुद्धिशून्यो नैव प्रजायते ॥
दराउ(१५) मध्यभागे तु स्थित्वा पिबति तं यथा।
वाड्वो दुष्टपुरुषो नृपमाश्रित्य तं तथा।
तस्माद्राज्ञा स्वके पार्श्वे न कार्यो विंद(१६) संगतिः ॥

सविषान्नं तु हजमं هضم (१७) यथा भुक्तं
न जायते।
दुष्टमन्त्रियुतं राज्यं वृद्धिं न तनुते प्रभो ॥ १२३६
फरोसंदह فروشنده(१८) हस्तस्थं यथा गृह्णाति सत्वरम्।
खरीद خریدار दारः روغن(१९) प्रीत्या तु
नितरां रोगना (२०) दिकम् ॥
तथा गृह्णाति सौगातं سوغات(२१) यः प्रजातो धरेश्वरः।
तस्य कोशस्तु क्रमतः पूर्णो भवति चावनौ ॥
पुत्रवद् यस्तु नृपतिः प्रजां पुष्णाति सर्वदा।
तस्य संजायते भूमौ चिरकालं तु
जिंदगी زندگی (२२) ॥
राजद्वेषकरो राज्ञा वजीरः (२३) स्वान्तिके नहि।
स्थापनीयः कदाचित्तु सवदा सुखमिच्छता ॥
स्वधर्मे स्वगुरौ स्वस्यामात्ये चैव प्रजायते।
वैरं यस्य करात्तस्य राज्यं नश्यति सत्वरम् ॥
गत्वरं विग्रह [?] प्राप्य न केनापि महीभुजा।
स्वधर्मः सम्परित्याज्यः परधर्मोऽपि कुत्रचित्।
न कर्तव्यः सुखं लब्धुमत्र चापि परत्र च ॥
जयसिंहस्त्वयं राजा नाशयित्वा तु ब्राह्मणान्।
* * * (२४) १२४६

---

(१) क्रूरः। (जुमंदहस्तु पिशुने)। (२) खलः (?)। (खले विंद समीरितम्। (३) सत्यं। (४) मिथ्या। (सत्ये हक्कं तु कथितं, मिथ्यायां (?) तु दुरोगकं) (५) देव०। (बुत् स्याद्देवेषु)। (६) देववेश्या। (परी स्याद्देववेश्यासु) (७) सेवा। (सेवायां वंदगी भवेत्)। (८) विशालं। (फूराकस्तु विशाले स्यात्) (९) वाल्यं (?)। (आदकं वाल्यके मतं)। (१०) समग्रं (समग्रे तमामं स्यात्)। (११) मुलक—···। (१२) दीर्घः। (१३) खर्वः। (दराजस्तु भवेद्दीर्घे, खर्वे पुस्तं निगद्यते)। (१४) कुलीनः। (अशीलस्तु कुलीने स्यात्) (१५) समुद्र०। (समुद्रे तु दरायुः स्यात्) (१६) धूर्त०। (धूर्ते विंद समाख्यातं) (१७) जीर्णं। (जीर्णे तु हजमं भवेत्)। (१८) विक्रेता। (विक्रेतरि फरोसंदहः) (१९) क्रेता (खरीददारः क्रेता स्यात्) (२०) घृतं। (घृते तु रोगनं भवेत्। (२१) करः। (सौगातस्तु करे भवेत्) (२२) जीवनं। (जीवने जिंदगी भवेत्। (२३) मन्त्री। (वजीरो मन्त्रिणि स्मृतः)। (२४) The context in between the asterisks in Pp. 49-50 appears to be out of place here.

* M. ०ज्यके।

चतुरोऽस्ति तथा चास्ति गाजदीखाननन्दनः ।
दुष्टयोरनयोर्भ्रात्रोर्भङ्गकर्मणि दक्षिणः ॥
कलीचो बुद्धिसम्पन्नो यावन्नायाति तेऽन्तिके ।
तावद्विधीयते गर्वस्त्ववदुल्लेन मन्त्रिणा ॥
इत्यामेरपतेर्वाक्यं निशम्य धरणीभृता ।
गाजादीखानतनयः समाहूतो निजान्तिके ॥
कृत्वा सोऽपि समायातः सन्नाहं सेनया सह ।
दिनत्रयेण बलवान् सदा समरदक्षिणः ॥
आगत्य तेन नमितः सार्वभौमः पुरस्थितः ।
उक्तं च तस्य निकटे योजयित्वा करद्वयम् ॥
महीनाथाखिलनृपवन्दिताङ्घ्रिसरोरुह ।
किमुद्दिश्य मम[ष्काल (?) ह्वान] विहितं
चास्ति सम्प्रति ॥ १२५६
इति तद्वचनं श्रुत्वा बहिर्निःसार्य चाखिलान् ।
स्वान्तिकस्थांस्तदग्रे तु कथयामास वाक्यकम् ॥
यथाहमवदुल्लेन मौजदीनस्थले पुरा ।
स्थापितोऽस्मि तथा चाहमवदुल्लस्थले हि त्वाम् ।
स्थापयामि त्वया वाक्यं मन्तव्यं मम सर्वथा ॥
एवं वाक्यं समाकर्ण्य फर्कसाहस्य धीमतः ।
गाजदीखानपुत्रेण कथितं किल तं प्रति ॥
नाथ जीवति भूनाथे महीपोऽन्यो न जायते ।
यथा जीवति चामन्दे नैव मन्त्र्यन्तरं तथा ॥
सतरंजस्य क्रीडायां पत्तयः परगेहगाः ।
परावृत्य प्रजायन्ते सर्वे एव हि मन्त्रिणः ॥
विद्यमानेऽपि सचिवे देशशक्तिप्रभावतः ।
तथात्र स्वेच्छया राजन् जायन्ते नहि मन्त्रिणः ॥
भवद्भिर्द्विसात् किन्न जाहगीरादिनामकाः ।
कृताः सन्ति कथं जातं तत्रास्ति तादृशं चर ॥
संभिनत्ति महीपो यो मर्यादां पूर्वराजभिः ।
स्थापितां न च तस्यापि मर्यादा किल तिष्ठति ॥ १२६५

अवदुल्लो यदा प्राणरहितः संभविष्यति ।
तदाहं संभविष्यामि सचिवस्ते सुतान्वितः ॥
इति तत्समये भूमिनाथश्चावश्यकार्यकम् ।
कर्तुं मन्दिरमध्ये तु गतः सोऽपि स्वके गृहे ॥
कलीचस्य तु सम्मानं विलोक्य भयसंयुतः ।
अवदुल्लस्तु संजातो यावद्वै मन्दिरस्थितः ॥
तावत् समागतस्त्वेको ब्राह्मणो ज्ञानसंयुतः ।
तेनावदुल्लो निःश्रीकश्चन्द्रसंस्पृष्टपद्मवत् ।
संदृष्टस्तत्क्षणे तेन कथितं किल तं प्रति ॥
यदार्कवासरे मध्यंदिने फाल्गुनमासके ।
रविणा तमसो योगस्तदा मुख्यनृपक्षयः ॥
इत्यादिवचनात् फर्कसाहस्यास्मिंस्तु वत्सरे ।
शुभं न भविता चास्ति तस्मात्त्वं विजयी भव ॥
पौषे वा मार्ष[र्ग ?]शीर्षे वा पंच वागीशवासराः ।
पतन्ति वत्सरे यस्मिन् तदेन्द्रप्रस्थके भयम् ॥
इत्यादिवचनादस्मिन् वत्सरे बलभिद्गुरोः ।
वासराः पतिताः सन्ति पञ्च यस्मान्न वै शुभम् ।
फर्कसाहस्य भविता तस्मात्त्वं त्यज जह्कम् ॥ १२७४
त्वद्भ्रातापि समानीय वाहिनीं चतुरङ्गिणीम् ।
समायातोऽस्ति मा चिन्तां कुरु चावश्यकं कुरु ॥
इति ब्राह्मणवाक्यं तु श्रुत्वा तेन तु संस्थितम् ।
यावत्तावत्तु तद्भ्रातुः सेनापालः समागतः ॥
तेनोक्तं तस्य निकटे योजयित्वा करद्वयम् ।
उक्तं (?) तवानुजः श्रीमान् दाक्षिणात्यान्
भटान् बहून् ॥ १२७७
समादाय समायाति त्वत्त्रासक्षयहेतवे ।
अतः परं त्वया त्याज्या चिन्ता चित्तविषादिका ॥
तत्कालं द्रविणं दत्त्वा स विप्रस्तेन तोषितः ।
उक्तं च तस्य निकटे वाक्यमेतत् सुलक्षणम् ॥
विप्रवर्य त्वया द्रव्यग्रहणे न विधीयताम् ।
संकोचो मम सम्बन्धात् सुखेन प्रतिगृह्यताम् ॥ १२८०

अवनौ यवनादन्यो धन्यो नैवास्ति वै यतः ।
अतो विधीयते तेन नितरां सार्वभौमता ॥
यस्याहष्टेन यद्द्रव्यमुत्पन्नमस्ति तेन तु ।
तस्य द्रव्यस्य भोगस्तु तेनैव (?) संविधीयते ।
इत्युक्त्वा स्वानुजस्यार्थे पत्रमेकन्तु प्रेषितम् ॥
तत्क्षणे भवता शीघ्रमागन्तव्यं न वै क्वचित् ।
विलम्बः संविधातव्यो जयसिंहजिगीषया ॥
यावन्नायं कुरुक्षेत्रं प्रति गच्छति भूमिपः ।
अत्रागत्य च तावत्त्वं कुरु क्षेत्रं रणस्य तु ॥
एवमात्माग्रजस्योक्तं श्रुत्वा तस्यानुजेन तु ।
त्वरया तु समायातं स्तुत्वा चैव तु नर्मदाम् ॥
शंभुमस्तकसंभूते नर्मदे सर्वशर्मदे ।
स्वपापपरिहाराय पतामि तव पादयोः ॥
तव संस्मरणान्नृणां विषसर्पभयं यथा ।
न जायते तथा देवि तव संस्मरणान्मम ।
अनायासेन समरभूमौ संजायतां जयः ॥
तोयरूपं समास्थाय भूमौ चरसि नर्मदे ।
यथा तथैव पापानि ममापि दुःखदानि तु । १२८६

विनाशय महाभागे नर्मदे सर्वशर्मदे ॥
जयसिंहो यदा देवि विजेतव्यो यदा(1) रणे ।
तदा मया त्वदर्चा तु करणीया यथाविधि ॥
सर्वेषां शर्मदा चासि यथा त्वं नर्मदे सदा ।
तथा मय्यपि कल्याणि भव (2) कल्याणदायिका ॥
बाणपूजितलिङ्गैस्तु मण्डितासि यथा सदा ।
तथा ममापि कल्याणजनिकासि निरंतरम् ॥
गगने दहने सूर्यबिम्बे पर्वतमस्तके ।
यथा तिष्ठति विश्वेशस्तथा त्वय्यपि नर्मदे ॥
लोकानां पातकध्वंसकरणाय निरन्तरम् ।
त्वत्तोयपानकरणात् सङ्गरे मम मानसम् ।
न क्वचिज्जायतां देवि व्याकुलं सर्वभावतः ।
अवधार्य मया चेदं पीयते शंबरं तव ॥
तव शम्बरपानेन शम्बरारिसमं बलम् ।
जायतां नर्मदे देवि किं वाच्यमधिकं मया ॥
इत्युक्त्वा नर्मदातोयपानं पीयूषपानवत् ।
कृत्वा यावत् स्थितं तावन्महमद्खानकेन(3) तु ॥
१२६८

---

1. मयेति कथञ्चिद्गति । 2. M भद्र । 3. अस्यान्वयो दुर्घटः । The reference here is, probably, to Md. Amir Khan Chin, Governor of Malwa, who, at that time, encamped near Ujjain. Nasir-ud-din Khan Irāni was sent by the Emperor to interview Md. Amin Khan and induce the latter to take active steps and intercede Husain Ali Khan on his way to Delhi. But Md. Amin Khan left Ujjain for Delhi without orders. As a consequence, he was deprived of his rank (mansab) and his revenue assignments (jagirs).

Ikhlas Khan who was sent by Farrukh Siyār to intercept Husain Ali Khan on the way near about Narmada reached Māndu by the end of December, 1718. His interview with Husain Ali filled the latter with a greater zeal to march for Delhi for taking immediate steps against the Emperor.

दक्षिणाशां परित्यज्य सवकर्मसु दक्षिणः ।
अवदुल्लानुजो नात्र (१) यथायाति तथा कुरु ॥
एवमुक्त्वा फर्कसाहमहीपेन महात्मना ।
अहं संप्रेषितश्चास्मि तस्मादद्य न नर्मदा । १३००
उल्लंघनीया भवता पातसाहनिदेशतः ॥
भूमिपस्य निदेशं यो मनुते तस्य वै शिवम् ।
यथा भवति भूलोके तथान्यस्य न जायते ॥
तस्माद्भूमीपतेराज्ञा सर्वभावेन मानवैः ।
विधातव्या सुखं लब्धुं खण्डनीया न कुत्रचित् ॥
एवं तदुक्तमाकर्ण्य हस्नलीकेन तं प्रति ।
कथितं भ्रुकुटिं बद्ध्वा तत्कालसदृशं वचः ॥
एवं वाक्यस्य कथनाद्गम (?) मा यममन्दिरम् ।
स्थित्वा मत्सैन्यमध्ये तु पश्याशु निजमन्दिरम् ॥
सन्नतेन(२) समं युद्धममंदस्य(३) न यद्यपि ।
उचितं चास्ति कुत्रापि तथापि प्राकृतेन तु ।
वैरेण तस्य धरणाकरणे मम मानसम् ।
व्याकुलं जायते नैव सुप्रसन्नं प्रजायते ॥
विनापराधं यो राजा यं कञ्चिदपि मानवम् ।
व्यापादयति राजानं सोऽपि नूनं भवान्तरे ॥
कृतं पूर्वभवे फर्कसाहेन मम वै वधः ।
भविष्यति मया तस्माच्चिन्त्यते किल तद्वधः ॥१३०६

इत्युक्त्वा तं स्वसेनायां स्थापयित्वा तु नर्मदाम् ।
उल्लङ्घ्य तु समायातो हस्नलीकस्तु तत्क्षणे ॥
दाक्षिणात्यभटैर्युक्तः(४) स्वयं शौर्यसमन्वितः ।
समायास्यति चामेरमार्गेण तर्हि मत्पुरम् ॥
न स्थास्यतीति निश्चित्य जयसिंहेन स्वान् प्रति ।
उक्त्वा संप्रेषितं वाक्यं चतुरेण सुबुद्धिना ॥ १३१२
संप्रवृद्धहुताशस्य सर्वतो जलदानतः ।
यथा भवति वै शान्तिः करिमस्यापि वै तथा ।
द्रव्यदानेन नितरां सर्वत्र धरणीतले ॥
तस्मात्तोषो यथा कृत्वा जायते तस्य सत्वरम् ।
तथा यत्नो विधातव्यो भवद्भिः सुविचक्षणैः ॥
पुरतो दूरदेशस्थे पुरस्वामिनि वै पुरे ।
भये समागते यो नौ करोति तद्व्ययक्षयम् ॥
पुरेशेन विधातव्यं सर्वतस्तस्य रक्षणम् ।
इति तस्य स्वयं चापि पत्रं संप्रेषितं शुभम् ॥
महीपोऽस्ति यथास्माकमुपास्यः सर्वभावतः ।
तथा तत्प्रीतियुक्ताश्च सन्त्युपास्या निरन्तरम् ॥
महीपोऽस्ति यथास्मभ्यं प्रीतियुक्तस्तु संप्रति ।
अस्मभ्यं संविधातव्या युष्माभिरपि नौ तथा ॥
एकस्वामिकतात्वेन हेतुना ह्यावयोः सदा ।
प्रीतिरेवोचिता चास्ति नोचितोऽस्ति विरोधकः ॥
इति तद्वचनात्तुष्टः संजातो नृपतिं प्रति । १३२१

---

(१) MS. वाऽत्र । (२) राज्ञा । (३) मन्त्रिणः । (४) Whereas there were 8,000 to 9,000 of Husain Ali Khan's own troops, 11,000 or 12,000 thousand Mahrattas, besides Bhils and Telingas also accompanied him. At the head of the Mahrattas were Balaji Viswanatha, the Peshwa, Khandu Rao Dhaboriya, Santa and some other leaders who had been gratified with many promises for the future besides the release of Raja Sambha's wife and son.

हस्नलीको हसित्वा तु तेनोक्तं सैनिकं प्रति ॥
आमेरदेशमध्ये तु मदीयः कोऽपि मानवः।
सेनास्थो न च गृह्णातु तृणमप्यवनीगतम् ॥
जयसिंहस्य विषये यः कोऽपि करचालनम् ।
करिष्यति स मे वध्यो भविष्यति न संशयः ।
इति तेन करौ योज्य प्रमन्द (१) मिति भाषितम् ॥
अवदुल्लानुजेनैवमुक्तमित्यवधार्य तु ।
तदग्रजाय राजापि विरोधविमुखोऽभवत् ॥
सीम्नि चामेरदेशस्य जयसिंहसुतेन तु ।
अवदुल्लानुजं द्रष्टुमागतं सवलेन तु ॥
तं दृष्ट्वा प्रीतिपूर्वं तु हस्नलीकेन भाषितम् ।
राजपुत्र सुखं तिष्ठ सलामो (२) سلام मम गृह्यताम् ॥
त्वत्तातपत्रसंदर्भमवलोक्य मम स्थिरा ।
त्वयि प्रीतिस्तु संजाता वर्त्तते भवताधुना ॥
गजमारुह्य गन्तव्यं स्वपुरं प्रति सत्वरम् ।
राजपुत्र मम भ्राता त्वं चासि न च मे रिपुः ॥
इत्युक्त्वा विंध्यजो विंध्यप्रतिमो भूषणैर्युतः ।
गजस्तस्मै तु संदत्तः परवारणवारणः ॥
तद्दत्तगजमादाय जयसिंहात्मजः सुधीः ।
ददौ तस्मै प्रीतिपूर्वं मणिमुक्तात्मकं धनम् ॥
सोऽपि तद्दत्तमादाय ततः प्रचलितः स्वयम् ।
चारैरागत्य कथितं तत्काले भूपतिं प्रति ॥
औरङ्गजेवभूमीन्द्रे भूतलादतलं प्रति ।
गते सत्यग्रजं जेतुं यावत्या सेनया सह ॥
समागतः स्थितः पूर्वम् आजमाख्यो महीपतिः ।
रणश्रद्धायुतो वीरस्ततोऽपि प्रचुरं बलम् ॥ १३३४

आदाय हस्नलीखानः समायातोऽस्ति सांप्रतम् ।
उपेक्षा न विधातव्या यद्योग्यं तद्विधीयताम् ॥
नरदे(३) नागतो यावद्वीजन्या(४)स्तव चोद्धतः ।
तावत् स्वस्वामितां वेत्सि त्वं तस्मिंस्तु समागते ।
अचिरेणैव कालेन विस्मरिष्यति चाखिलम् ॥
वृन्दावनात् समागत्य यथा कृष्णेन घातितः ।
कंसः पुरा तथा सो वै भवन्तं घातयिष्यति ॥
चाराणां वचने यस्य विश्वासो नास्ति सर्वदा ।
स्वचाररहितः शीघ्रं जायते स तु पार्थिवः ॥
एवं पेष(५) जलासं(६) तु कृत्वा तु श्रुतिगोचरम् ।
फर्कसाहेन कथितं वाक्यं स्वश्वशुरं प्रति* ॥
अजितस्तु जितप्रायजनवत् प्रतिवासरम् ।
अवदुल्लगृहे याति कर्तुं किंकरतां स्वयम् ॥
जयसिंहोऽपि तत्सेनामवलोक्य भयेन तु ।
गन्तुमुत्सहते स्वस्य मन्दिरं प्रति संप्रति ॥
कलीचोऽप्यवदुल्लस्य हननांशे करोति वै ।
उपेक्षां बहुधा सोऽपि वर्तते तु तदीयकः ॥
खानदौलापि तत्सैन्यमवलोक्य शरीरके ।
प्राणसंधारणं कर्तुं न शक्नोति यथासुखम् ॥
अस्ति या जनयित्री मे सापि सर्वात्मना वधम् ।
तस्य नेच्छति किं कार्यं तद्वाच्यमविलम्बतः ॥
अजितसिंहतनया यास्ति सापि पराजयम् ।
मम चेच्छति किं कार्यं तद्वाच्यमविलम्बतः ॥
बुद्धिसिंहोऽपि समरश्रद्धाशून्यस्तु साम्प्रतम् ।
वर्तते भीमसिंहस्तु तदीयोऽस्ति न संशयः ॥
अन्येषां भौमिकानां तु क्षणं समरमूर्धनि । १३४७

(१) प्रमाणं। (प्रमाणे तु प्रमंदः स्यात्)। (२) अभिवादनम्। (३) निकटे। (निकटे नरदो भवेत्)। (४) राजधान्याः। (राजधान्यां तु वीजनी)। (५) चार०। (६) वचनं। (चारे पेषः समाख्यातः, जलासो वचने भवेत्)। * अत्र किञ्चिद् वैषम्यं स्यात्।

सामर्थ्यं नास्ति किं कार्यं तद्वाच्यमविलम्बतः ॥
एवमात्मप्रभोर्वाक्यमाकर्ण्य तेन तं प्रति ।
हस्तौ संयोजयित्वा(१) तु कथितं प्रीतिपूर्वकम् ॥
यथास्ति तद्वधोपायचिन्तनं सांप्रतं तथा (?)।
यथा चासदखानेन मौजदीनो विनाशितः ।
तथा चैवावदुल्लेन तव नाशो विधीयते ॥
दुर्गमध्ये न संगन्तुं दत्तस्तेन स भूमिपः ।
तुभ्यं दुर्गाद्बहिर्गन्तुं नानेन किल दीयते ॥ १३५१
परिणामे तु चैतस्य विध्वंसः संभविष्यति ।
काष्ठनाशाद्यथा नाशो दहनस्य प्रजायते ।
स्वामिनाशात्तथा नाशः स्वामिव्यापादकस्य तु ॥
शस्त्रागारस्य चाध्यक्षस्त्वयैवाद्यावदुल्लकः ।
कृतोऽस्ति द्वारदेशस्तु तस्मै दत्तोऽस्ति वै त्वया ॥
अवरोधजनानान्तु रक्षकः सैव वै त्वया ।
कृतोऽस्ति द्रविणागारं तदधीनं त्वया प्रभो ॥
कृतमस्ति न चौकस्य कर्णार्जुनसमं बलम् ।
अस्ति तस्माद्बहिर्देशे बलं नीत्वा स्वकं मया ।
दुर्गस्थितोऽवदुल्लश्च भीषणीयस्त्वदाज्ञया ॥ १३५६
पूर्वं त्वया न वै यत्नो विहितः कोऽपि सांप्रतम् ।
नितरां प्राप्तकाले तु को वा यत्नः प्रजायते ।
प्राप्ते काले न कस्यापि यत्नः कुर्वीति (?) रक्षणम् ॥
कंसेन कृष्णशयतो मरणानाप्तये (२) पुरा ।
न किं यत्नस्तु विहितः किं तेन स तु रक्षितः ॥
वज्रनाभेन मरणवञ्चनाय न किं कृतः ।
पुरा यत्नस्तु किं तेन विहितं तस्य रक्षणम् ॥
अभिमन्युतनूजेन मरणाक्षयहेतवे ।
सर्पात् पुरा न किं यत्नः स्वयं वै विहितः स्थितः ॥ १३६१
पुरा येन तु यः प्राणशून्यः संविहितोऽस्ति वै ।
अनपराधं तेनापि तस्मात् संप्राप्यते वधः ॥
इह तस्मात्तु(३) केनापि कोऽपि वै प्राणवर्जितः ।
न कर्तव्यः स्वकाः प्राणा रक्षणीयाः प्रयत्नतः ॥
यत्नाद्यद्यपि भूतानां भवितव्यस्य संक्षयः ।
न जायते कृते तस्मिंस्तथापि न च वाच्यता ॥
नाथ नात्र भवद्दोषो वर्तते नापि मन्त्रिणः ।
अन्येषामपि भूपानां विषमाणां च कोऽपि न ॥
येनैव परमेशेन त्वत्कृतानां तु कर्मणाम् ।
शुभानां तु फलं तुभ्यं सार्वभौमात्मकं शुभम् ॥
दत्तं स्थितं तु चैतावत्कालं तेनैव संप्रति ।
कर्मणामशुभानां तु फलं संदीयते प्रभो ॥ १३६७
तस्मात्त्वया यथा देहे जीवस्तिष्ठति भोगकृत् ।
तथोपायो विधातव्यो जीवन् भद्राणि पश्यति ॥
इति तद्वचनं श्रुत्वा पञ्जरस्थितपक्षिवत् ।
बहिर्गन्तुं स्वयं मार्गं भृशं मार्गयता स्थितम् ॥
महीपेन समायाते काले किंचित् सुखप्रदम् ।
न संस्मरति वै बुद्धौ कस्यापि जगतीतले ॥
छलं कृत्वा हरिः श्रीमानागतोऽस्ति त्वदन्तिके ।
त्वया न किञ्चिद्दातव्यमेतस्मै भार्गवेण तु ॥
उक्तमेव स्थितं दैत्यनाथं प्रति हितैषिणा ।
तदुक्तं बलिना किं वै समानीतं स्वमानसे ।
भवितव्यवशाद्बुद्धिः सर्वेषामेव हीयते ॥
एवं दिनेषु गच्छत्सु केषुचिदवनीपतिम् ।
अवदुल्लानुजो धीमानभिवादयितुं मुदा ॥
समागतः करौ बध्वा करमादाय वै ततः ।
प्रचुरं भूमिनाथस्य कोशसंवर्धनोचितम् ॥
अहीनकुलसंयुक्त (४) महीप पुरतः स्थितम् । १३७५

(१) संयोज्येति साधु । (२) Ms. ०घाप्तये ।
(३) M. तस्मान्न । (४) संभूत इत्युचितः पाठः ।

विलोकय सुधारश्मिसौम्य मां प्रीतिभावतः ॥
यथाहिर्नकुलं द्वेष्टि नकुलश्चापि वै फणिम् (?)।
तथा त्वं लोकवचनान्नास्माकं भादरं (१) कुरु ॥
सादरं सरदं (?) स्वस्य पृष्ठाऽस्मभ्यं निरन्तरम् ।
प्रीतो भव महीपाल जयसिंहादिवाक्यतः ।
विध्वंसं कुरु नास्माकं कुरु राज्यमकण्टकम् ॥ १३७८
विंध्य (२) भादरतो नाशो रसद्रावस्य (३) जायते ।
यथा तथा नृपद्रोहादमात्यस्य प्रजायते ॥
राजद्रोहाद्यथा नाशो जायते किल मन्त्रिणः ।
मन्त्रिद्रोहात्तथा नाशो महीपस्यापि जायते ॥ १३८०
गो-विप्रामात्यबालेषु क्रोधस्य करणेन तु ।
नरेन्द्राणां शये किञ्चिन्नायाति जगतीतले ॥
संततिर्नास्ति भूलोके यस्य कापि स वै पुमान् ।
हत एवास्ति दैवेन तस्य संहननेन तु ।
पौरुषं स्मर्यते नैव त्वद्विधानां तु मा(४)दृशैः ॥
वैरिवर्गस्य हननान्नृपाणां यादृशं यशः ।
जायते भृत्यवर्गस्य हननात्तादृशं न हि ॥
अतिमत्तोऽपि नागेन्द्रः स्वकरस्य तु भञ्जनम् ।
किं करोति त्वयाऽस्माकं कथं कार्यो वधः प्रभो ॥
अमात्ययोग्यतास्माकं यदि वै नास्ति भूमिप ।
निःशङ्कं कुरु तर्हि(५) त्वं सर्वथा सचिवान्तरम् ॥
वज्राद्युपहतं लिङ्गमुत्पाट्य तत्स्थले न किम् ।
लिङ्गान्तरं प्रयच्छन्ति रोषागमनशङ्कया ॥
पिचुमन्दस्थले किं वै रसालस्याधिरोपणम् ।
न कुर्वन्ति जनाः सर्वे दोषागमनशङ्कया ॥
प्रजायते पदस्थस्य मर्यादाच्युतितश्च्युतिः ।
मर्यादाहानितः स्वर्गान्नहुषः पतितो न किम् ॥ १३८६
अतः परं महीपाल नास्माकं त्वमसि प्रभुः ।
वयं च सचिवा नास्मस्तव यत् स्मर्यते त्वया ।
अविलम्बेन तत् कार्यं विलम्बो न विधीयताम् ॥
स्वादृष्टवशतो लब्धं पुण्यशून्यस्य दुर्लभम् ।
इदानीं कुरु राज्यं त्वं श्वो भाव्यं संभविष्यति ॥
भविष्यध्वंसकरणे चतुरो नास्ति वै विधिः ।
अन्येषां तत्र चातुर्यं कथं वै संभविष्यति ॥
इत्युक्त्वा नृपतिं नत्वा हल्लीको गृहं प्रति ।
गतो राजापि गमनमार्गेषु निखिलेषु च ॥
तदीयानेव निखिलान् रक्षकान् वीक्ष्य तत्क्षणे ।
इच्छंश्चापि बहिर्गन्तुमशक्तः स्त्रीकदम्बके ॥ १३९५
राजासनं समुत्सृज्य विपिने नागराडिव ।
प्रविष्टस्त्वाप्तवाक्येन प्रहितो जीवनाशया ॥
आयान्तं कालयवनं दृष्ट्वा कृष्णो न किं गतः ।
प्रपलाय्यात्मरक्षार्थं मुचुकुन्ददरीं प्रति ॥
जामदग्न्येन रामेण क्षत्रिया निहता यदा ।
तत्कालं बाहुजः कोऽपि नारीभी रक्षितः स्थितः ॥
इति मत्वा स्वकीयां तु रक्षां कर्तुं स्थलान्तरम् ।
त्यक्त्वा मध्ये तु नारीणां फर्कसाहः स्वयं गतः ।
तत्कालं जयसिंहस्तु गतः स्वविषयं प्रति ॥ १४००
सिंहीक्रोडं परित्यज्य समागतमृगाधिपम् ।
दृष्ट्वा गजो यथा याति स्थानमुत्सृज्य सत्वरम् ।
अन्यत्र हल्लीकं तु तथा प्रचलितो नृपः ॥
आत्मा न रक्षितो येन विषयस्तेन वै कथम् ।
रक्षणीयेति(?) संस्मृत्य जयसिंहेन गच्छता ।
सोमराख्यप्रदेशस्तु लुण्ठितो वित्तलिप्सया ॥ १४०३
प्रभाते चावदुल्लेन संद्रष्टुं नृपतिं गतम् ।
हल्लीकेन विहितं सेनया पुरवेष्टनम् ॥
जरासंधेन भूपेन यथा वै मथुरा पुरी । १४०५

(१) दूषं । (२) उपदेशाक । (उपदेशके भवेद्विन्ध्यः) । (३) शिष्यस्य । (रसद्रावस्तु शिष्यके) ।
(४) M. या० । (५) M. त्वं तर्हि ।

पुरा संवेष्टिता कंसनिष्कृतिं कर्तुमिच्छता ।
फर्कसाहस्य नगरी हस्नलीकेन वै तथा ॥ १४०६
अवदुल्लेन तत्कालं राजा राजासने स्थितः(१) ।
तत्कालं तस्य निकटे न कैरपि निवेदिता ।
राज्ञः स्थितिश्च तत्प्रीतिपाशितैर्दुर्गसंस्थितैः ॥
सभायां तमदृष्ट्वा तु तस्य चाभ्यन्तरे स्थितिम् ।
विज्ञाय तत्र पुरुषाः प्रेषिता दुष्टमन्त्रिणा ।
सन्नद्धा नितरां क्रूरा मनोवाक्कायकर्मभिः ॥१४०८
नारीणां कवचं कृत्वा स्थितस्यास्योचितो न हि ।
वर्तते निग्रहश्चेत्थं केनचिन्न हि मानसे ॥
विहितं सर्वभावेन सर्वैरेव कुबुद्धिभिः ।
नारीणां त्रासनं कृत्वा द्वितीयेऽह्नि स भूपतिः ।
संदृष्टस्तैस्तु कथितं तत्कालं भूमिपं प्रति ॥
गदाभिः सायकैश्चापि शक्तिभिश्चापि वै यतः ।
अवदुल्लस्त्वयं रात्रौ नारीभिर्न हतो भृशम् ।
अतस्त्वय्यरिभावस्तु विहितोऽस्माभिरेव च ॥ १४१३
वयं तु पूर्वं ते भृत्याः संस्थिताः सांप्रतं त्वया ।
अवदुल्लस्य हस्ते तु विहिताः स्मो न संशयः ॥
राजन् राजासने चाद्य त्वद्बन्धुः स्वार्जितेन तु ।
पुण्येन चोपविष्टोऽस्ति तस्मात्त्वं मन्दिरान्तरम् ।
व्रज मा चर संकोचं भोगान्ते जायते च्युतिः ॥
इन्द्रद्युम्नस्तु भूपालो भोगान्ते नाकतो द्रुतम् ।
पुरा न किं च्युतस्तस्माच्छोकं मा कुरु भूमिप ॥
इति तेषां तु वचनादागच्छन्तं महीपतिम् ।
दृष्ट्वा मन्दगतिं कान्तिभ्रष्टं शोकपरिप्लुतम् ॥
भोगान्ते पततः स्वर्गाद्दर्शनं न सुखावहम् ।
यथास्ति क्षीणपुण्यस्य लोकानां सर्वभावतः ॥१४१८
तथा नृपस्य सर्वेषां पदप्रच्युतिदर्शनम् ।

वर्तते (?) त्ववधार्यैवमवदुल्लादिभिर्नृभिः ॥
मुखान्याच्छाद्य वसनैः कृतं नेत्रविमुद्रणम् ।
उत्पातदर्शनं भूमौ न कस्यापि प्ररोचते ॥
राज्ञा तत्समये प्रोक्तं योऽस्ति विश्वम्भरो हरिः ।
सर्वज्ञो भवतां कर्म विजानातु जगत्स्थितः ॥
अस्मिन् राजासने यो वै संस्थास्यति(?) स्थितश्च यः ।
सोऽपि जानातु त्वत्कर्म किं वाच्यमधिकं मया ॥
इति वाक्यं समाकर्ण्य हस्नलीकेन प्रेषितम् ।
अवदुल्लस्य भृत्येन महीपाय प्रदर्शितम् (२) ।
तद् दृष्ट्वा स महीनाथो न च किञ्चिज्जगौ वचः ॥१४२५
सुखसंजनकादृष्टे सति संजायते यथा ।
सुखं तथैव दुःखं तु दुःखसंजनके सति ॥
अत्र कस्यापि नैवास्ति दोषः सर्वैस्तु प्राकृतैः ।
कर्मभिर्लभ्यते सौख्यं तैरेव तद्विरुद्धकम् ॥
बलिर्देवेशतां प्राप्य न किं स्वर्गाच्च्युतोऽस्ति वै ।
इन्द्रोऽपि कतिवारं न किं च्युतोऽस्ति स्वकात् पदात् ।
इत्युक्त्वा मानसे स्वस्य चकार न च कश्मलम् ॥
महान्तः पद्मपत्राभा ह्यापत्पङ्काम्बुसंगताः ।
मलिना न हि जायन्ते स्वच्छा एव स्वभावतः ॥
जयसिंहादिभूपानां स्मृत्वा चापि वचोगणम् ।
मुदर्मौं(३) सर्वसंवेद्यं चकार निजमानसे ॥
एतस्मिन्नेव समये गाजदीखानकेन तु ।
स्वामिनं संकटाक्रान्तं ग्राहग्रस्तगजेन्द्रवत् ।
न चोद्धरति यो भृत्यस्तस्य जन्म निरर्थकम् ॥
इत्युक्त्वा युद्धमारब्धं बहिर्देशस्थितेन तु ।
तस्यामात्येन तस्याग्रे कथितं समयोचितम् ॥ १४३३
एकोऽसि त्वं तदीयास्तु बहवः सन्ति चात्र तु ।

---

(१) अतः परं किञ्चित् पतितं प्रतिभाति । (२) प्रदर्शितमित्यस्य कर्मपदं मृग्यम् । (३) ईश्वरं ।

एकेन भवता चैते जेतव्यास्तु कथं भटाः ।
इति तद्वाक्यमाकर्ण्य तेनोक्तं किल तं प्रति ।।
एकोऽपि बुद्धिसंपन्नो विक्रमेण समन्वितः ।
अरिणा चावरुद्धं तु समुद्धरति प्राणिनम् ।।
गजेन्द्रो ग्राहसंग्रस्तो न केनापि प्रमोचितः ।
एकेन किन्न कृष्णेन मोचितः संकटे स्थितः ।।
इत्युक्त्वा बहवस्तेन शरैः सन्नतपर्वभिः ।
मारिता धरणीपालपुरप्राकारवेष्टकाः ।। १४३७
दाक्षिणात्याः सदा शूराः समरे दृढविक्रमाः ।
गाजदीकार्मुकोन्मुक्तविशिखैः कृत्तमस्तकैः ।
आकीर्णा मेदिनी रेजे तत्कालं चण्डिका इव(१) ।।
तदानीं गाजदीखानं दाक्षिणात्या यमप्रभम् ।
मत्वा पलायिताः सर्वे यावत्तावत्तु केनचित् (२) ।।
येषां बलं समाश्रित्य हस्नलीकेन चागतम् ।
पलायनं किमर्थं तैः क्रियते कपटान्वितैः ।। १४४१
पुरप्राकारतस्तांस्तु निर्गतान् वीक्ष्य हस्नली ।
अपरान् प्रेषयामास भटान् समरदुर्जयान् ।।
गाजदीखानकोदण्डनिर्मुक्तसायकव्रजैः ।
खंड्यमाना न ते तस्थुस्तत्र वै क्षणमात्रकम् ।।
एवंभूतं तु संवीक्ष्य गाजदीखानविक्रमम् ।
मोचितान्यग्नियन्त्राणि हस्नलीवाक्यतस्तु तैः ।
उक्त्वा च प्रेषितं वाक्यमवदुल्लं प्रति स्वयम् ।।
अहोरात्रं पुरे स्थित्वा त्वया मे वाहिनीत्रयः ।
कारितोऽस्ति पुमर्थस्तु न कोऽपि विहितस्त्वया ।।
एवं चेत्तव सामर्थ्यं ज्ञातं स्यान्न मया ततः ।
आगतं स्याद्यथा कृत्वा हितं सेनायुतस्य मे ।
जायतेऽद्य तथा कार्यं विलम्बो न विधीयताम् ।।१४४७

एवं स्वानुजवाक्यं तु श्रुत्वा तेन जनान् प्रति ।
पातसाहस्थले पातसाहजस्य तु सत्त्वतः ।
भविष्यति जगत्सौख्यं न चान्यस्थितितः क्वचित् ।।
हीरसंमण्डिते कीरपञ्जरे कलविंककः ।
प्रविष्टः शुकवद्वाक्यं वक्ति किं रमणीयकम् ।।
इत्युक्त्वा चावदुल्लेन नितरां तु सुबुद्धिना ।
आत्मापवादनाशाय द्रुतं वेगमवाक्यतः ।।
कारागृहात् समानीय रफीलकदरात्मजः ।
अध्यासितः सुरत्राणपदे पुण्यैकलभ्यके ।।
रोटिकाद्वितयं तस्मै भोक्तुं दत्तं तु तत्क्षणे ।
तेन ग्रासद्वयं भुक्त्वा पार्श्वस्थाय तु मन्त्रिणे ।।
रोटिकाद्वितयं दत्तं भुक्तं तेनापि तत् स्वयम् ।
पायितं चापि तत्काले सौख्यदं शर्करोदकम् ।।
एवं कृत्वा बहिर्वाक्यमुक्त्वा संप्रेषितं त्विदम् ।
राजा संप्रति जातोऽस्ति रफीलकदरात्मजः ।।
राज्यभोगस्य करणात् परिश्रान्तेन संप्रति ।
फर्कसाहेन प्राज्ञेन गृहीता धृतराष्ट्रता ।। १४५६
अस्ति तस्मान्न योद्धव्यं भवद्भिः प्रीतिभावतः ।
भूमिनाथं तु संद्रष्टुमागन्तव्यं यथासुखम् ।।
यस्य संरक्षणं कर्तुं युद्धं सम्यग्विधीयते ।
भवद्भिः स तु संवासं कुरुते वन्दिमन्दिरे ।।
इन्द्रियाणि मनोयोगाद् गृह्णन्ति विषयान् यथा ।
तथा सन्नतसंयुक्ताः कुर्वन्ति विषमा(३) रणम् ।।
विना सन्नतसंयोगं सद्धं(४) तव न शोभते ।
रथिं(?) विना क्वचिद्याति रथश्चैतन्यवर्जितः ।।
१४६०
इत्युक्त्वा भेरिपटहमृदङ्गाद्याश्च संप्रति ।

---

(१) विसन्धिर्दुष्टः । (२) उक्तमित्यध्याहारेणान्वयः । (३) देशाध्यक्षाः । (देशाध्यक्षे तु विषमः)। (४) युद्धम् । (युद्धे सद्धं समाख्यातम्)।

वादनीया इति प्रोक्तमातोद्यवादकान् प्रति ॥
तत्काले गाजदीखानकुञ्जरस्याङ्घ्रिदेशकम् (?) ।
अग्रियन्त्रसमुन्मुक्तपिण्डेन शिथिलीकृतम् ।
पुरतस्तादृशं वाक्यमातोद्यानां च शब्दकम् ॥
श्रुत्वा विलोक्य शिथिलपादं च द्विरदं स्वकम् ।
छिन्ने शस्ये यथा वृष्टिर्विफला विगते नृपे ॥
युद्धमस्ति तथास्माकमित्युक्त्वा हस्नलीं प्रति ।
स्वस्वामिलवणं स्वच्छं कर्तुमद्य स्वकं बलम् ॥
रणे प्रदर्शितं चास्ति लवणद्वेषकारिषु ।
भवत्सु गम्यतेऽस्माभिर्यथायोग्यं विधीयताम् ॥
एतावत्कालपर्यन्तममंदात् (१) सन्नतस्य (२) न ।
जातः स्थितो निग्रहस्तु कुत्रापि जगतीतले ॥ १४६६
भवतामद्य वै मन्त्रिदशायां सन्नतस्य तु ।
निग्रहः सर्वलोकैस्तु दृष्टोऽस्ति सवभीतिकृत् ।
इत्युक्त्वा निखिलां सेनामादाय स तु वै गतः ॥
कश्मीरदेशजातेन तृतीयप्रहरावधि ।
युध्यता संस्थितं तत्र स्वस्वामिरक्षणाय तु ॥
यदर्थं भवता युद्धं क्रियते न स भूपतिः ।
वर्तते चाधुना तस्माद्यद्योग्यं तद्विधीयताम् ॥
युद्धं चेत् क्रियते तर्हि क्रियतां दीयते मया ।
सामग्री निखिला तुभ्यं नो चेत् संस्थीयतां सुखम् ॥
अन्धः स्वमुखबिम्बन्तु तामजे (३) न हि पश्यति ।
यथा तथाऽवरुद्धस्तु नृपो भृत्यकृतं रणम् ॥
इत्युक्त्वा प्रेषितं वाक्यं हस्नलीकेन तं प्रति ।
सोऽपि तद्वाक्यमाकर्ण्य युद्धादुपरराम(४) वै ॥ १४७३

इति चैवंविधं कर्म क्रियते दुष्टमन्त्रिणा ।
तस्माद्राज्ञा न कस्यापि कार्या विश्वसतिः (?) सदा ।
लोकानां दुष्टबुद्धीनां शीलं ज्ञेयं निरन्तरम् ॥
आप्तानां वचसि श्रद्धा यस्य राज्ञो न जायते ।
चारानपि न यो राजा विषयेषु नियच्छति ॥
अहमेवास्मि सर्वज्ञो मया कस्योपदेशकः ।
श्रोतव्य इति(५) यो चित्ते विदधाति न पत्रकम् ॥
संवाचयति चायातमायाद्यच्चाधिकं व्ययम् ।
करोति भयसंशून्यो यत्र तत्र च गच्छति ॥
सर्वेषामपि विद्वेषं विश्वासमपि वै तथा ।
करोति व्यसनेष्वेव संसक्तो यश्च तिष्ठति ॥
न्यायं न कुरुते यस्तु प्रजां पीडयते च यः ।
दयायां विमुखो योऽस्ति यश्च पातकसंयुतः ॥ १४८०
पतितस्य तु संसर्गे विमुखो नास्ति यः सदा ।
वर्तते धमविमुखो यश्चविष्यश्च यः सदा ॥
स नृपो धर्मविमुखैरवदुल्लप्रभैर्नरैः ।
पीड्यते भूतले तस्मात् सावधानतया नृपैः ॥
स्थातव्यं मत्पदभ्रंशं को वा भूमौ विधास्यति ।
एवं नैवाभिमानस्तु कर्तव्यः कैरपि स्वयम् ॥
सवदा भक्तिभावेन स्वपदस्थैर्यहेतवे ।
देवगोग्रहविप्राणां विधातव्यं समर्हणम् ॥
वर्णाश्रमोक्तधर्मस्तु विधातव्यः सदैव हि ।
स्वधर्मं यः परित्यज्य करोति परधर्मकम् ॥
मुख्यस्य त्यागतः सो(६) वै जघन्यस्य तु सेवनात् ।
इह लब्ध्वा परं दुःखं परत्र च न शोभनम् ॥
प्राप्नोति यादृशं कर्म विहितं चास्ति मन्त्रिणा ।
अवदुल्लेन केनापि न कार्यं तादृशं क (चित् ?) ॥
१४८७

(१) मन्त्रिणः । (२) राज्ञः । (सन्नतो नृपतौ भवेत्) । (३) दर्पणे । (तासजो दर्पणे भवेत्) । (४) परस्मैपदं चिन्त्यम् । (५) M. ०मिति । (६) सन्धिर्दुर्घटः ।

अवदुल्लेन तत् कालं स्वकृताय तु प्रीतितः ।
नृपाय कथिता नीतिर्दुर्नीतिक्षयसाधिका ॥

❀ ❀ ❀ ❀

आवरा آب را (१) वाञ्छता स्वस्य विधातव्या
न दुश्मनाः دشمن (२) ।
जातुचिदपकृष्टो वै भृत्यो वा जगतीतले ॥ १४८९
स्फटिकस्तु यथा श्याहसंगतः श्यामरूपताम् ।
एति तद्वद्बुजुर्को(३) بزرگ पि नीचसंगेन नीचताम् ॥
जासूसो (४) جاسوس क्तं दुरोगं (५) دروغ
यो मनुते पृथिवीपतिः ।
जोरावरोऽपि زور اور (६) सस्तूर्ण❀ लागरः لاغر (७)
किल जायते ॥
अहं जोरावरोऽस्मीति मत्वा जासूस جاسوس
भाषितम् ।
केनापि न हि मन्तव्यं दुरोगं دروغ सुखमिच्छता ॥
व्याधितेन यथा दारु(८) دارو मधुरं न हि मन्यते ।
विनश्यता तथा राज्ञा भृशं जासूस جاسوس
भाषितम् ॥ १४९३
जासूसोक्तं हि सखुनं سخن दुरोगं دروغ
मनुते हि यः ।
अचिरेणैव कालेन बेपर्दः(९) بی فرد स तु जायते ।
स्तम्भं विना यथा खानह् (१०) خانه
सुस्थिरं न हि जायते । १४९४

वजीर وزیر मन्तरा राज्यं तथा जगति भूपतेः ॥
दराउ(११) तरणं यद्वज्जायते न पुलं(१२) پل विना ।
वजीर(१३) وزیر मन्तरा तद्वद्राज्यभोगस्तु भूपतेः ॥
वाचश्म چشم بے गे(१४)ह گوئی रूपादि
ग्रहणं वहनेन च ।
क्रियते तु यथा तद्वत् प्रभुणा मन्त्रि ? मन्तरा ।
क्रियते राज्यभोगस्तु इरंदा(१५)नंददायकः ॥
आलम् عالم संजायते यस्य वाञ्छया सर्वसंमतः ।
स वै विश्वम्भरो देवः पालयिष्यति मामपि ॥
इति यस्यास्ति दरफिल् (१६) دردل सर्वथा
तु हमेशह همیشه (१७)
मुदमी (१८) रक्षणं तस्य कुरुते सर्वतः स्वयम् ॥ १५००
दर आलम् در عالم (१९) सदा पूजा जायते
यस्य सः(?) पुमान् ।
असलसं اصل (२०) एव सर्वेषामस्ति
विश्वंभरोऽव्ययः ॥
सपेद سفید (२१) मात्रतो नैव रजतं जायते यथा ।
सदफ صدف स्तु (२२) तथा राजजादोः زاده ऽपि
न गुणैर्विना ॥
राजा भवति तस्माद्वै राजजादैर्गुणार्जनम् ।
कार्यं विलायतं ولایت (२३) भोक्तुं न भाव्यं
किल निर्गुणैः ॥ १५०३

---

(१) प्रतिष्ठाम् । (आब जले प्रतिष्ठायाम् ; रा द्वितीयार्थे) । (२) रिपवः । (रिपौ तु दुश्मनः स्मृतः) । (३) विज्ञः । (बुजुर्कस्तु भवेद्विज्ञे) । (४) चार । (जासूसस्तु भवेच्चारे) । (५) मिथ्यार्थं । (मिथ्यार्थे तु दुरोगं स्यात्) । (६) बली । (जोरावरस्तु बलिनि) । (७) बलहीनः । (बलहीने तु लागरः) । (८) औषधम् । (औषधे तु भवेद्दारु) । (९) व्यवहितः । (बेपर्दस्तु व्यवहितः) । (१०) गृहं । (खानहस्तु गृहे भवेत्) । دریا (११) समुद्रः । (समुद्रे तु दराउः स्यात्) । (१२) सेतुम् । (सेतौ पुलमुदीरितम्) । (१३) मन्त्रिणम् । (१४) वाचश्मग— (चक्षुषा विना) । (१५) इन्द्रिय । (इन्द्रिये तु इरंदः स्यात्) । (१६) दरफिल—जीव ?……… (१७) संततं । (संतते तु हमेशहः) । (१८) ईश्वरः । (ईश्वरे मुदमी भवेत्) । (१९) संसारे । (२०) कारणम् । (असलं स्यात् कारणे वा) । (२१) श्वेत । (सपेदस्तु भवेत् श्वेते) । (२२) शुक्तिका । (शुक्तिकायां तु सदफः) (२३) देशं । (विलायतं देशे स्यात् (?)) । ❀ सन्धिर्दुर्घटः ।

कमानं کمان (१) गुणसंशून्यं नाप्नोति
तीररा تیر را (२) यथा ।
गुणशून्यस्तथा राजनंदनोऽपि च राज्यकम् ॥ १५०४
यथा प्रसन्नमुकुरे प्रतिविम्बति वै मुखम् ।
आवृणोति तथा राज्यं सगुणं राजनन्दनम् ॥
नापयंदह ناپاینده (३) सायंदह (४) پاینده यथा
न जायते कचित् ।
गुणशून्यस्तथा राजजातो राजा न जायते ॥ १५०६
जींदमी (५) زندگی करणे शक्तो योऽस्ति
वै तेन कुस्तनम् کشتن (६) ।
कार्यं नान्येन केनापि जानता चालम(७)स्थितिम् ॥
त्तमो जीवयितुं यो न तेन कस्यापि कुस्तनम्(८) ।
न कार्यं चेह नान्यत्र संलब्धुमावरा(९) آبرو भृशम् ॥
न गुणाहं (१०) گناه विना दण्डः
कार्यो देयश्च केनचित् ।
अपराधं विना याति दण्डदो दोजषं دوزخ (११)प्रति ॥
सौगात سوغات (१२) दायकान् लोकान् यो नृपः
पापमन्तरा ।
विनाशयति तस्याशु जायते दिरम درم (१३) त्तयः ॥
१५१०

सौगात سوغات (१४) दायकान् यो व
संपीडयति पार्थिवः ।
स शीरं شیر (१५) संपरित्यज्य
तक्रं पिवति चान्वहम् ॥
लस्कर لشکر स्तु (१६) यथा याति
सरदार سردار (१७) नियोगतः ।
कर्म कुर्वन्ति जांदारा جاندار (१८)
स्तथेश्वरनियोगतः ॥
ईश्वरेण तु यो जन्तुर्यस्मिन् कर्मणि योज्यते ।
तेन तत्र क्रियते कर्म रास्तं راست (१९) चैव
दुरोगकम् دروغ (२०) ॥ १५१३
अंगोज (२१) गंधमाघ्राय खवीशोऽ خبیث (२२)
न्यत्र गच्छति ।
यथा गुणाह گناه (२३) मालोक्य
सवावो صواب (२४) ऽन्यत्र गच्छति ॥
नमेर (२५) वद् पादहीनः करदस्तु (२६)
यथा तथा ।
खर्व (२७) शून्यस्य नृपतेर्नेकनामी نیک نامی (२८)
न सर्पति ॥ १५१५

---

(१) धनुः। (कमानं तु भवेच्छार्ङ्गे)। (२) शरम्। (शरे तीर समीरितं, रा द्वितीयार्थे)। (३) नश्वरः। (४) शाश्वतः। (नश्वरे नापयंदह स्यात्, सायंदह शाश्वते भवेत्)। (५) जीवन। (जींदमी जीवने प्रोक्तं)। (६) मारणं। (कुस्तनं मारणे भवेत्)। (७) विश्व०। (आलमश्च भवेद्विश्वे)। (८) मारणं। (९) प्रतिष्ठां। (प्रतिष्ठायां भवेदाव)। آبرو (१०) पापं। (पापे गुणाहमित्युक्तम्। (११) नरकम्। (दोजषो नरके भवेत्)। (१२) कर०। (सोगातस्तु करे भवेत्।) (१३) द्रव्य०। (दिरमं तु भवेद्द्रव्यम्)। (१४) कर०। (१५) त्तीरं। (त्तीरे शीरं समुद्दिष्टं) (१६) नरः। (लस्करस्तु नरे भवेत्)। (१७) सेनापति०। (सेनापतौ तु सर्दारः)। (१८) प्राणिनः। (प्राणवन्तस्तु जांदाराः)। (१९) हिं। (अंगोजो सत्यम्। (२०) दुरोगकं मिथ्या। (सत्ये रास्तं समुद्दिष्टं मिथ्यार्थे तु दुरोगकम्) (२१) हिंगुनि स्मृतः)। (२२) भूतः। (खवीशस्तु भवेद्भूते)। (२३) पापं। (पापे गुणाहमित्युक्तं)। (२४) धर्मः। (सवावस्तु भवेद्धर्मे)। (२५) नमेर—(नग ?) (२६) नरः। (करदस्तु नरे भवेत्)। (२७) गुण०। (गुणे खर्व समाख्यातं)। (२८) यशः। (नेकनामी तु यशसि)।

शराव شراب (१) पानतो मस्तो مست (२)
ज्ञानवानपि जायते।
यथा नामर्द نامرد (३) संसर्गाच्छूरोऽपि
कातरस्तथा ।। १५१६
दर् در महबूब् ماہ رو (४) हम चश्म چشم (५)
यथा पतति सत्वरम् ।
वा दुश्मन् (६) सम सख्यं न कार्यं हितमिच्छता ।।
शरन्न जायते नूनमातशस्तु آتش (७) यथा तथा ।
दुश्मनस्तु न वै मित्रं तेन साकं तु तत् कथम् ।।
सपेद سفید स्तु (८) यथा पङ्कसङ्गाद्भ-
वति चिर्किनः چرکیں (९) ।
तथा नामर्दसंसर्गान्मर्दो भवति कातरः ।। १५१९
आरयू (१०) करणात् कार्यं न किञ्चिज्जायते यतः ।
अतो धर्मे तु अश्नासः (११) कार्यो नान्यत्र भूभुजा ।।
खुसहाली خوشحالی (१२) न यस्यास्ति
सवाव صواب (१३) करणे भृशम् ।
तस्य मोक्षोऽस्ति कठिनो नितरां
दर् कियामत در قیامت (१४) ।। १५२१

राहत (१५)स्तस्य कठिनो दिलं دل (१६) यस्यास्ति
चाविलम् ।
आविले मुकुरे किं वै दृश्यते मुखमण्डलम् ।
नज्रस्तेन कथं कार्यो यकीनं (१७) नास्ति यस्य तु ।
विना नज्रं نظر (१८) न भूपानां कार्यसिद्धिः प्रजायते ।।
राज्ञा सूरतसंशून्यो न कोऽपि निजसन्निधौ ।
स्थापनीयस्तु नितरां राहत راحت (१९) प्राप्तिलिप्सया ।।
बद्वक्त بدبخت (२०) संगतो
नृणां दुःखं संजायते यथा ।
तथैव मोहनति (२१)रा कुरूपसंगतोऽन्वहम् ।।१५२५
कोरो کور (२२) यथाद्यपदीनां* सूरत (२३)
ग्रहणे क्षमः ।
नास्ति शौर्येण रहितस्तथेशो राज्यरक्षणे ।।
अम्बुधौ संप्रजायन्ते सर्वदा मौजहा موج (२४) यथा ।
दर् आलम् در عالم (२५) प्रजायन्ते
महीपानां तथाऽरयः ।
ते प्रयत्नेन जेतव्या राहत راحت (२६) प्राप्तये द्रुतम् ।।
श्रोत्रपादविहीनोऽपि मारो गालवतो (२७) वनम् ।
१५२८

---

(१) मद्य० । (शरावस्तु भवेन्मद्ये । (२) उन्मत्तः । (उन्मत्ते तु भवेन्मस्तः) । (३) शूर० । (४) सुन्दर । (सुन्दरे महबूबः स्यात्, दर षष्ठ्यर्थे) (५) नेत्रं । (नेत्रे चश्म समीरितं) । (६) शत्रुणा सह । (वैरिणि स्यात्तु दुश्मनः, वा तृतीयार्थे) । (७) वह्निः । (८) श्वेतः । (सपेदस्तु भवेत् श्वेते) । (९) चिर्किन······ । (१०) मनोरथ । (आरयू स्यान्मनोरथे) । (११) स्नेहः । (अश्नासस्तु भवेत् स्नेहे) । (१२) आनन्दः । (आनन्दे खुसहाली स्यात्) । (१३) धर्म । (१४) प्रलये । (प्रलये तु कियामतः । दर् षष्ठ्यर्थे [सप्तम्यर्थे]) । (१५) सुखं । (राहतः सुखमुच्यते । (१६) मानसं । (दिलं तु मानसे भवेत्) । (१७) ध्वनिः । (यकीनं निस्वने स्मृतं) । (१८) संकल्पं । (संकल्पे तु स्यान्नज्रः) । (१९) सुख० । (वाह- तस्तु सुखे भवेत्) । (२०) दुर्भग० । (दुर्भगे वद्वक्त स्यात्) । (२१) मोहनतिरा—— । (२२) अन्धः । (अन्धे कोरः समुद्दिष्टः) । (२३) शूर ? । (२४) तरङ्गः । (तरङ्गे तु भवेन्मौजः) । (२५) विश्वम् । (आलमस्तु भवेद्विश्वे, दर षष्ठ्यर्थे [सप्तम्यर्थे]) । (२६) सुख० । (२७) गरुडः । (गरुडे गालवो भवेत्) ।

* यथा घटादीनाम इति क्वचिद् भवेत् ।

करोति दंशं कुरुते शृणोति याति च द्रुतम् ।।
पद्विन्द्रियेण भूपेन न कस्यापि भयं स्वयम् ।
कार्यं समागतं तत्तु खण्डनीयं यथाबलम् ।। १५३०
जयसिंहादिभूनाथैर्भूततुल्यैस्तु चौकदा ।
अस्माकं तु परीक्षार्थं युष्माकमपि सर्वथा ।।
अकब्बरस्य तनयो सर्वदा नयसंयुतः ।
आनेयोऽस्ति द्रुतं योद्धुं शूरो लस्कर لشکر (१)संयुतः ।
तत्रास्माकं तु द्रष्टव्यं युष्माभिः शौर्यमुत्तमम् ।।
संग्रामसागरे मग्नं साहिवं صاحب (२) यस्तु सत्वरम् ।
समुद्धरति ज्ञातव्यो वजीरः وزیر (३) सोत्तमो (?) नृभिः ।।
नरदेवसमुद्धारकरणे निपुणोऽस्ति यः ।
वजीरः सैव (?) बोद्धव्यो बुद्धिमान् बुद्धिसंयुतैः ।।
गोग्रहे तु यथा पूर्वमर्जुनेन तु चोत्तरः ।
समुद्धृतः स्थितो वाणैस्तथा तव समुद्धृतिः ।
कर्तव्यास्ति मया तत्र चिन्ता कार्या न कापि वै ।।
यथा चालमशाहस्य समक्षे रणचत्वरे । १५३७
युद्धं कृत्वा जयस्तस्मै निजशक्त्यनुसारतः ।
दत्तः स्थितस्तु चास्माभिस्तथा तुभ्यमपि प्रभो ।।
दातव्यः सर्वथा तस्मान्न गमः (४) संविधीयताम् ।
खुसहाली خوشحالی (५) विधातव्या कार्यमीश्वरचिन्तनम् ।। १५३९
इति तत्समये तेन पातसाहनिदेशतः ।
अजितसिंहनृपतिः प्रेषितः शिबिरं प्रति ।। १५४०
अभिवाद्य सुरत्राणं पुरत्राणसमुत्सुकम् ।
पुरतो मारवाधीशो निःसृतस्तु यदा तदा ।।
अजितो नासि राजंस्त्वं ❀ जारजातोऽसि सर्वथा ।
न कचिद्राजजातानामीदृशं कर्म दृश्यते ।।
पातसाहः सुताकान्तो लोकानां कल्पपादपः ।
त्यक्तमर्यादशैदानामुक्त्या यस्मात्त्वया धृतः ।
अतस्त्वं नासि राजन्यो वर्तसे यवनाधमः ।।
इत्युक्त्वा पौरनारीभिः पादत्राणैस्तु ताडनम् ।
कृतं फलं निषिद्धस्य द्रुतमत्रैव लभ्यते ।। १५४५
तस्य तत्समये सर्वैर्यवनैरपि भर्त्सनम् ।
विहितं नैव कस्यापि रोचते कर्म चाशुभम् ।।
जरह ध्वंसकध्वंसं कर्तुं वै मथुरापुरी ।
अवरुद्धा स्थिता पूर्वं राजराजेन धीमता ।।
अनेन मरुदेशस्य राज्ञा तु जरहः (६) स्वकः ।
तिल्किला सन्निधौ तूर्णं स्वयं वसल(७) बद्धतः ।।
अनेन तिल्किला(८) स्वस्य मेलकी(९) विहिता यतः ।
अतो नानेन भूपेन रक्षणीयं स्वराष्ट्रकम् ।
स्वचित्ते विहितं चेत्थं शयदैरपि तत्क्षणे ।। १५५०
सर्वापवादनीहारप्रावृतस्य नृपस्य तु ।
मुखं विवर्णमभवद्राहुसंग्रस्तचन्द्रवत् ।।
विवर्णवदनं वीक्ष्य नृपं तत्समये मुखात् ।
एवं तु हस्नलीकेन कथितं स्मितपूर्वकम् ।। १५५२

---

(१) सेना। (सेनायां लस्करो भवेत्।) (२) प्रभुं। (साहिवस्तु प्रभौ भवेत्)। (३) मन्त्री। (वजीर स्यात्तु मन्त्रिणि)। (४) शोकः। (गमः शोके तु संस्मृतः)। (५) आनन्दः। (आनन्दे खुसहाली स्यात्)। (६) जामाता। (जामातरि स्याज्जरहः)। (Son-in-law)। (७) छाग। (वसलस्तु भवेच्छागे)। (८) दुहिता। (दुहितायां तु तिल्किला)। (९) विधवा। (विधवायां तु मेलकी)। ❀ M. त्वं राजन्।

वैरिव्यापादकानां तु या गतिर्जायते नृणाम् ।
रणाङ्गने तु चास्माकं सा गतिः संभविष्यति ॥
श्रीमत्या या गतिर्याता सा गतिश्चास्य भूपतेः ।
भविष्यति न किं केन क्रियते जगतीतले ॥ १५५४
संदातुं शक्यते केन दस्तो دست (१) लोकमुखेषु वै ।
हिताय स्वस्य वै सर्वैर्द्विषद्द्वेषो विधीयते ॥
भीमसेनेन हृदयं समुत्पाट्य न किं रणे ।
दुःशासनस्य रुधिरं संपीतं कौणपप्रियम् ॥
पाययित्वामृतं पूर्वं हरिणा समदर्शिना ।
अर्कचन्द्रमसोर्वाक्याद्राहोश्छिन्नं न
किं शिरः ॥ १५५७

❀ ❀ ❀

उपासते तथा सर्वे साहिवं दिरमा درم (२) न्वितम् ।
दरख्तस्तु درخت (३) फलैः शून्यः
पक्षिभिस्त्यज्यते यथा ।
तथा संत्यज्यते भृत्यैः साहिवो दिरमोज्झितः ॥
सर्वे गुलाम غلام (४)सदृशा मम तिष्ठन्तु चेच्छता ✣ ।
अर्जनीयं तु दिरमं درهم (५) प्रभुणा प्रभविष्णुना ॥
खानह खانه (६) मध्यगता रात्रौ चीराक چراغ (७)
मन्तरा यथा ।
कूजा کوزه दयो न दृश्यन्ते तथैव द्रव्यमन्तरा ।
वासाहिवा بادشاهی (८) न दृश्यन्ते
गुणयुक्ता नरोत्तमाः ॥
